॥ ॐ ॥

वे० शा० सं० रा० सरस्वतीभूषणकिंजवडेकरोपाह्ववामन-
शास्त्रिभिः कृता

आधानपद्धतिः ।

एतत्पुस्तकं

हरि नारायण आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८४०

खिस्ताब्दाः १९१८

मूल्यमेको रूपकश्चतुर्दश आणकाश्च (१।१४)

आधानपद्धतौ प्रकरणानि ।

अर्पणपत्रिका।

श्रीरामदीक्षितानां साहाय्याद्विरचिता मयाऽल्पधिया।
आधानपद्धतिरियं भगवत्पादेऽर्पिता मुदेऽस्तु सताम् ॥ १ ॥

जानक्यां रामचन्द्रादधिगतजनुषो यस्य बन्धुर्वरीयान्
दत्तात्रेयाभिधेयः सकलनिगमवित्सोमयाजी सुशीलः ॥
अन्यौ द्वौ शीलविद्याप्रमुखगुणरुचिरौ विष्णुगोविन्दसंज्ञौ
खापर्डे श्रीगणेशो विलसति च महानाश्रयो यस्य नित्यम् ॥ २ ॥
स्वाध्यायं केशवार्यान्निगुडकरगुरोर्धीमतः शब्दशास्त्रं
तन्त्रं वैयासिकं यो बुधकुलतिलकाच्छ्रीविरूपाक्षसूरेः ॥
मीमांसां वैद्यनाथाच्चिरतरमपठीद्रामतः श्रौतविद्यां
तेन श्रीवामनेन व्यरचि कृतिरियं क्षम्यतां विद्वरिष्ठैः ॥ ३ ॥

सरस्वतीभूषणकिजवडेकरोपाह्ववामनशर्मा।

आधानपद्धतेः प्रस्तावना ।

भूधरभूजानिर्विजयतेतराम् ।

प्रास्ताविकं किंचित् । पुरुषस्य बुद्धिपूर्वकारिण श्रेय उपादित्सितम् । तच्च विशिष्टक्रियासाध्यम् । सा च क्रिया वैदिकी यज्ञरूपा विश्वस्याखिलस्योत्पादयित्री नान्या काचित्प्रमाणत्वाद्वेदस्य । कथं वेदस्य प्रामाण्यम् । अर्थप्रत्यायकत्वाद्बाधकप्रत्ययाभावाच्चेति । अत एव तद्विहितापि यज्ञरूपा क्रिया श्रेयःसाधनमिति निश्चीयते । सा च यज्ञरूपा क्रिया वेदचतुष्टयसाध्या त्रयीसाध्या वा । चत्वारो वर्णा अत्राधिकृता । तत्राद्यास्त्रयः साक्षाच्चतुर्थस्तु शरणकरणदोहनादिद्वारा परम्परया । तत्रापि राजसूयादौ राज्ञः क्षत्रियस्यैवाधिकारः । बृहस्पतिसवादौ ब्राह्मणस्यैव । असोमयाजिनः क्षत्रियस्य नित्याग्निहोत्रं नास्त्येव । " न राजन्यस्य जुहुयात् " इत्यापस्तम्बवचनात् (आप० श्रौ० सू० ६ । १५ । १०) । परं नैतावताहिताग्निना त्यागो युक्तो गतश्रीत्वात्तस्य गतश्रीत्वं च तैत्तिरीयसंहितायां समाम्नायते—' त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्य ' (तै० सं० २ । ५ । ४) अतस्तस्याजस्रधारणं वैधमेव समापतितम् । नित्याग्निहोत्राभावेऽपि क्षत्रियस्य ' होमकाले गृहेभ्यो ब्राह्मणायान्नं प्रहिणुयात्तेनोहैवास्य हुतं भवति ' (आप० श्रौ० सू० ६ । ५ । ११) इति होमप्रत्याम्नाय सूत्रयामासापस्तम्बः । तथा ' नित्यमग्न्युपस्थानं वाचयितव्यः ' इति सूत्रणात् (आप० श्रौ० ६ । १४ । १२) । किंच " यो वा सोमयाजी सत्यवादी तस्य जुहुयात् " (आप० श्रौ० सू० ६ । १४ । १३) ' अथैतां दिशमग्नीन्नयन्ति यज्ञपात्राणि च ' इत्याश्वलायनसूत्राच्च (४ । २ । १) क्षत्रियेणाहिताग्नयो न त्यक्तव्या इत्येव सिध्यति । तानग्नीञ्श्मशानं नीत्वा तैरेव तद्दाहः सूत्रितः । यथा भगवानाश्वलायनः ' तस्मिन्बर्हिरास्तीर्य कृष्णाजिनं चोत्तरलोम तस्मिन्प्रेतं संवेशयन्त्युत्तरेण गार्हपत्यं ह्वाहवनीयमभिमुखशिरसम् । (आश्व० गृ० ४ । २ । १५) इति । तस्मादजस्रधारणमेवाग्नीनां क्षत्रियस्योक्तम् । वैश्यस्यापि वैश्यसव एवाधिकारो न बृहस्पतिसवादौ । रथकारस्याधानं वर्षासु रथकारस्येति (तै० ब्रा० आ० श्रौ० सू० ५ । ३ । १८) वचनेन प्राप्तम् । अत सोऽधिकारीत्यन्वेतत् । जातपुत्रकृष्णकेशपदाभ्यामवस्थाविशेषलक्षितोऽत्राधिकारी । वर्णत्रयबहिर्भूतमाधानाधिकारिणं नानुमन्यते आश्वलायनकात्यायनापस्तम्बकल्पकाराः । सा च यज्ञक्रियैकविंशतिसंस्थास्वरूपा । तत्र प्रकृतिस्त्रिविधा । अग्निहोत्रं दर्शपूर्णमासावग्निष्टोम इति । अन्या विकृतिरूपा । सर्वा चेयमुभयरूपाग्निसाध्या । ते चाग्नय आधानसाध्या । तच्चाधानं कल्पसूत्रसाध्यम् । ते च कल्पाः कात्यायनाश्वलायनापस्तम्बप्रभृतिभिः कल्पिताः । ते च लोके प्रत्याम्नायं

प्रयोगशास्त्ररूपाः स्मर्यन्ते । तेऽनुष्ठानौपयिकतयाध्ययनविध्याक्षिप्तत्वात्प्रत्याम्नायमङ्गत्व प्रतिपन्ना । अतस्तदनुसारमधिकृतैः पुरुषैरवश्यमनुष्ठेया सा यज्ञरूपा क्रिया । साऽभ्युदयनिःश्रेयसार्थिभिरनुष्ठेयेति सर्वेषां प्रवाद । वयं त्वाचक्ष्महे कर्तव्येत्येवानुष्ठेया न तत्राभ्युदयनिःश्रेयसे उद्देशीकृत्य प्रवर्तितव्यमिति । स्वर्गमोक्षरूपाभ्युदयनिःश्रेयसे तु लभ्येत एव आनुषङ्गिकतया । तदुक्तं—"कार्यमित्येव यत्कर्म नियतं क्रियते (भ० गी० १८।९) "विहितत्वाच्चाश्रमकर्मापि (ब्र० सू० ३।४।३२) इति । सूत्रयाञ्चभूम त्वार्थे भगवानापस्तम्ब —

> नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत् । (आप० ध० सू० १।७।१)
> निष्फला ह्यभ्युदये भवन्ति । (१।७।२)
> तद्यथाम्रे फलार्थे निमिते छाया गन्ध इति अनूत्पद्यन्ते
> एवं धर्ममपि चर्यमाणमर्था अनूत्पद्यन्ते । (१।७।३)
> नोचेदनूत्पद्यन्ते न धर्महानिर्भवति (१।७।४) इति ।

अर्थी समर्थो विद्वानत्र कर्मण्यधिकारी । सामर्थ्यं चात्र शास्त्रीयमेव सपत्नीक इत्यादि प्रथमाधाने सपत्नीकत्वस्यावश्यकता । कुत इति चेत् ' क्षौमे वसानौ जायापती अग्निमादधीयाताम् ' इति (आप० श्रौ० सू० ५।४।१०) । आधानं च भार्यासंयुक्तमितिवचनात् (जै० ६।८।१३) । यत्त्वपत्नीकस्य भीष्मस्याधानं पौराणिकवचनाद न्यथा लापयद्भिरुच्यते तदुक्तवचनविरोधादुपेक्ष्यं समादधुश्चात्र भट्टपादास्तन्त्रवार्तिके (जै० २।३।५) " भीष्मश्च—

> भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ।
> सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ (मनु० ९।१८२)

इत्येवं विचित्रवीर्यक्षेत्रजपुत्रलब्धपितृऋणत्वं केवलयज्ञार्थं पत्नीसबन्धं आसीदित्यर्थात्स्यानुक्तमपि गम्यते ।

> यो वा पिण्डः पितुः पाणौ विज्ञातेऽपि न दत्तवान् ।
> शास्त्रार्थातिक्रमाद्भीतो यजेतैवाव्यसौ कथम् ॥ इति ।

अत प्रथमाधाने सपत्नीकेन भवितव्यम् । मृतपत्नीकेनाप्येष्टव्यमाधानम् । ' अपत्नीकोऽप्यग्निमाहरेत् ' इत्यैतरेयवच श्रवणात् " यो वा कश्चिदविद्यमानायामिति च । (आप० श्रौ० सू० १।२०।१३) अत्र रुद्रदत्त । " अविद्यमानायामनाश्रमुक्तनिमित्तेनासन्निहितायामभावे च तस्या इत्यर्थो विशेषात् । वक्ष्यति च ' तेजआदि लुप्यते ' इति । ननु पत्नीवदस्याग्निहोत्र भवति । " युक्ता मे यज्ञमन्वासातै " (आप० श्रौ० सू० २।५।१०) इत्यादिना कर्मण पत्नीसंबन्धवचनात्तदभावे कर्मैव न सवर्तेत । नैवम् । कर्म न

संवर्ततानङ्गत्वे । अङ्गत्वे तु सवृत्त स्यात् । कुत । यस्याग्निहोत्र मे यज्ञमिति यजमानस्यैव स्वामित्वख्यापनान्न पत्न्या. । तथा व्रीहियवपश्वाज्यपय.कपालपत्नीसंबन्धानीनि तस्याः प्रसिद्धाङ्गसमभिव्याहाराच्च । तथा कर्मचोदना अपि यजमानमेवाधिकुर्वन्ति न पत्नीम् । यथा “ वसन्ते ब्राह्मणोऽग्नीनादधीत ” “ अग्निहोत्र जुहुयात्, ” ” दर्शपूर्णमासाभ्या यजेत, स्वर्गकामः ” इत्यादि । बह्वृचब्राह्मणे चोक्त ‘ तस्मादपत्नीकोऽप्यग्निहोत्रमाहरे-दिति । किंचोदाहृतमेतत्कल्पान्तरकारैः पत्न्यभावेऽप्यग्निसद्भाव वदद्भि । भारद्वाजस्तावत् ‘ अथ यद्यपत्नीकः स्यादुभाभ्या तस्य सस्कार औपासनाग्निहोत्राभ्यामिति । तथा च तल-वकारकल्पे जैमिनि.—आहिताग्नेश्चेत् पूर्व जाया म्रियेत ता निर्मन्थ्येन दहेत्संतपनेन वेति । ‘ अथाहार्येणानाहिताग्निं पत्नीं च ’ इत्याश्वलायन । किंचाचारोऽप्यत्र दृष्ट शिष्टतमानां कण्वविभाण्डकभीष्मप्रभृतीनाम् । किंच सहाधिकारेऽपि पत्न्या यजमानसाम्य-नास्त्येव । यथोक्तं मीमांसकै –‘यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्’ इति । तस्मात्सिद्धमभावेऽपि पत्न्या न कर्मणो निवृत्तिरिति । अत्र भीष्मग्रहणमसारमुक्ततन्त्रवार्तिकविरोधात् । एतावतास्य कर्मणो नित्यत्व प्रतिष्ठापित भवति । अपत्नीकोऽप्यग्न्याधाने श्रुत्याधिक्रि-यते । ये त्वस्य कर्मणोऽनित्यता ब्रुवन्ति त एतदवश्य विभावयन्तु । हेत्वन्तरमप्यत्रोपन्यस्यते । उपनयनादिवदावश्यकभावान पुरुषस्य “ कृष्णकेशोऽग्नीनादधीतेति श्रुतेः । स्मृतिष्वपि ‘ अग्न्याधेयमग्निहोत्र दर्शपूर्णमासौ ’ इत्येतेषामावश्यकेषु पुरुषसंस्कारेषु पाठात् । ‘ अवश्य च ब्राह्मणोऽग्निमादधीत ’ इति वसिष्ठवचनात् । भगवतापस्तम्बेनापि—“ अशू-द्राणामदुष्टकर्मणामुपायन वेदाध्ययनमग्न्याधेय फलवन्ति च कर्माणि ” आप० धर्मसू० १ । १ । ५) इति । द्विजातीना वर्णधर्मत्वेनानुक्रमणात् । मनुनाप्यनाहिताग्निता स्तैणमिति तदक्रियायामुपपातकत्वेन स्मरणाच्च । तस्मात्सिद्धमग्न्याधेयमावश्यकमिति । नित्यत्वात्पुरुषसंस्कारत्वादुपपातकत्वेन स्मरणात्स्त्रेणपरिहारकत्वाच्चेति । ‘ यस्य वेदश्च वेदी च ’ इति जागत्येन वच । यो हि ब्राह्मणमात्मानं मनुते भवितव्य तेन क्रियावता । सा च क्रिया यज्ञरूपेत्युक्तमाधानसाध्येत्यपि । अतोऽप्याधातव्या अग्नय. । उक्तं च याज्ञिकै ‘ नाक्रियो ब्राह्मणो नासंस्कारो द्विजो नाविद्वान्विप्रो नैतैर्हीनः श्रोत्रियो नाश्रो-त्रियस्य यज्ञो धर्मेण वेदानामेकैका शाखामधीत्य श्रोत्रियो भवति । ते चान्यत्र गौण-मधिकार कर्मस्वभ्यनुजानते ।

“ यस्याग्नौ न क्रियते यस्य चाग्र न दीयते न तद्भोक्तव्यम् ’ (आप० २ । ६ । १४), अस्मादपि वचनादाधातव्या अग्नय । राजापि समनुते श्रोत्रियम् ‘ अकर. श्रोत्रिय. ’ इति शासनात् । (आप० ध० सू० २ । १० । १०) ।

अस्मादप्यवश्यमाधातव्या अग्नयः । न ह्येवानाहिताग्नि स्यात् । विज्ञायते च देवानाम

एषोऽन्यतमो य आहिताग्निरित्यथ यदस्याग्निमुद्धरति सहस्रं तेन कामदुघोऽवरुन्धेऽथ यदग्निहोत्रं जुहोति सहस्रं तेनेत्यपरिमितमेवेदमुक्तं भवति इति बौधायनेन कण्ठरवेणोक्तत्वात् । (२ । ७ । ३) । 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति विधेः सत्त्वात् । 'नानाहिताग्निर्म्रियेत' इति शासनात् । 'यावज्जीवमग्निहोत्रं जुहोति' इति वचनादप्याधातव्या अवश्यमानय इत्युक्तं भवति । ये स्वधिकारिणि सत्यपि जप्याद्यनुष्ठानान्मध्यग्न्याधानाभावो न दोषायेत्याचक्षते तान्प्रत्याचक्ष्महे । न हि जप्यादिना गृहस्थस्य स्थितिर्युक्ता । आश्रमधर्मोऽयम् । यथाग्निहोत्राद्याश्रमधर्मो न तथेतरत् । न ह्याश्रमधर्मभूतमितरत्सर्वेषामविशेषेण स्मरणात् । अयं हि परमो धर्मो विशेषेण श्रूयते । गृहस्थाश्रमिभिर्ब्राह्मणैर्यद्ययं नानुष्ठितः स्यात्तर्हि श्रुतिचोदितोऽप्ययं वैयर्थ्यमाप्नुयात् । अस्मिन्ननधिकृतास्तु भगवत्पूजायां तत्स्मरणे च प्रवर्तन्ताम् । न हि तत्र द्विजातीनां गृहस्थाश्रमिणां प्रवृत्तिः फलवतीति युक्तमुत्पश्यामः । न ह्यस्य कश्चित्प्रतिनिधिर्विधीयते । यत्र तु स्मर्यते पुराणश्रवणादावग्निफलं तत्राप्यनधिकारिणामेव स्त्रीशूद्राणामग्निहोत्रफलं चाप्तव्यम् । अधिकाराथ नास्ति कथं फलवद्भिर्भवितव्यमित्याकाङ्क्षायां पुराणश्रवणादिभिस्तत्प्राप्यत इति समाधिः । संन्यासस्यापीयमेव गतिः । यत आहुर्भट्टपादाः (तन्त्रवार्तिके जै० १ । ३ । ८)—

> तत्रैवं शक्यते वक्तुं येऽन्धपङ्ग्वादयो नराः ।
> गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः ॥
> नैष्ठिकं ब्रह्मचर्यं वा परिव्राजकतापि वा ।
> तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते ॥
> यावदेकं श्रुतौ कर्म स्मृतौ वान्यत्प्रतीयते ।
> तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते ॥

व्रीहियवादिष्वपि तावत्प्रत्यक्षश्रुतिविहितेषु यदि कश्चिद्यावज्जीवमप्येकमेव पक्षमाश्रित्य व्यवहरेत स कदाचिदप्युपालम्भास्पदं गच्छेत् । यानि च प्रतिदिनं प्रयुज्यमानवर्सामयजुर्ब्राह्मणकल्पव्याख्यानादिब्रह्मयज्ञनिमित्तानि फलानि क्रत्वधिकृतपुरुषेभ्योऽन्यार्थस्य प्रसङ्गाद्ब्याहृतानि जपध्यानमात्राधिकृतब्रह्मचारिपरिव्राजकविषयत्वेनावतिष्ठन्ते तान्यपि स्वाध्यायविज्ञानभूयस्त्वेन भूयिष्ठानि भविष्यन्तीति प्रतिवेदब्रह्मचर्योपदेश इत्यादि । हरदत्तोऽप्यत्र व्याचख्यौ । नित्ययज्ञक्रिया पुरुषस्य श्रेयोऽभिव्यनक्ति । तस्यैवाक्रिया प्रत्यवायं संपादयत्यृणश्रुतेः ।

> योऽनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
> तयोरपि कुटुम्बाभ्यामाहरेदविचारयन् ॥

यद्द्रव्याभावे द्रव्यैकसाध्येष्वेवावश्यकेषु द्रव्यानुकल्पमाह समहकारः—

चण्डालात्प्रतिगृह्णीयाद्यजेतावश्यकैर्मखैः ।

बौधायनोऽपि—

तस्मात्कन्दैः फलैर्मूलैर्मधुनाथ रसेन वा ।
नित्यं नित्यानि कुर्वीत न तु नित्यानि लोपयेत् ॥

रत्नावल्याम्—

यो वैदिकमनादृत्य कर्म स्मार्तेतिहासकम् ।
मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते ॥
प्रधानं वैदिकं कर्म गुणभूतं तथेतरत् ।
गुणनिष्ठः प्रधानं तु हित्वा गच्छत्यधोगतिम् ॥
पतिते निष्कृतिर्दृष्टा क्रियाहीने न निष्कृतिः ।

तत्रैव—

तस्मात्सर्वप्रयत्नेन क्रियायुक्तो भवेन्नरः ।
आदध्यान्निर्धनोऽप्यग्नीन्नित्यलोपभयाद्द्विजाः ॥

अतोऽवश्यमाधातव्या अग्नय । अन्यदपि बह्वत्र प्रतिपादनीयं परं मन्येऽलं स्वेतावता विचारचातुरीचतुराणामिति दिक् । अक्रियायाश्च प्रायश्चित्तविधानात् । ये चान्य आश्रमा ऊर्ध्वरेतसा ते च नित्यश्रुतिविरोधादनधिकृतान्धपङ्ग्वादिविषयतया व्याख्येया इति । यज्ञकर्म प्रधानं तद्धि चोदनाभूतमिति जैमिनिना नवम उक्तत्वादप्यवश्यमाधातव्या अग्नय । इतोऽप्याधातव्या एवाग्नय । उक्तं च जैमिनिना "ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात्" इति पूर्वमीमांसा ६।२। ११ अत्र पार्थसारथिमिश्रा 'सोमेन यजेत स्वाध्यायमधीयीत प्रजामुत्पादयेत्' इति श्रुतं सोमविद्याप्रजं किं नित्यमुतानित्यमिति संशये । तत्र यावज्जीवादितुल्यनिर्देशाभावात् । ज्योतिष्टोमेन स्वर्गकामो यजेतेति फलश्रवणात् । वसन्ते वसन्ते ज्योतिषा यजेतेति चास्य कालविधिपरत्वादध्ययनप्रजयोस्तु विश्वजिद्वत्स्वर्गकल्पना सप्तमे ब्रह्मवर्चसकाम इत्येवमादीनां चोपनयनगतानां फलानामुपनयनस्याध्ययनाङ्गत्वेन स्वयं फलानपेक्षत्वादध्ययनफलत्वमेव न्याय्यम् । अतः फलकामाधिकारत्वमेवैषामिति प्राप्ते ब्रूमः—नित्यानीति । कुतः—

वीप्सायुक्तो वसन्तो हि निमित्तत्वेन गम्यते ।
यावद्वसन्तं नियमः सोमस्यातोऽवगम्यते ॥

यावद्वसन्तमभ्यासः कामस्यैवाथ नोद्यते ।
यजेतेति पदेनैवं प्राप्नोत्यभ्यासलक्षणा ॥

तस्माद्वसन्ते निमित्ते विधानादागत आगते वसन्ते नियमेन सोम कर्तव्य इति नियम । अध्ययनमप्यश्रुतफलमक्षरग्रहणादिना क्रमेण धर्माधर्मावबोधफलकत्वात्तस्य चावश्यकत्वादावश्यकम् । ब्रह्मवर्चसादिक त्वध्ययनाङ्गभूतोपनयनाश्रितसत्त्वगोदिगुणफलत्वाद ध्ययनफलमनादृत्यैव ।प्रत्येत्यादनम यनुगमन कथमवगमादनुपाय तथा सुतमनवो गच्छतीति, प्रत्यवायस्मरणादावश्यक तस्मान्नियमेन सोमविधापनम् । ऋगश्रुतिरपि सोमादीनामावश्यकत्व दर्शयति । न च तत्र ब्राह्मणग्रहणाच्चद्विषयमेवावश्यकत्वम् । विधिवाक्येषु विशेषाश्रवणाद्ब्राह्मणग्रहणस्योपलक्षणार्थत्वात् । अतस्त्रयाणामप्यावश्यक सोमादय इति नैतद्विकरणमन्यमतवादिभिरप्ययवितु युक्तम् । सोम आधानाधीन । आधान निद्धधीनम् । तस्मादप्याधानत्वा अग्न्य इत्यपिवादम् । " यस्मिन्कस्मिंश्चिदृतावादधीत " इत्यत्र भगवत आश्वलायनवचनादप्याधानस्यावश्यकतामुद्घोषयाम । सूत्रभाष्यम्—" आपद्यपि मुमूर्षो सर्वेष्वृतुष्वाधान कर्तव्य नैवानाहिताग्निर्म्रियेत ' इति । इतोऽप्यस्य चौण्डपान्नर्यैःस्मृत्यर्थे श्रौतकर्मानुष्ठाननित्यता वदति ।

• यामश्चेत्स्यतिवद्धः स्यादेकेनाशेन यज्वनः ।
ब्राह्मणस्य विशेषेण धार्मिकेऽसति राजनि ॥
यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः ।
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥

अग्न्याधेयम्—अग्नीनामाधेयम्—अग्न्याधेयम् । तत्कर्तव्यमिति । कृत्यल्युटो बहुलमिति भावे यत् । अग्निराधेयोऽस्मिन्कर्मणीति वा बहुव्रीहि । सोऽयमाधानसंस्कारोऽग्नीना वैदिक । विशिष्टे काले विशिष्टे देशे विशिष्टपुरुषेण विशिष्टैर्मन्त्रैर्गार्हपत्यायतु स्थापने यदरण्युपादिताङ्गाराणा निधान तदग्न्याधेयमित्युच्यते । तत्र चोत्पत्तिविधिरुभयत्र शतपथे तैत्तिरीये च । यथा-" वसन्ता ब्राह्मणोऽग्नीनादधीत " इति तैत्तिरीये ' वसन्ते ब्राह्मणोऽग्नीनादधीत ' इति । अयत्र उत्पत्तिविधिरयमर्थ —वसन्तकालब्राह्मणादिकर्तृविशेषविशिष्टाधानविधि. ।

इदानीमनुष्ठानविचारः ।

चतुर्विधा ब्राह्मणा—आर्चिका , याजुषा , सामगा , आथर्वणा , इति । तत्र प्रायः सर्वाणि कर्माणि याजुर्वेदिकान्येव । कुत । तत्रैव सर्वेषा श्रौतस्मार्तानां कर्मणामुत्पत्त्यादिविधीना सत्त्वात् । यद्यपि ऋग्वेदे सामवेदे अथर्वणे किमपि विहित श्रूयते तदङ्गमात्रम् । यथा

हौत्रमृग्वेदे स्तोत्रं सामवेदे ब्रह्मत्वमाथर्वणे यथा वा चब्रह्मणे रूपांशुयाजश्चामावास्याया-विधानामित्युपपर्णं । तथापि तत्र विकल्प एवाङ्गीकृत । परमेतादृशप्रधानस्याल्पस्य विहित-त्वादकिंचित्कर चैतद्विधानम् । अङ्गविधानार्थमेवेतरेषां त्रयाणां प्रवृत्ति । प्रधानविधानार्थं हि राजकप्रवृत्त यजुर्वेदमनुसरन्ति भूय दिङ्गृग्वेदप्रभृतय । आश्वलायनेन सूत्रिता अपि पश्च यज्ञा यजुर्वेदमूला एवेति नारायणप्रभृतय प्रतिपन्ना इति सुविदितमेव सूत्रवृत्तिकृतश्र-माणाम् । तस्मादाधानप्रभृतिकर्मानुष्ठानार्थमितरैर्यजुर्वेद एव शरणीकरणीय इति नान्तरीयक-तया समर्पितम् । विद्यारण्या अप्याहु —" कर्मकाण्डविषये यजुर्वेदस्यैव प्रधानत्वाद्भित्ति-स्थानीयो यजुर्वेदश्चित्रस्थानीयावितरौ ।" स च द्विविध शुक्लकृष्णाभ्याम् । तत्र क आश्र-यितव्य इतरैरिति चिन्तायामन्यतराश्रयणेऽपि न दोष । तथाप्याश्वलायनसूत्रं तैत्तिरीयैः सगच्छते । साङ्ख्यायनसूत्रं च वाजसनेयिभि । अत शाकलशाखिभिराश्रयितव्या तैत्तिरीय-शाखा । समाचारोऽप्येवमेव । तैत्तिरीयैर्हौत्ररूपाङ्गानुष्ठानार्थं शाकलशाखा शरणी क्रियते । शाकलैरप्याध्वर्यवानुष्ठानाय तैत्तिरीयशाखा शरणी क्रियते । साङ्खायनैश्चाध्वर्यवार्थं वाज-सनेयिशाखा शरणी क्रियते वाजसनेयिभिरपि साङ्खायनशाखा शरणी क्रियत इति विद्व-त्प्रथितचरम् ।

तत्र पुन सशय । कृष्णयजुषो बहूनि सूत्राणि । तत्रैतैरस्त मध्ये कतमद्ग्राह्य भारद्वाज मानव सत्यापाढीय बौधायनीयमापस्तम्बीयं वा । तत्रैव निर्णय । कतमदपि ग्राह्यम् । अपर च मन्त्राल्पतायै ऋग्वेदिभिर्बौधायनमादृतम् । सत्यापाढीये तु मन्त्रबाहुल्य तदपेक्षयाप्याप-स्तम्बीये । श्रौते कर्मणि गुणोपसहारे पटीयास विम्भगवा त आपस्तम्बीयचरणा । स्मार्ते तु बौधायन पटीयान् । श्रौते प्रायो यथाब्राह्मण सूत्रयति बौधायन । समीमास कात्यायन इति विशेष । तत्रेदानीमाश्वलायनसूत्राध्यायिनामापस्तम्बसूत्रानुसारी वक्ष्यमाणाधा-धानप्रयोग । अन्यदपि यत्किमपि ग्राह्यमिति प्रस्तुते इदमेव कुतो ग्राह्य कुतोऽन्यन्न गृहीतमिति शुष्क प्रवाद । अत्र भगवानापस्तम्ब समस्तलोकहिताकाङ्क्षी विध्यर्थवाद-मन्त्रात्मकविविधवेदभागव्याकीर्णं विप्रकार्णकरापास्तासक्त च विश्वस्य वैतानिकस्य कर्मणो याजुर्वेदिक प्रयोग व्याचिख्यासु अथाधेय व्याख्यास्याम इति चाधानप्रयोग सूत्रयाम्बभूव । तत्राधाने त्रय पक्षा सोमपूर्वं (सोमा पूर्वं) इष्टिपूर्वं (इष्टे पूर्वं अग्निहोत्र पूर्वं) अग्निहोत्रापूर्वं तत्रामावास्याया कृतमाधान तथा नक्षत्राधान चाग्निहोत्रपूर्वं भवति पूर्णिमाया कृतमाधानमिष्टिपूर्वम् । सोमपूर्वे तु आधानानन्तर सोमसकल्पादिकमेव । न दर्शपूर्णमासौ नाप्यग्निहोत्रमिति विवेक ।

तथापि निर्दिशति कपर्दिकारिका कचन शोभनपथम् ।

" त्रैविद्यात्मक कर्म श्रौत तदभिधीयते ।
श्रुतिस्मृत्यात्मक चैव स्मार्तं चैव तदुच्यते ॥ १ ॥

यजुर्वेदस्य चाध्वर्युर्होता ऋक्शाखिनस्तथा ।
उद्गाता सामवेदी च श्रौतं कर्म त्रिधात्मकम् ॥ २ ॥
ऋक्शाखोक्तं च हौत्रं त्वाध्वर्यवं याजुषं स्मृतम् ।
आपस्तम्बेन कर्तव्यं सर्वं चाध्वर्युकर्म च ॥ ३ ॥
आपस्तम्बस्य चाभावे बौधायनमथापि वा ।
ऋग्शाखैस्तु सर्वैश्च ह्यापस्तम्बेन कारयेत् ॥ ४ ॥
अन्यथा तु न कर्तव्यं शाखाविच्छिन्नदर्शनात् ।

इति कपर्दिकारिका । इति त्र्यम्बककृताधानप्रयोगे । वृत्तिः—अथैनं सोमेन यक्ष्ये इति संकल्प्य य आधानमिच्छेत्स आधानकालं नावेक्षेत सोमोपक्रमकालमेवादधीतेत्यर्थः । तत्र वसन्तादयः काला अग्रे सूत्रे स्पष्टमुक्ताः ।

तत्रैवमाधानानुष्ठानक्रमः ।

अरणी आहरेत् । संभारान्संभरेत् । अग्न्यायतनानि कुर्यात् । केशश्मश्रु वापयेत् । ब्रह्मौदनिकमौपासनिकं निदध्यात् । तस्मिन्ब्रह्मौदनं पचेत् । समिध आदध्यात । अग्निहोत्रं जुहुयात् । पूर्णाहुतिं जुहुयात् । तत आग्नेयमष्टाकपालं निर्वपेत् । तदहरेव तदहरादिसंवत्सरान्तानां कालानां कस्मिंश्चित्काले पवमानहवींषि निर्वपेत् । ततश्चाम्यानि हवींषि । इत्यादिः ।

मीमांसकानां च याज्ञिकानां कल्पकाराणां च भूयान्मतभेदः । तत्रानुष्ठाने यावद्वचनोपलब्धि यथासूत्रम् । वचनाभावे विकल्पः । भट्टदीपिकाकारप्रभृतयस्तु यथासूत्रमनुष्ठानं नानुमन्वते । पार्थसारथिमिश्रा अप्येवमेव । अन्ये तु याज्ञिकमतानुयायिनः सत्यपि मीमांसाविरोधे यथासूत्रमेवानुष्ठानं प्रतिजानते । वयं तु विकल्पमाचक्ष्महे । मीमांसकयाज्ञिकौ स्वतन्त्रमेव श्रुतिविहितानुष्ठानव्यवस्थार्थं प्रवृत्तौ । तत्र कः श्रेयान् इति विप्रतिपत्तावुभावपीति ब्रूमहे । अत उभयोर्विमतस्थले विकल्पेनानुष्ठानमेव श्रेयः । गौणमुख्यविचारेणावश्यं भवितव्यमित्यन्यदेतत् । सत्यपि विकल्पे गौणमुख्यौ पक्षौ विचार्य मुख्यपक्षानुष्ठानमित्यत्र न केषांचिद्विमतम् । इदं तु—

विद्वन्मतमुपादाय मम त्वेतद्धृदि स्थितम् ।

तत्र काश्चिद्विप्रतिपत्तीः प्रदर्शयाम ।

१ यस्य हविर्निरुप्तमित्यत्र मीमांसायां 'निनिरुप्तेन मुष्टीनाम्' इत्यत्राधिकरणे ६। ५।५ तस्मात्प्राकृतीभ्योऽपनीतो वैकृतीभिश्चासंयुक्तोऽग्निशिष्टो निर्वापास्तूष्णीं कर्तव्य इति मीमांसकाः प्रतिपन्नाः ।

याज्ञिकास्तु—पदार्थैकदेशस्याप्यार्थिकविधिविहितत्वमङ्गीकृत्य वैकृतीष्वप्यनुतिष्ठन्ति ।

२ अन्यत्र—'गुणलोपे च मुख्यस्य' इत्यत्र १० । २ । २७ । दर्शपूर्णमासयोः श्रूयते 'अग्निहोत्रहवण्या हवींषि निर्वपतीति श्रुतो निर्वापः । पवमानेष्टिषु चोदकेन प्राप्तः कर्तव्यो न वेति संशये न कर्तव्यः । कस्मात् । अग्निहोत्रहवण्यभावात् । यदाग्निहोत्रं भवति साग्निहोत्रहवणी । न च पवमानेष्टिवेलायामग्निहोत्रं हुतं संभवति विना चाग्निहोत्रहवण्या निर्वापो विगुणत्वादकर्तव्य इति प्राप्ते ब्रूमः । अतिदेशेन हि कार्यमुखेन पदार्थेषु प्राप्यमाणेषु हविःसंस्कारार्थतया निर्वापः प्राप्यते तदङ्गभूताग्निहोत्रहवण्यसंभवान्न प्राप्यते । नचाप्राप्तया गुणत्वमतस्तदभावेऽप्यविगुणत्वात्कर्तव्य एव निर्वापः । याज्ञिकास्तु आधानाङ्गसंभारहरणकाल एव पात्राणामुत्पादनात्तु चैवेन भाव्यग्निहोत्रहवण्यैव पवमानेष्टिषु निर्वापादिकं कुर्वन्ति । वयं त्वत्र विशेषं पश्यामः । ततस्तूष्णीमग्निहोत्रं जुहोतीति आपस्तम्बसूत्रोक्तप्रथमपक्षे प्राक्पवमानेष्टिभ्यः अग्निहोत्रहवणी संपाद्यैव । अपि वा द्वादशगृहीतेन स्रुचं पूरयित्वेति द्वितीयपक्षेऽयं परस्परविरोध इत्यवगन्तव्यम् । अथवा—नित्याग्निहोत्रे वेद्यभावेऽपि भगवताश्वलायनेन २ । ३ । २ इत्यत्र "वेदिमतिक्रम्य" इत्युक्तम् । भाविनीं वेदिमाश्रित्य तत्र वेदिशब्दप्रयोगः । वेदिशब्देनात्र वेदिदेश उपलक्ष्यते । इति हि याज्ञिकसंप्रदायः ।

३ तस्मादुत्तमयानुयाजस्याप्यार्थिकस्विष्टकृद्देवतासंस्कारार्थत्वात् ।

यत्रैककपालमात्रहविष्केष्टौ आर्थिकस्विष्टकृल्लोपस्तत्रोत्तमानुयाजस्यापि लोपः । यत्र वा पित्र्यादावग्निः कव्यवाहनः स्विष्टकृद्देवता आर्थिकस्विष्टकृदिति तत्रोत्तमानुयाजेऽपि देवोऽग्निः कव्यवाहनः । स्विष्टकृत्सुद्रविणा इत्यादिमन्त्र ऊहः लगे च तद्देवतोल्लिङ्गः । याज्ञिकास्त्वेव न कुर्वन्ति । १० । ४ । २०

४ येन कर्मणेर्त्सेत्तत्र जयाञ्जुहुयादितिवचनात् ।

ऋद्धिमिच्छता जयादयः कार्या इति कात्यायनापस्तम्बप्रभृतयः प्रतिपन्नाः सूत्रयांबभूवुश्च स्वस्वसूत्रे । जैमिनिस्तु—होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् । शेषश्च समाख्यानात् । इति ३ । ४ । १३ आभ्यां सूत्राभ्यां अपहोमविधिर्वैदिकविषय एवेति 'यदाहवनीये जुहोति' इति वचनाद्यत्राहवनीयस्तत्रैवैते होमा इति सिद्धान्तितवान् । याज्ञिकास्तु विनाप्याहवनीयं विवाहादावपि अभ्यनुजानन्ति जयादीन्होमानिति । अध्वर्युवेदविहितत्वादध्वर्युणैव ते कर्तव्याः नच विवाहादावध्वर्युरस्ति । इति । भगवता आपस्तम्बेन तत्र तत्र बह्वृचब्राह्मणं वाजसनेयकमुदाह्रियते । यथा—कमण्डलुपदं आदधीतेति बह्वृचब्राह्मणम् । हस्तेनोपयपतीति बह्वृचब्राह्मणम् । १ । २० । १० वाजसनेयकमपि तथैव—यथा न संभारान्संभरेदिति वाजसनेयकम् । अजस्य

पद आदधीतेति वाजसनेयकम् । अल्पस्तो लोमानि वापयत इति वाजसनेयकम् । अप्-शमीगर्भस्येति वाजसनेयकम् । इत्यादि वचांसि प्रमाणभूतानि आदरार्थं स्वीकुर्वता भगवता आपस्तम्बेन वाजसनेयकस्य स्वस्मात्पूर्वत्वमिति प्रदर्शितम् । किं विशेषतः केषांचित्तैत्तिरीयवाक्यानां वाजसनेयके उपसंहारः कार्यो भवति । यथावचनं परम्-३ । ३ । ४० "प्रविष्टानां पौष्णं चरुम्" इति वाजसनेयकवाक्ये 'पुरा प्रविष्टभाग' इति तैत्तिरीयवाक्यस्यानुपसंहारे सति तद्विषयेयमधिकरणद्वयप्रवृत्तिः । इति कुतूहलवृत्तौ । सत्युपसंहारे नाधिकरणद्वयप्रवृत्तिरिति मन्तव्यम् ।

अथच-पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति पाणिनिसूत्रव्याख्यायाम् पण्डितश्रेष्ठैर्भट्टोजिदीक्षितैः पुराणेति किम् । याज्ञवल्क्यानि ब्राह्मणानीति प्रत्युदाहरणं दर्शितम् । ततो याज्ञवल्क्यब्राह्मणं शतपथाख्यं नवीनमिति व्यवहरन्त केचित्सद्दस्यन्ते । परं तदालम्बनभूतं श्रीमद्भट्टोजिदीक्षितमतमेवासाधीयो निर्मूलं च । आपस्तम्बादिसूत्रेषु इति वाजसनेयकमिति तत्र तत्रोदाहरणात् । तथाहि-महाभाष्ये भगवता पतञ्जलिना पुराणेत्यस्य प्रत्युदाहरणं येन शतपथब्राह्मणस्यानुल्लेखात् शतपथवाक्यान्युपजीव्य प्रवृत्तानां बहूनां जैमिनिमीमांसाधिकरणानां दत्ततिलाञ्जलितापत्ते । भगवतो जैमिनेस्तु प्राचीनत्वं सर्वविद्वत्सम्मतम् । अत एव शब्देन्दुशेखरे नागोजिभट्टैरेवमुक्तोऽसि 'याज्ञवल्क्यानीति' । कण्वादिभ्य इञण् । ते हि पाणिन्यपेक्षयाधुनिका इत्यभिमानः । भाष्ये तु शाट्यायनादितुल्यकालत्वाद्याज्ञवल्क्यादिभ्यः प्रतिषेधस्तद्विषयता च नेतिवचनमेवारब्धम् एतेन अर्वाचीना वाजसनेयिन इति वदन्तः प्रत्याख्याता वेदितव्याः । यदि ' याज्ञवल्क्यानि ब्राह्मणानि ' इति समाख्यया एतत्साध्यते तर्हि ऐतरेयब्राह्मणेऽपि इयमेव गतिः स्यात् । भवतु को दोष इति चेत्पौरुषेये वेदे प्राप्तस्य समाश्वासस्य अविच्छिन्नपरम्पराविरतस्य सर्वथा लोपप्रसङ्गः वैदिकहानिश्च । अत एव अर्थवादरूपा आख्यायिका स्तुतिरूपा । भूतार्थवादत्वात्तेनैव तत्कल्पनयैवैव प्रमाणं भवितुमर्हति । ये तु लोकहितार्थं प्रवृत्तास्तैरिदमवश्यं भट्टपादवचनं मननीयम् । ' शाक्यादिवचनानि तु कतिपयदमदानादिवचनवर्जं सर्वाण्येव समस्तचतुर्दशविद्यास्थानविरुद्धानि त्रयीमार्गव्युत्थितविरुद्धाचरणैश्च बुद्धादिभिः प्रणीतानि । त्रयीबाह्येभ्यश्चतुर्थवर्णनिरवसितप्रायेभ्यो व्यामूढेभ्यः समर्पितानि न वेदमूलत्वेन सम्भाव्यन्ते । स्वधर्मातिक्रमणं च येन क्षत्रियेण सता प्रवक्तृत्वप्रतिग्रहौ प्रतिपन्नौ स धर्ममविप्लुतमुपदेक्ष्यतीति कः समाश्वासः । उक्तं च—

परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् ।
आत्मानं योऽतिसन्धत्ते सोऽन्यस्मै स्यात्कथं हितः ॥

बुद्धादेः पुनरयमेव व्यतिक्रमोऽलङ्कारबुद्धौ स्थितः । येनैवमाह—

यत्किल्बिषकृतानि यानि लोके
मयि निपतन्तु विमुच्यतां तु लोकः ॥ इति ।

स किल लोकहितार्थं क्षत्रियधर्ममतिक्रम्य ब्राह्मणवृत्त्यवक्तृत्व प्रतिपद्य प्रतिषेधातिक्रमासमर्थैर्ब्राह्मणैरननुशिष्टं धर्मं चाह्वाननानुशासद्धर्मपीडामप्यात्मनोऽङ्गीकृत्य परानुग्रहं कृतवान् । इत्येवंविधैरेव गुणैः स्तूयते तदनुशिष्टानुसारिणश्च सर्व एव श्रुतिस्मृतिविहितधर्मातिक्रमेण व्यवहरन्तो शिष्टाचारत्वेन ज्ञायते ।

तेन प्रत्यक्षया श्रुत्या विरोधे ग्रन्थकारिणाम् । पूर्वमीमांसा १ । ३ । ४.
ग्रहीताचारितृणां च ग्रन्थप्रामाण्यबाधनम् ॥ तन्त्रवार्तिके ।

इदानीमपि रामादिलोभान्मन्ये म ये स्वधर्ममिति यत्किमप्युपदिशन्ति प्रत्याख्याता वेदितव्याः । नहि साम्प्रत्यलोभेनापि स्वधर्मातिक्रमणं सतां युक्तम् ।

इत परं पञ्चाग्निविचारः तत्र सौत्री व्यवस्था यथा—वाजसनेयका —पञ्चाग्नीन्स्वसूत्रानुसारमादधते । पञ्चाग्न्याधानं च युक्तमिति अनुवदति काठकोपनिषत् । मानवपादा अपि मान्यस्तुतमैत्रोपनिषदम् । पञ्चाग्नयो—गृहस्था इति । भगवानापस्तम्बोऽपि—सत सभ्यावसथ्यावादधाति लौकिकाग्निमाहृत्य मथित्वाहवनीयाद्वा यथर्ष्याधानेन इति ५।१७।१ अत्र रुद्रदत्तोऽपि—नित्यमाधानं सभ्यावसथ्ययोः सूत्रकारमतात् । सत्याषाढसूत्रे तु—सत्याषाढमते सभ्यावसथ्ययोराधानं नित्यम् । एकेषां मते तयोः प्रतिषेध इति तेनैव सूत्रितम् ।

“ प्रतिषिद्धौ सभ्यावसथ्यावेकेषाम् ” इति ३ । ४ । १०

तस्मादत्र शाकल्यस्येति सत्याषाढसूत्रानुयायिनां विकल्पो युक्त । न त्वापस्तम्बसूत्रानुयायिनाम् । तेषु तयोराधानमेतव्यमेव बौधायनोऽपि सूत्रयाञ्चभूव ।

“ अत्रैतावग्नी आदधाति सभ्यं चावसथ्यं च ” २ । १७ रुद्रदत्तोऽपि आह—
“ बौधायनश्चाह सभ्यावसथ्ययोः करणं इति कुर्यादिति बौधायन ” न कुर्यादिति शालीकि । आश्वलायनेन तु त्रयाणामेव इति कर्तव्यताया उक्तत्वात् । तेऽत्रय एवाधातव्या इत्याचार्यमतम् । यथा—दक्षिण एव प्रथम निर्ज्ञायते पिता एषोऽग्नीनां यद्दक्षिण पुत्रो गार्हपत्यः पौत्र आहवनीय इति ।

भरद्वाजश्चाह—अथ सभ्यावसथ्यौ न शक्नुयाच्चो नित्यत्वेऽपि प्रयोग इति । बौधायनस्त्वत्रानुग्रहमुक्तवान् । आहवनीये वा सभ्यावसथ्ययोः सङ्कल्प इति । एतावता बोधायनसूत्राध्यायिभिरापस्तम्बसूत्राध्यायिभिश्चाग्नय पञ्चाधातव्या इति सूत्रसम्मतम् । सम्प्रदायस्तु त्रय एवाधीयन्ते तत्तत्सूत्राध्यायिन । आश्वलायनसूत्राध्यायिना तु त्रय एव । सत्याषाढसूत्राध्यायिना विकल्प । कातीयैस्तु स्वसूत्रानुसारम् पञ्चाग्नय आधीयन्त एव । तत्सूत्र तु ‘ सभ्य च निर्मथ्य ’ ४ । २ । २० कात्यायनसूत्रे

यत्तस्मिन्विषय आपस्तम्बसूत्रे ५ । १७ । १ ततः सभ्यावसथ्याविन्यत्र रुद्रदत्तोऽब्रवीत् ' तस्माद्विकल्पो युक्त इति । तदुक्तसूत्रविरोधात्सुधीभिश्चिन्त्यम् । वयं त्वत्र ब्रूमहे— सभ्यावसथ्ययोः संकल्पो वानुष्ठेय इत्याद्यपक्षः । अन्यदपि तैत्तिरीयब्राह्मणे द्वौ पक्षौ श्रुतौ । त्रेताधानपक्षः पञ्चाधानपक्षः । तत्र पञ्चाधानपक्षमेव भगवानापस्तम्बः सूत्रयामास । अतो विद्यारण्या अपि तैत्तिरीयब्राह्मणभाष्ये पक्षद्वयं बभाषिरे । वस्तुतस्तु त्रेताधानमित्यस्यायमभिप्रायः । गार्हपत्यादेवान्यत्र दक्षिणाग्न्याहवनीययो. इति । पञ्चाधानपक्षस्तु श्रौतोऽत एव अजस्रेत्यादिना सभ्यावसथ्याभिमन्त्रणमुक्तम् । सम्राडित्यादिना उपस्थानं श्रुतम् । सूत्रकारोऽप्यसूसुचत् । तस्मात्पञ्चाधानपक्षावलम्बनं युक्तमिति प्रयुञ्ज्महे । अन्यच्च विधिस्वरूपादर्थवादवाक्याद्गार्हपत्यादेव दक्षिणाग्निराधीयते । न च सूत्रोक्तपक्षमङ्गीकृत्य लौकिकाग्निराधीयते । न वा निर्मथ्य । तत्रापि श्रुतिसूत्रपक्ष एव इति विद्वदधिगतम् । ये तु यथार्थमासासूत्रमनुतिष्ठन्ति न तान्प्रति कश्चन विवादः । अन्यदपि यथाब्राह्मणमनुष्ठातुं युक्तं स्यात्तर्हि कुतः सूत्रे णि यथाब्राह्मणक्रममनुष्ठानं न सूत्रकारो वष्टि । अत एवानुष्ठानाय प्रयोगशास्त्रापरनामधेयस्य स्वतन्त्रसूत्रस्य यथार्थमासमुपयोग इति प्रतिजानीमहे। ब्राह्मणविस्तारार्थं शाखान्तरगुणोपसंहाराय कल्प आरब्ध आचार्येणेति वास्तवम् । अत्र विदानीं पूर्णाहुत्यन्तमेवाधानप्रयोगोऽलेखि । सूत्राणि तु इष्ट्यन्तानि । इष्टिप्रयोगादिलेखनं तु प्रकृतिभूतदर्शपूर्णमाससूत्रप्रयोगादिलेखनं विनानर्हमिति मत्वा पूर्णाहुत्यन्तमाधानमिति आश्वलायनसूत्रात्तानेवात्र प्रयोगः संगृहीत इत्यनवद्यम् । रामाण्डारप्रभृतयोऽपि पूर्णाहुत्यन्तमिष्ट्यन्तमाधानं चेति । इष्ट्यन्तमेवाधानमिति नारायणपार्थसारथिमिश्रप्रभृतयः प्रतिपन्ना इति । तत्रेष्ट्यन्तमेवाधानमिति मीमांसकमतमनुसृत्यास्माकमपि मतम् ।

संप्रार्थ्यन्ते विद्वांसः करुणावरुणालयाः यन्मया लिखितं मितंपचमतिना तत्रावश्यमेव दोषाः संभवेयुस्तान्यथावसरं ज्ञापयित्वानुग्रहभाजनमात्मानं कर्तुमीहे श्रीमद्भ्यस्तत्रभवद्भ्यः । अयमाधानप्रयोगः श्रौतस्मार्तसूत्रनदीष्णैः प्रमाणशास्त्रप्रवणमतिभिः किंजवडेकरश्रीवामनशास्त्रिभिस्तत्सूत्रपर्यालोचनया सूत्रं तदनुसारिप्रयोगः मन्त्रमात्रसूत्रविषयिणी मीमांसा चेति प्रक्रमेणागमध्यत । मन्येऽहमेतेनानेन ग्रन्थेन आधानशास्त्रदिदृक्षवोऽल्पेनैवायासेन कृतकार्या भविष्यन्ति । सूत्रादिबहुग्रन्थप्रामाणिकं ज्ञानमधिगमिष्यन्तीति तमेतमाशासे सफलयेयुः सज्जना इति विस्तरस्य विरमति ।

विद्वद्वशंवदः पाठकोपाह्वश्रीधरशर्मा.

अयि श्रूयमाणा महामहिमशालिनः पण्डितवरेण्याः पारिनिष्ठितमतयो महदिदं प्रमोदास्पदं यन्मया निवेदनीयम्। अत्र किञ्चित्पुण्यपत्तने अचिरादेव प्रवर्तितो ' मीमांसामहाविद्यालय, ' सज्जनधुरीणैः रा. ब. कुडकमारदेवाकरैः श्रीकृष्णाग्रजगणेशशर्मभिः राजमन्त्रिभिः । तत्र स पुण्यपत्तननिवासिभिर्बहुभिर्महोदयैर्मिलित्वा प्रावर्धि भारतभाग्यो-

द्यात् । तदीयाध्यापकेन मया यथामति सर्वोपकाराय विद्यालयोद्देशकार्यनिर्वाहाय च प्रथितोऽयं ग्रन्थः । यद्विषयकं प्रास्ताविकं दक्षिणमहाविद्यालय (डेक्कनकॉलेजस्थ) सर्वविद्याविशारदैः पाठककुलावतंसैः वेदशास्त्रोदधिपारंगतैः श्रीधरशर्मभिर्लिखितमेव । अतोऽत्र पुनस्तद्विषये लिखितुं न प्रयतामहे । अस्य ग्रन्थस्य ग्रथने एतद्विद्यालयस्थप्रयोगशास्त्राध्यापकैः सर्वयाज्ञिकसूत्रपारंगतैर्वेदार्थविद्भिः सोमादिचयनान्तरेषु असकृदनुष्ठिताध्वर्यवादिभिर्महदेव साहाय्यमनुष्ठितम् । मन्ये यदन्तरेण नैवान्तमयास्यदयं ग्रन्थः । यदत्र ग्रन्थे स्खलनमनवधानादज्ञानाज्ज्ञानपरिपाकाभावाच्चसुधीभिर्यथावसरं ज्ञापयित्वानुग्रहीतव्योऽयं जनः । विशेषतो याज्ञिकप्रवरैः श्रौतिप्रवरैरयं सूक्ष्ममति कृत्वा आलोचनीय इत्यभ्यर्थ्य विरमामि । आशासे च सर्वविद्यानामीशानाच्छ्रीनिरूपाक्षकमलेश्वरकृपाकटाक्षादियं संस्था चिरंजीविनी भूयात् । प्रवर्तयेच्च विदुषो भूयोभूयः श्रौतमार्गानुसारिप्रबन्धनिर्माणे । इतिशम् ।

वामनशर्मा

पुण्यपत्तनस्थमीमांसामहाविद्यालयाध्यापकः

ॐ तत्सद्ब्रह्मणे नमः ।

आपस्तम्बीयश्रौताधानसूत्रम् ।

अग्न्याधेयं व्याख्यास्यामः ॥ १ ॥ यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा । तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति शमीगर्भस्याश्वत्थस्यारणी आहरति ॥ २ ॥ अपि शमीगर्भस्येति वाजसनेयकम् ॥ ३ ॥ अश्वत्थाद्धव्यवाहाद्धि जातामग्नेस्तनूं यज्ञियाꣳ संभरामि । शान्तयोनिꣳ शमीगर्भमग्नये प्रजनयितवे । आयुर्मयि धेह्यायुर्यजमान इत्यरणी अभिमन्त्र्य सप्त पार्थिवान्संभारानाहरति । एवं वानस्पत्यान् । पञ्च पञ्च वा ॥ ४ ॥ भूयसो वा पार्थिवान् ॥ ५ ॥ न संभारान्संभरेदिति वाजसनेयकम् ॥ ६ ॥ वैश्वानरस्य रूपं पृथिव्यां परिस्रसा । स्योनमाविशन्तु न इति सिकताः । यदिदं दिवो यददः पृथिव्याः संजज्ञाने रोदसी संबभूवतुः । ऊषान्कृष्णमवतु कृष्णमूषा इहोभयोर्यज्ञियमागमिष्ठा इत्यूषान् । ऊतीः कुर्वाणो यत्पृथिवीमचरो गुहाकारमाखुरूपं प्रतीत्य । तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीरा इत्याखुकरीषम् । ऊर्जं पृथिव्या रसमाभरन्तः शतं जीवेम शरदः पुरूचीः । वम्रीभिरनुवित्तं गुहासु श्रोत्रं त उर्व्यबधिरा भवाम इति वल्मीकवपाम् । प्रजापतिसृष्टानां प्रजानां क्षुधोऽपहत्यै सुवितं नो अस्तु । उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामीति सूदम् । यस्य रूपं बिभ्रदिमामविन्दद्गुहा प्रविष्टाꣳ सरिरस्य मध्ये । तस्येदं विहतमाभरन्तोऽच्छम्बट्कारमस्यां विधेमेति वराहविहतम् ॥ ७ ॥

इति प्रथमा कण्डिका ।

याभिरदꣳहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भर्त्रीम् । ता नः शिवाः शर्कराः सन्तु सर्वा इति शर्कराः । अग्ने रेतश्चन्द्रꣳ हिरण्यमद्भ्यः संभूतममृतं प्रजासु । तत्संभरन्नुत्तरतो निधायातिप्रयच्छन्दुरिति तरेयमिति हिरण्यम् ॥ १ ॥ इति पार्थिवाः ॥ २ ॥ यदि पञ्चौदुम्बराणि लोहशकलानि पञ्चमो भवति ॥ ३ ॥ अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः संवत्सरं देवेभ्यो निलाय । तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीरा इत्यश्वत्थम् । ऊर्जः पृथिव्या अध्युत्थितोऽसि वनस्पते शतवल्शो विरोह । त्वया वयमिषमूर्जं मदन्तो रायस्पोषेण समिषा मदेमेत्युदुम्बरम् । गायत्रिया ह्रियमाणस्य यत्ते पर्णमपतत्तृतीयस्यै दिवोऽधि । सोऽयं पर्णः सोमपर्णाद्धि जातस्ततो हरामि सोमपीथस्यावरुध्यै । देवानां ब्रह्मवादं वदतां यदुपाशृणोः सुश्रवा वै श्रुतोऽसि । ततो मामाविशतु ब्रह्मवर्चसं तत्संभरꣳस्तदवरुन्धीय साक्षादित्येताभ्यां पर्णम् । यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः ।

तामिमामपदाहाय शमीᳪ शान्त्यै हराम्यहमिति शमीम् । यत्ते सृष्टस्य यतो विकङ्कतं भा आर्छज्जातवेदः । तया भासा संमित उरुं नो लोकमनुप्रभाहीति वैकङ्कतम् । यत्ते तान्तस्य हृदयमाच्छिन्दञ्जातवेदो मरुतोऽद्भिस्तमयित्वा । एतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेहेत्यशनिहतस्य वृक्षस्य । यत्पर्णपदश्वत्थरिरस्य मध्य उर्वीमपश्यज्जगतः प्रतिष्ठाम् । तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनᳪ हरामीति पुष्करपर्णम् । इति वानस्पत्याः ॥ ४ ॥

इति द्वितीया कण्डिका ।

ये त्वा समभरं जातवेदो यथाशरीरं भूतेषु न्यक्तम् । स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वानिति संभृत्य निदधाति ॥ १ ॥ अथ नक्षत्राणि ॥ २ ॥ कृत्तिकासु ब्राह्मण आदधीत मुख्यो ब्रह्मवर्चसी भवति ॥ ३ ॥ गृहास्तस्याग्निदाहुको भवति ॥ ४ ॥ रोहिण्यामाधाय सर्वान्रोहान्रोहति ॥ ५ ॥ मृगशीर्षे ब्रह्मवर्चसकामो यज्ञकामो वा ॥ ६ ॥ यः पुरा भद्रः सन्पापीयान्स्यात्पुनर्वस्वोः ॥ ७ ॥ पूर्वयोः फल्गुन्योर्यः कामयेत दानकामा मे प्रजाः स्युरिति ॥ ८ ॥ उत्तरयोर्यः कामयेत भग्यन्नादः स्यामिति ॥ ९ ॥ एतदेवैके विपरीतम् ॥ १० ॥ अथापरम् । पूर्वयोराधाय पापीयान्भवत्युत्तरयोर्वसीयान् ॥ ११ ॥ हस्ते यः कामयेत प्र मे दीयेतेति ॥ १२ ॥ चित्रायां राजन्यो भ्रातृव्यवान्वा ॥ १३ ॥ विशाखयोः प्रजाकामोऽनुराधेष्वृद्धिकामः श्रवणे पुष्टिकाम उत्तरेषु प्रोष्ठपदेषु प्रतिष्ठाकामः ॥ १४ ॥ सर्वाणि नित्यवदके समामनन्ति ॥ १५ ॥ फल्गुनीपूर्णमास आदधीतेत्युक्त्वाह यत्फल्गुनीपूर्णमास आदध्यात्संवत्सरस्यैनमासन्दध्याद्-द्व्यहे पुरैकाहे वा ॥ १६ ॥ अमावास्यायां पौर्णमास्यां वाधेयः ॥ १७ ॥ वसन्तो ब्राह्मणस्य ग्रीष्मो राजन्यस्य हेमन्तो वा शरद्वैश्यस्य वर्षा रथकारस्य ॥ १८ ॥ ये त्रयाणां वर्णानामेतत्कर्म कुर्युस्तेषामेष कालः ॥ १९ ॥ शिशिरः सार्ववर्णिकः ॥ २० ॥ सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रम् ॥ २१ ॥ उदवसाय शालीन आदधीतानुदवसाय यायावरः ॥ २२ ॥ एकाहे वा प्रयायात् ॥ २३ ॥

इति तृतीया कण्डिका ।

उद्धन्यमानमस्या अमेध्यमप पाप्मानं यजमानस्य हन्तु । शिवा नः सन्तु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसातेति प्राचीनप्रवणं देवयजनमुद्धत्य शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु न इत्यद्भिरवोक्ष्य तस्मिन्नुदीचीनवंशं शरणं करोति ॥ १ ॥ तस्याग्रेण मध्यमं वंशं गार्हपत्यायतनं भवति ॥ २ ॥ तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनम् । एकादशसु राजन्यस्य । द्वादशसु वैश्यस्य ॥ ३ ॥ चतुर्विंशत्यासपरिमिते यावता वा चक्षुषा मन्यते तस्मान्नातिदूरमाधेय इति सर्वेषामविशेषेण श्रूयते

॥ ४ ॥ दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनम् ॥ ५ ॥ अन्यदाहनीयागारमन्यद्गार्हपत्यस्य ॥ ६ ॥ अग्रेणाहवनीय सभाया सभ्यः ॥ ७ ॥ तं पूर्वेणावसथ आवसथ्यः ॥ ८ ॥ केशश्मश्रु वपते नखानि निकृन्तते स्नाति । एवं पत्नी केशवर्जम् ॥ ९ ॥ क्षौमे वसानौ जायापती अग्निमादधीयाताम् ॥ १० ॥ ते दक्षिणाकालेऽध्वर्यवे दत्तः ॥ ११ ॥ अपराह्णेऽधिवृक्षसूर्ये वौपासनादग्निमाहृत्यापरेण गार्हपत्यायतनं ब्राह्मौदनिकमादधाति ॥ १२ ॥ औपासन वा सर्वम् ॥ १३ ॥ निर्मथ्यं वा ॥ १४ ॥ यदि सर्वमौपासनमाहरेदपूप यवमय व्रीहिमयं चौदुम्बरपर्णाभ्या सगृह्याय-तन उपास्येद्यवमयं पश्चाद्व्रीहिमय पुरस्तात्तस्मिन्नादध्यात् ॥ १५ ॥ सर्वमप्यौपासनमाहर-न्नापूपावुपास्येदित्यपरम् ॥ १६ ॥

इति चतुर्थी कण्डिका ।

इति प्रथमः पटलः ।

अपरेण ब्राह्मौदनिक लोहिते चर्मण्यानडुहे प्राचीनग्रीव उत्तरलोम्नि पात्रके वा निशाय ब्रह्मौदनं चतुःशरावं निर्वपति ॥ १ ॥ देवस्य त्वेत्यनुद्रुत्य ब्रह्मणे प्राणाय जुष्टं निर्व-पामीति प्रथममपानायेति द्वितीय व्यानायेति तृतीय ब्रह्मणे जुष्टमिति चतुर्थम् ॥ २ ॥ तूष्णीं वा सर्वाणि ॥ ३ ॥ चतुर्षूदपात्रेषु पचति ॥ ४ ॥ न प्रक्षालयति न प्रस्रावयति ॥ ५ ॥ क्षीरे भवतीत्येके ॥ ६ ॥ जीवतण्डुलमिव श्रपयतीति विज्ञायते ॥ ७ ॥ दर्व्या ब्रह्मौदनादुद्धृत्य प्र वेधसे कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । यतो भयमभयं तन्नो अस्त्वव देवान्यजेहेड्यानिति जुहोत्यभि वा मन्त्रयते ॥ ८ ॥ चतुर्धा ब्रह्मौदन व्युद्धृत्य प्रभूतेन सर्पिषोपसिच्य कर्त्वनुद्रेक्ष्य चतुर्भ्य आर्षेयेभ्य ऋत्विग्भ्य उपोहति ॥ ९ ॥ अपाचा प्रथमे पिण्डा भवन्त्यप्रतिहता पाणयः । अथ ब्रह्मौदनशेष सङ्कृष्य तस्मिन्नाज्यशेषमानीय तस्मिंश्चित्रियस्याश्वत्थस्य तिस्रः समिध आर्द्राः सपलाशाः प्रादेश-मात्र्यः स्तिभिगवत्यो विवर्तयति ॥ १० ॥

इति पञ्चमी कण्डिका ।

चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसंस्कृताः स्थ । प्रजापतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्या इति ॥ १ ॥ अथादधाति घृतवतीभिराग्नेयीभिर्गा-यत्रीभिर्ब्राह्मणस्य त्रिष्टुभी राजन्यस्य जगतीभिर्वैश्यस्य ॥ २ ॥ समिधाऽग्निं दुवस्यत । सेपा । उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम । तं त्वा समिद्भिर-ङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्येति ब्राह्मणस्य । समिध्यमान प्रथमो नु धर्मं

समक्तुभिरज्यते विश्ववारः । शोचिष्केशो घृतनिर्णिक्पावकः सुयज्ञो अग्निर्यजथाय देवान् । घृतप्रतीको घृतयोनिरग्निर्घृतैः समिद्धो घृतमस्यान्नम् । घृतप्रुषस्त्वा सरितो वहन्ति घृतं पिबन्सुयजा यक्षि देवान् । आयुर्दा अग्न इति राजन्यस्य । त्वामग्ने समिधानं यविष्ठ देवा दूतं चक्रिरे हव्यवाहम् । उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्वति । त्वामग्ने प्रदिव आहुतं घृतेन सुम्नाय वः सुषमिधा समीधिरे । स वावृधान ओषधीभिरुक्षित उरु ज्रयांसि पार्थिवा वितिष्ठसे । घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते । इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियमिति वैश्यस्य ॥ ३ ॥

इति षष्ठी कण्डिका ।

समित्सु तिस्रो वत्सतरीर्ददाति ॥ १ ॥ प्राश्नन्ति ब्राह्मणा ओदनम् ॥ २ ॥ प्राशितवद्भ्यः समानं वरं ददाति ॥ ३ ॥ यस्मिन्नक्षत्रेऽग्निमाधास्यन्स्यात्तस्मिन्संवत्सरे पुरस्तादेताः समिध आदध्याद्द्वादशाहे त्र्यहे त्र्यह एकाहे वा ॥ ४ ॥ आधेयास्त्वेवाग्निमादधानेन ॥५॥ अथ व्रतं चरति न मांसमश्नाति न स्त्रियमुपैति नास्याग्निं गृहाद्धरन्ति नान्यत आहरन्ति ॥ ६ ॥ ब्राह्मौदनिकेन संवत्सरमासीत ॥ ७ ॥ औपासनवेदाहित एतस्मिन्नस्याग्निकर्माणि क्रियन्ते ॥ ८ ॥ न प्रयायात् ॥ ९ ॥ नानुगच्छेत् ॥ १० ॥ यदि प्रयायादनु वा गच्छेद्ब्रह्मौदनं पक्त्वैतयैवावृता समिध आदध्यात् ॥ ११ ॥ यद्येनं संवत्सरेऽन्याधेयं नोपनमेद्ब्रह्मौदनं पक्त्वा समिध आधाय यदैनमुपनमेदथादधीत ॥ १२ ॥ तस्य याथाकामी भरणकल्पानाम् ॥ १३ ॥ द्वादशाहं चैदेकाहं वा ॥ १४ ॥ श्व आधास्यमानः पुनर्ब्रह्मौदनं पचति ॥ १५ ॥ योऽस्याग्निमाधास्यन्स्यात्स एतां रात्रिं व्रतं चरति न मांसमश्नाति न स्त्रियमुपैति ॥ १६ ॥ प्रजा अग्ने संवासयाशाश्च पशुभिः सह । राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सव इत्युत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नाति ॥ १७ ॥

इति सप्तमी कण्डिका ।

अथ यजमानो व्रतमुपैति वाचं च यच्छत्यनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमि दैवीं वाचं यच्छामीति ॥ १ ॥ वीणातूणवेनैनमेतां रात्रिं जागरयन्ति ॥ २ ॥ अपि वा न जागर्ति न वाचं यच्छति ॥ ३ ॥ शल्कैरेतां रात्रिमेतमग्निमिन्धान आस्ते शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् । उभयोर्लोकयोर्ऋद्ध्वाति मृत्युं तराम्यहमित्येतया ॥ ४॥ तस्मिन्नुत्स्युपमर्णी निष्टपति जातवेदो भुवनस्य रेत इह सिञ्च तपसो यज्जनिष्यते । अग्निमश्वत्थादधि हव्यवाहं शमीगर्भाज्जनयन्यो मयोभुः ॥ अयं ते योनिर्ऋत्विय इत्येताभ्याम् ॥ ५ ॥ अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्य इत्यरणी अभिमन्त्र्य मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणाम् । अन्तर्वत्नी

जन्यं जातवेदसमध्वराणा जनयथः पुरोगामित्यरणी आह्रियमाणे यजमानः प्रतीक्षते ॥ ६ ॥ घोषा च ते दुग्धमुखौ च वीरौ ते ते भागधेयं प्रयच्छामीति यजमानाय प्रयच्छति ॥ ७ ॥ आरोहतं दशतꣳ शक्वरीर्ममर्तेनाग्न आयुषा वर्चसा सह । ज्योग्जीवन्त उत्तरामुत्तराꣳ समां दर्शमहं पूर्णमासं यज्ञं यथा यजा इति प्रतिगृह्णात्यृत्वियवती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे । तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथः ॥ ते मत्प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः । प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोक इति प्रतिगृह्याभिमन्त्रयते यजमानः ॥ ८ ॥

॥ इत्यष्टमी कण्डिका ॥

इति द्वितीयः पटलः ॥ २ ॥

मयि गृह्णाम्यग्रे अग्निं यो नो अग्निः पितर इत्युभौ जपतः । अपेत वीतेति गार्हपत्यायतनमुद्धत्य शं नो देवीरभिष्टय इत्यद्भिरवोक्षति ॥ १ ॥ एवं दक्षिणाग्नेराहवनीयस्य सभ्यावसथ्ययोश्च ॥ २ ॥ एवमनुपूर्वाण्येवैतत ऊर्ध्वं कर्माणि क्रियन्ते ॥ ३ ॥ सिकतानामर्धं द्वैधं विभज्यार्धं गार्हपत्यायतने निवपत्यर्धं दक्षिणाग्नेः । अर्धं त्रेधं विभज्य पूर्वेषु ॥ ४ ॥ एतेनैव कल्पेन सर्वान्पार्थिवान्निवपति ॥ ५ ॥ अग्नेर्भस्मासीति सिकता निवपति संज्ञानमित्यूषान् ॥ ६ ॥ तान्निवपन्यददश्चन्द्रमसि कृष्णं तदिहास्त्विति मनसा ध्यायति ॥ ७ ॥ उदेयाग्ने अधि मातुः पृथिव्या विश आविश महतः सधस्थात् । आखुं त्वा ये दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपामित्याखुकरीषम् । यत्पृथिव्या अनामृतꣳ संबभूव त्वे सचा । तदग्निरग्नयेऽददात्तस्मिन्नाधीयतामयमिति गार्हपत्यायतने वल्मीकवपां निवपति ॥ ८ ॥ यदन्तरिक्षस्येति दक्षिणाग्ने. । यदिव इति पूर्वेषु ॥ ९ ॥ उत्समुद्रान्मधुमाꣳ ऊर्मिरागात्साम्राज्याय प्रतरां दधानः । अमी च ये मघवानो वयं चेषमूर्जं मधुमत्संभरेमेति सूदम् । इयत्यग्र आसीरिति वराहविहतम् ॥ १० ॥ अदो देवी प्रथमाना पृथग्यद्देवैर्न्युप्ता व्यसर्पो महित्वा । अदः रुहयाः शर्कराभिस्त्रिविष्टप्यजयो लोकान्प्रदिशश्चतस्र इति शर्कराः । द्वेष्यं च मनसा ध्यायति ॥ ११ ॥

॥ इति नवमी कण्डिका ॥

ऊर्जꣳ स्तृणामि पुरीषं पृथिव्यामृतेऽध्यग्निमादधे सत्येऽध्यग्निमादध इत्यायतनेषु संभारान्व्यूहति ॥ १ ॥ सं या वः प्रियास्तनुव इत्येषा ॥ सं वः सृजामि हृदयानि सꣳसृष्टं मनो अस्तु व । सꣳसृष्टः प्राणो अस्तु व इति व्यूहत्यान्संमृज्य निकायाग्निरपतीनः प्रथमं जज्ञे अग्निरित्येतया ॥ २ ॥ यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि याः

पृथिव्याम्। ताभिः संभृत्य सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्न इति गार्हपत्यायतने सौवर्णं हिरण्यशकलमुत्तरतः संभारेषूपास्यति ॥ ३ ॥ चन्द्रमग्निं चन्द्ररथं हरित्वचं वैश्वानरमप्सुषदं सुवर्विदम्। विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुरित्युपास्तमभिमन्त्रयते। द्वेष्याय रजतं प्रयच्छति ॥ ४ ॥ यदि द्वेष्यं नाधिगच्छेद्यां दिशं द्वेष्यः स्यात्तेन निरस्येत् ॥ ५ ॥ एवं सर्वेषूपास्य करोति ॥ ६ ॥ ब्रह्मौदनिकाद्भस्मापोह्य तस्मिञ्छमीगर्भादग्निं मन्थति ॥ ७ ॥ उषसु रश्मिषु दक्षिणोत्तरणी समवदधाति ॥ ८ ॥ सहाग्नेऽग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया सह पशुभिः सह ब्रह्मवर्चसेनेत्युपतिष्ठपधेऽग्निं मन्थति ॥ ९ ॥ श्वेतोऽश्वोऽविच्छिन्नाक्षो भवति रोहितो वासितजानुरपि वा य एव कश्चिदाण्डः ॥ १० ॥ मथ्यमाने शक्तेः साहतेः साम गायति। धूमे जाते गाथिनः कौशिकस्य। अरण्योर्निहितो जातवेदा इति च ॥ ११ ॥ उपावरोह जातवेद इति निर्वर्त्यमानमभिमन्त्रयते ॥ १२ ॥

इति दशमी कण्डिका।

स्वदितं तोकाय तनयाय पितुं पच ॥ अर्कोथक्षुरस्तदसौ सूर्यस्तदयमग्निः संप्रियः पशुभिर्भुवत् । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्र ज्योतिरजस्रं तेन मे दीदिहि तेन त्वादधेऽग्निनाग्ने ब्रह्मणेति घर्मशिरासि ॥ १ ॥ यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः । ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ प्राणं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै । दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूनां तेजसा सर्वपशुमादधे ॥ अग्ने गृहपतेऽद्दे बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय । पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके । यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामीति संभारेषु निदधाति ॥ २ ॥ सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत् । अग्ने सपत्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहीत्यार्यायमानमभिमन्त्रयते यजमानो घर्मशिरासि चैनमभ्यर्युर्वाचयति ॥ ३ ॥

इति द्वादशी कण्डिका ।

इति तृतीयः पटलः ।

अर्धोदिते सूर्ये आहवनीयमादधाति ॥ १ ॥ उदिते ब्रह्मवर्चसकामस्य ॥ २ ॥ गार्हपत्ये प्रणयनीयमाश्वत्थमिध्ममादीपयति सिकताश्चोपयमनीः कल्पयते ॥ ३ ॥ तमुद्यच्छेत्तोजसे बलाय त्वोद्यच्छे वृषणे शुष्मायायुषे वर्चसे । सपत्नतूरसि वृत्रतू. ॥ यस्ते देवेषु महिमा सुवर्गो यस्त आत्मा पशुषु प्रविष्टः । पुष्टिर्या ते मनुष्येषु पप्रथे तया नो अग्ने जुषमाण एहि । दिवः पृथिव्याः पर्यन्तरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः । यत्र यत्र जातवेदः संबभूथ ततो नो अग्ने जुषमाण एहि । उदु त्वा विश्वे देवा इत्येताभिश्चतसृभिः ॥ ४ ॥ उपरीवाग्निमुद्यच्छति ॥ ५ ॥ उयतमुपयत धारयति ॥ ६ ॥ अथाश्वस्य दक्षिणे कर्णे यजमानमग्नितनूर्वाचयति या वाजिन्नग्नेः पशुषु पवमाना प्रिया तनूस्तामावह या वाजिन्नग्नेरप्सु पावका प्रिया तनूस्तामावह या वाजिन्नग्नेः सूर्ये शुचिः प्रिया तनूस्तामावहेति । धारयत्येवाग्निम् ॥ ७ ॥ अथाग्नीध्रो लौकिकमग्निमाहृत्य मथित्वा वोर्धज्ञुरासीनो दक्षिणमग्निमादधाति यज्ञायज्ञीये गीयमाने यथर्ष्याधानेन द्वितीयया व्याहृत्या तिसृभिः सर्पराज्ञीभिर्द्वितीयेन च घर्मशिरसा ॥ यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः । ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने । व्यानं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै । दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूनां तेजसा सर्वपशुमादधे ॥ अग्नेऽन्नपा मयोभुव सुशेव दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय । पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके । यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामीति संभारेषु निदधाति ॥ ८ ॥

इति त्रयोदशी कण्डिका ।

यो ब्राह्मणो राजन्यो वैश्य. शूद्रो वासुर इव बहुपुष्टः स्यात्तस्य गृहादाहृत्यादध्यात्पुष्टिकामस्य ॥ १ ॥ गृहे त्वस्य ततो नाश्नीयात् ॥ २ ॥ अम्बरीषादन्नकामस्य वृक्षाग्राज्ज्वलतो ब्रह्मवर्चसकामस्य ॥ ३ ॥ वामदेव्यमभिगायत आहवनीय उद्ध्रियमाणे ॥ ४ ॥ प्राचीमनुप्रदिशमित्येषा ॥ विक्रमस्व महाꣳ असि वेदिषन्मानुषेभ्य. । त्रिषु लोकेषु जागृहि प्रजया च धनेन च ॥ इमा उ मामुपतिष्ठन्तु राय आभि. प्रजाभिरिह संवसेय । इहो इडा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेद इति प्राञ्चोऽश्वप्रथमा अभिप्रव्रजन्ति ॥ ५ ॥ दक्षिणतो ब्रह्मा रथं रथचक्रं वा वर्तयति यानचक्रं त्रिः परिवर्तते ॥ ६ ॥ पद्कारो द्वेष्यस्य ॥ ७ ॥ जानुदघ्ने धारयमाणस्तृतीयमध्वनोऽग्निं हराति नाभिदघ्ने तृतीयमास्यदघ्ने तृतीयम् । न कर्णदघ्नमत्युद्गृह्णाति ॥ ८ ॥ यद्युद्गृह्य निगृह्णीयान्मुखेन समायादध्यात् ॥ ९ ॥ नाग्निमादित्यं च व्यवेयात् ॥ १० ॥ दक्षिणतः परिगृह्य हरति ॥ ११ ॥ अर्धाध्वे यजमानो वरं ददाति ॥ १२ ॥ अर्धाध्वे हिरण्यं निधाय नाकोऽसि ब्रध्नः प्रतिष्ठा संक्रमण इत्यतिक्रामति ॥ १३ ॥ प्राञ्चमश्वमभ्यस्थाद्विश्वा इति दक्षिणेन पदोत्तरत· सम्भारानाक्रमयति यथाहितस्याग्नेरङ्गाराः पदमभ्यववर्तेरन्निति ॥ १४ ॥ प्रदक्षिणमावर्तयित्वा यदक्रन्द इति पुनरेवाक्रमयति ॥ १५ ॥ पुरस्तात्प्रत्यञ्चमश्वं धारयति ॥ १६ ॥ पूर्ववाडश्वो भवति ॥ १७ ॥ तदभावेऽनड्वान्पूर्ववाडेतानि कर्माणि करोतीति पैङ्गायनिब्राह्मण भवति ॥ १८ ॥

॥ इति चतुर्दशी कण्डिका ॥

कमण्डलुपद आदधीतेति बह्वृचब्राह्मणम् । अजस्य पद आदधीतेति वाजसनेयकम् ॥ १ ॥ अथ यजमान. शिवा जपति ये ते अग्ने शिवे तनुवौ विराट् च स्वराट् च ते मा विशता ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ सम्राट् चाभिभूश्च ते मा विशता त मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते मा विशता ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते मा विशता ते मा जिन्वताम् । यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वादध इति ॥ २ ॥ यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छेति यजमानो द्वेष्याय प्रहिणोति ताभिरेनं पराभावयति ॥ ३ ॥ अरण्येऽनुवाक्या भवन्ति ॥ ४ ॥ यदिदं दिवो यदद पृथिव्या संविदाने रोदसी संबभूवतुः । तयो. पृष्ठे सीदतु जातवेदा शंभूः प्रजाभ्यस्तनुवे स्योन इत्यभिमन्त्र्य पुरस्तात्प्रत्यङ् तिष्ठन्नाहवनीयमादधाति ॥ ५ ॥ बृहति गीयमाने श्यैतवारवन्तीययोर्यज्ञायज्ञीये च यथर्ष्याधानेन सर्वाभिर्व्याहृतीभि सर्वाभिः सर्पराज्ञीभिस्तृतीयेन च घर्मशिरसा यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः । ताभिः सम्भूय सगण सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ अपान त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तार गुप्त्यै । दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूना तेजसा सर्वपशुमादधे ॥ अग्ने सम्राडजैकपादाहवनीय दिवः पृथिव्याः पर्यन्तरिक्षाल्लोक विन्द यज·

मानाय । पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके । यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाऽभिनिदधामीति संभारेषु निदधाति ॥ ६ ॥

इति पञ्चदशी कण्डिका ।

आनशे व्यानशे सर्वमायुर्व्यानशे । अहं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेद इत्याधीयमानमभिमन्त्रयते यजमानः ॥ १ ॥ व्याहृतीः सर्पराज्ञीर्घर्मशिरांसीति सर्वेष्वाधानेषु यजमानोऽनुवर्तयते येन येनादधाति ॥२॥ नाहितमनभिहुतमग्निमुपस्पृशति । आग्येनौषधीभिश्च शमयितव्यः ॥ ३ ॥ या ते अग्ने पशुषु पवमाना प्रिया तनूर्या पृथिव्यां याऽग्नौ या रथन्तरे या गायत्रे छन्दसि तां त एतेनावयजे स्वाहा । या ते अग्नेऽप्सु पावका प्रिया तनूर्याऽन्तरिक्षे या वायौ या वामदेव्ये या त्रैष्टुभे छन्दसि तां त एतेनावयजे स्वाहा । या ते अग्ने सूर्ये शुचिः प्रिया तनूर्या दिवि यादित्ये या बृहति या जागते छन्दसि तां त एतेनावयजे स्वाहेत्येतैः प्रतिमन्त्रमाज्यमोपधीश्च जुहोति ॥ ४ ॥ समिध आदधातीत्येके ॥ ५॥ ब्रह्माग्न्याधेये सामानि गायति ॥६॥ प्रतिषिद्धान्येकेषाम् ॥ ७ ॥ व्याहृतीभिरेवोद्गीथं भवतीति वाजसनेयकम् ॥ ८ ॥

इति षोडशी कण्डिका ।

इति चतुर्थः पटलः ॥ ४ ॥

ततः सभ्यावसथ्यावादधाति लौकिकमग्निमाहृत्य मथित्वाऽऽहवनीयाद्वा यथर्ष्याधानेन॥१॥ अग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः । अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयमिति तिस्र आश्वत्थ्यः समिध एकैकस्मिन्नादधाति ॥ २ ॥ आहवनीये वा तिस्रः ॥ ३ ॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेशेति शमीमय्यो घृताभ्यक्तास्तिसृभिस्तिस्र एकैकस्मिन्नादधाति । आहवनीये वा तिस्रः ॥ ४ ॥ एवं नानावृक्षीयाः । प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीं समिधमादधाति । विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीम् । ताँ सवितुर्वरेण्यस्य चित्रामिति शमीमयीम् ॥ ५ ॥ ततस्तूष्णीमग्निहोत्रं जुहोति ॥ ६ ॥ अपि वा द्वादशगृहीतेन स्रुचं पूरयित्वा प्रजापतिं मनसा ध्यायञ्जुहोति । साऽग्निहोत्रस्य स्थाने भवति ॥ ७ ॥ यास्ते अग्ने घोरास्तनु-

वस्ताभिरमुं गच्छेति यजमानो द्वेष्याय प्रहिणोति ताभिरेनं नितमयति । अरण्येऽनुवाक्या भवन्ति ॥ ८ ॥

इति सप्तदशी कण्डिका ।

द्वादशगृहीतेन स्रुचं पूरयित्वा सप्त ते अग्ने समिधः सप्त जिह्वा इति सप्तवत्या पूर्णाहुतिं जुहोति । हुतायां यजमानो वरं दत्त्वा शिवा जपति । ये अग्नयो दिवो ये पृथिव्याः समागच्छन्तीषमूर्जं दुहाना. । ते अस्मा अग्नयो द्रविणं दत्त्वेह्यः प्रीता आहुतिभाजो भूत्वा यथालोकं पुनरस्तं परेत स्वाहेति जुहोति ॥ १ ॥ अथ विराट्क्रमैर्यजमान उपतिष्ठतेऽथर्वपितुं मे गोपायान्नं प्राणेन संमितम् । त्वया गुप्ता इषमूर्जं मदन्तो रायस्पोषेण समिषा मदो मेत्यन्वाहार्यपचनम् ।। नर्यं प्रजां मे गोपाय मूलं लोकस्य संततिम् । आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहमिति गार्हपत्यम् ॥ शंस्य पशून्मे गोपाय विश्वरूपं धनं वसु । गृहाणां पुष्टिमानन्दं तांस्ते परिददाम्यहमित्याहवनीयम् ॥ सप्रथ सभां मे गोपायेन्द्रियं भूतिवर्धनम् । विश्वजनस्य च्छाया तां ते परिददाम्यहमिति सभ्यम् ॥ अहे बुध्निय मन्त्रं मे गोपाय श्रियं च यशसा सह । अहये बुध्नियाय मन्त्र श्रियं यशः परिददाम्यहमित्यावसथ्यम् । पञ्चधाऽग्नीन्व्यक्रामद्विराट् सृष्टा प्रजापतेः । ऊर्ध्वारोहद्रोहिणी योनिरग्नेः प्रतिष्ठितिरिति सर्वान् ॥ २ ॥

इत्यष्टादशी कण्डिका ।

इति पञ्चमः पटलः ॥ ५ ॥

आग्नेयस्याष्टाकपालस्य तन्त्रं प्रक्रमयति ॥ १ ॥ निरुप्तं हविरुपसन्नमप्रोक्षितं भवति । अथ सभाया मध्येऽधिदेवनमुद्धत्यावोक्ष्याक्षान्न्युप्याक्षेषु हिरण्यं निधाय समूह्य व्यूह्य प्रथयित्वा निषसाद धृतव्रत इति मध्येऽधिदेवने राजन्यस्य जुहोति ॥ २ ॥ आवसथे परिषदो मध्ये हिरण्यं निधाय मन्त्रवता हिरण्ये जुहोति प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् । यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिर इति ॥ ३ ॥ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः । विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु न इत्युक्त्वा शतमक्षान्यजमानाय प्रयच्छन्नाह व्रीहिभ्यो गां दीव्यतार्हिंसन्तः परूंषि विशसतेति ॥ ४ ॥ संप्रैषमकुर्वन्ति ॥ ५ ॥

॥ इत्येकोनविंशी कण्डिका ॥

कृतं यजमानो विजिनाति ॥ १ ॥ तया यजयन्ति तदल संस्कृत्य सभासद्भ्य उपहरन्ति ॥ २ ॥ आवसथे भुञ्जते ॥ ३ ॥ कल्पतिसामनसीभ्यामग्नीन्यजमान उपतिष्ठते कल्पेतां

---

१ यद्यप्यत्रापातो भाति समुह्य, व्युह्यति ' उपसर्गाद्ध्रस्व ऊहतेः " इतिसूत्रात् । तथापि समूहेति नामधातोर्ल्यप्प्रत्यय इति ध्येयम् । व्यूह्येत्यत्राप्येवमेव । अर्थभेदोऽप्यत्रानुसंधेयः । समूह्य—सहत्य, व्यूह्य—वियुत्य । ए मुद्गवादिस्थलेऽप्यूह्यम् । इति ।

द्यावापृथिवी येऽग्नयः समनस इति ॥ ४ ॥ प्रोक्षादि कर्म प्रतिपद्यते ॥ ५ ॥ आग्नेयस्य दक्षिणाकाले दक्षिणा ददाति ॥ ६ ॥ अजं पूर्णपात्रमुपबर्हणं सार्वसूत्रमित्यग्नीधे ॥ ७ ॥ वह्निमश्वं ब्रह्मणेऽध्वर्यवे वा ॥ ८ ॥ आहवनीयदेशेऽनड्वाहमध्वर्यवे ॥ ९ ॥ अपरेण गार्हपत्यं धेनुं होत्रे ॥ १० ॥ वासो मिथुनौ गावौ नवं च रथं ददाति । तानि साधारणानि सर्वेषाम् ॥ ११ ॥ आद्वादशभ्यो ददातीत्युक्त्वाऽऽह काममूर्ध्वं देयमपरिमितस्यावरुद्ध्या इति विज्ञायते ॥ १२ ॥ ऊर्ध्वमादिष्टदक्षिणाभ्यो वदति षड् देया द्वादश देयाश्चतुर्विंशतिर्देया इति ॥ १३ ॥ ता विकल्पन्ते ॥ १४ ॥ येषां पशूनां पुष्टिं भूयसीं कामयेत तेषां वयसाम् ॥ १५ ॥ दित्यौहीं दद्याद्दित्यवाहं च मुष्करम् ॥ १६ ॥ वर्धमानां दक्षिणां ददाति ॥ १७ ॥ यद्यनाढ्योऽग्निमादधीत काममेवैकां गा दद्यात्सा गवां प्रत्याम्नायो भवतीति विज्ञायते ॥ १८ ॥ सिद्धमिष्टिः संतिष्ठते ॥ १९ ॥

इति विंशी कण्डिका ।

पवमानहवींषि सद्यो निर्वपेत् ॥ १ ॥ द्वादशाहे द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास्यृतौ संवत्सरे वा ॥ २ ॥ न सोमेनायक्ष्यमाणः पुरा संवत्सरान्निर्वपेत् ॥ ३ ॥ निर्वपेदित्येके ॥ ४ ॥ यदि निर्वपेदग्नये पवमानायाग्नये पावकायाग्नये शुचय इति तिस्र आज्याहुतीः सोमदेवताभ्यो वा हुत्वा निर्वपेत ॥ ५ ॥ समानतन्त्राणि नानातन्त्राणि वाऽऽग्नेयेन वा समानतन्त्राणि ॥ ६ ॥ यं कामयेत पापीयान्स्यादिति तस्यैकमेकमेतानि हवींषि निर्वपेत् । न वसीयान्न पापीयानिति तस्य साकं सर्वाणि । यं कामयेतोत्तरं वसीयाञ्छ्रेयान्स्यादिति तस्याग्नये पवमानाय निरुप्य पावकशुचिभ्यां समानबर्हिषी निर्वपेत् ॥ ७ ॥ शतमानं हिरण्यं दक्षिणा ॥ ८ ॥ पूर्वयोर्हविषोर्द्वे त्रिंशन्माने उत्तरस्मिंश्चत्वारिंशन्मानम् ॥ ९ ॥ येन हिरण्यं मिमते तेन मीत्वा ददाति ॥ १० ॥ सिद्धमिष्टिः संतिष्ठते ॥ ११ ॥

इत्येकविंशी कण्डिका ।

ऐन्द्राग्नमेकादशकपालमनुनिर्वपत्यादित्यं च घृते चरुम् ॥ १ ॥ सप्तदश सामिधेन्यः ॥ २ ॥ चतुर्धाकरणकाल आदित्यं ब्रह्मणे परिहरति ॥ ३ ॥ तं चत्वार आर्षेयाः प्राश्नन्ति ॥ ४ ॥ प्राशितवद्भ्यः समानं वरं ददाति । धेन्वनडुहोर्दानमेके समामनन्ति । सिद्धमिष्टिः संतिष्ठते ॥ ५ ॥ आग्नावैष्णवमेकादशकपालमनुनिर्वपत्यग्नीषोमीयमेकादशकपालं विष्णवे शिपिविष्टाय त्र्युद्धौ घृते चरुम् ॥ ६ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ७ ॥ आदित्यं घृते चरुं सप्तदशसामिधेनीकं धेनुदक्षिणं सर्वेषामनुनिर्वाप्याणां स्थाने वाजसनेयिनः समामनन्ति ॥ ८ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ९ ॥ अग्निहोत्रमारप्स्यमानो दशहोतारं मनसाऽनुद्रुत्याऽऽहवनीये सग्रहं हुत्वाऽथ सायमग्निहोत्रं जुहोति ॥ १० ॥ व्याहृतीभिरुपसादयेत

॥ ११ ॥ संवत्सरे पर्यागत एताभिरेवोपसादयेत् ॥ १२ ॥ द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्नहतं वासो बिभर्ति ॥ १३ ॥

इति द्वाविंशी कण्डिका ।

यां प्रथमामग्निहोत्राय दोग्धि तां दक्षिणां ददाति ॥ १ ॥ अथैकेषाम् । अग्नीनाधाय हस्ताववनिज्य संवत्सरमग्निहोत्रं हुत्वाऽथ दर्शपूर्णमासावारभते ताभ्यां संवत्सरमिष्ट्वा सोमेन पशुना वा यजते तत ऊर्ध्वमन्यानि कर्माणि कुरुते ॥ २ ॥ त्रयोदशरात्रमहतवासा यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्नैव सोमेन पशुना वेष्ट्वाऽग्नीनुत्सृजति यथा सुयवसान्कृत्वा प्राव्याज्ञादक्रादिति शाट्यायनिब्राह्मणं भवति ॥ ३ ॥ पूर्णा पश्चादुत्ते देवा अदधुरिति सारस्वती होमौ हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति ॥ ४ ॥ आग्नावैष्णवमेकादशकपालं सरस्वत्यै चरुं सरस्वते द्वादशकपालम् ॥ ५ ॥ अग्नये भगिनेऽष्टाकपालं यः कामयेत भगवादः स्यामिति ॥ ६ ॥ नित्यवदेके समामनन्ति ॥ ७ ॥ नानातन्त्रमेके ॥ ८ ॥ त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः । श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् । त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि दस्मवर्चाः । अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेरिति याज्यानुवाक्ये ॥ ९ ॥

इति त्रयोविंशी कण्डिका ।

चित्तं च चित्तिश्चेति पुरस्तात्स्विष्टकृतो जयाञ्जुहोति ॥ १ ॥ चित्ताय स्वाहा चित्त्यै स्वाहेत्येके समामनन्ति ॥ २ ॥ प्रजापतिर्जयानिति त्रयोदशीम् ॥ ३ ॥ अग्ने बल्द सह ओजः क्रममाणाय मेदाः । अभिशस्तिकृतेऽनभिशस्तेन्यायास्यै जनतायै श्रैष्ठ्यायेति चतुर्दशीं यः कामयेत चित्रं जनतायाᳪ स्यामिति । चित्र भवति शबलं त्वस्य मुखे जायते ॥ ४ ॥ मिथुनौ गावौ दक्षिणा ॥ ५ ॥ सिद्धमिष्टिः संतिष्ठते ॥ ६ ॥ दर्शपूर्णमासावारप्स्यमानश्चतुर्होतारं मनसाऽनुद्रुत्याऽऽहवनीये स्रुग्रहᳪ हुत्वाऽथ दर्शपूर्णमासावारभते ॥ ७ ॥ व्याहृतीभिर्हवीᳪष्यासादयेत्संवत्सरे पर्यागत एताभिरेवासादयेत् ॥ ८ ॥ अमावास्यायामादधानस्यैतत् । पौर्णमास्या तु पूर्वस्मिन्पर्वणि सेष्टि सान्वारम्भणीयमाधानमपवृज्य ॥ ९ ॥

इति चतुर्विंशी कण्डिका ।

श्वोभूते पौर्णमासेन यजते ॥ १ ॥ अनन्तरमाधानादाहिताग्निव्रतानि ॥ २ ॥ मानृतं वदेत् ॥ ३ ॥ नास्य ब्राह्मणोऽनाश्वान्गृहे वसेत् ॥ ४ ॥ सूर्योढमतिथिं वसत्यै नापरुन्धीत् ॥ ५ ॥ नर्ञीसपकरयाश्नीयात् ॥ ६ ॥ क्लिन्नं दारु नादध्यात् ॥ ॥ ७ ॥ अन्तर्नाव्यपा नाश्नीयात् ॥ ८ ॥ स्वकृत इरिणे नावस्येत् ॥ ९ ॥ पुण्यः स्यात् ॥ १० ॥ हिंकृत्य याग्यत स्त्रियमुपेयात् ॥ ११ ॥ व्याहरेद्वा ॥ १२ ॥ न सायमाहुतावहुतायामश्नीयात् ॥ १३ ॥ एवं प्रातः ॥ १४ ॥ आहिताग्नेर्गृहे न सायमहुते भोक्तव्यं तथा प्रातरित्यन्येषां व्रतम् ॥ १५ ॥ नक्तं नान्यदन्नादद्यात्

॥ १६ ॥ दद्यादित्येके ॥ १७ ॥ अन्नं तु ददन्न दर्शीत ॥ १८ ॥ नैतस्मिन्संवत्सरे पशुनाऽनिष्ट्वा मांसं भक्षयेत् ॥ १९ ॥ मनसाऽग्निभ्यः प्रहिणोमि भक्षं मम वाचा सं सह भक्षयन्तु । अप्रमाद्यन्नप्रमत्तश्चरामि शिवेन मनसा सह भक्षमतेति यथादिष्टो भक्षयेदेतं मन्त्रमुक्त्वा भक्षयेत् ॥ २० ॥

इति पञ्चविंशी कण्डिका ।

इति सप्तमः पटलः ॥ ७ ॥

समाप्तमग्न्याधेयम् ।

॥ सविधिवाक्याधानविषयानुक्रमणम् ॥

विषयानुक्रमणिका ।	विधिवाक्यानि ।
१ आधानसंकल्पः ।	१ यो यस्य इत्युक्त्वा न यजते तै. सं. २ । ४ । ११ मनसा त्रिः संकल्पयति त्रिरुच्चैः बौ. श्रौ. सू. २ । १
२ ऋत्विग्वरणम्	२ ऋत्विजो वृणीते आश्व. गृ. १ । २३ । १
३ मधुपर्काहरणम्	३ मधुपर्कमाहरेत् आ. गृ. १ । २४ । १
४ अरण्याहरणम्	४ अरणी आहरति आ. श्रौ. ५ । १ । २
५ अरण्यभिमन्त्रणम्	५ अरणी अभिमन्त्र्य आ. श्रौ. ५ । १ । ४
६ पार्थिवसंभाराहरणम्	६ पार्थिवान्संभारानाहरति आ. श्रौ. ५।१।४
७ वानस्पत्यसंभाराहरणम्	७ वानस्पत्यान्संभारानाहरति आ.श्रौ.५।१।४
८ संभारनिधानम्	८ निदधाति आ. श्रौ. ५ । ३ । १
९ उदवसानम्	९ उदवसाय शालीन आदधीत आ. श्रौ. ५ । ३ । २२
१० अग्निप्रतिष्ठापनम्	१० इषुमात्रावरमित्यादि आश्व. गृ. १ । ३ । १
११ देवयजनोद्धननम्	११ उद्धन्ति तै. ब्रा. १ । १ । ३
१२ देवयजनाभ्युक्षणम्	१२ अपोऽभ्युक्षति शान्त्यै तै. ब्रा. १ । १ । ३
१३ शरणकरणम्	१३ तस्मिन्नुदीचीनवंशं शरणं करोति आ. श्रौ. ५ । ४ । १
१४ अग्न्यायतनम्	१४ तस्याग्रेण मध्यमं वंशं गार्हपत्यायतनं भवति तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनम् । दक्षिणतः पुरस्तादितरतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनम् । आ. श्रौ. सू. ५ । ४ । २ । ५
१५ वपनस्नाने	१५ केशश्मश्रु वपते नखानि निकृन्तते तै. सं. का. ६ । १ । १ स्नाति एवं पत्नी केशवर्जम् आ. श्रौ. सू. ५ । ४ । ९
१६ क्षौमवस्त्रधारणम्	१६ क्षौमे वसानौ जायापती आ. श्रौ. सू. ५ । ४ । १०

विषयानुक्रमणिका ।	विधिवाक्यानि ।
१७ ब्रह्मौदनिकाग्नेराधानम्	१७ अपराण्हेऽधिवृक्षसूर्ये वौपासनादग्निमाहृत्यापरेण गार्हपत्यायतन ब्रह्मौदनिकमादधाति. आ. श्रौ. सु. ५ । ४ । १३ .
१८ समित्संपादनम्	१८ आ श्रौ.सू ५ । ६ । २ आ. ५ । १७ । २ । ५ । १७ । ४ । ५ । एतत्सूत्रमूलकः श्लोक चित्रिया. समिधस्तिस्र आश्वथ्यो नव एव च । शमीमय्यो द्वादश स्युरौदुम्बरसमित्त्रयी । वैकङ्कत्यस्तथा तिस्र. शुष्का. होमार्हता गता ।
१९ जायापत्योर्हविष्यान्नभोजनम्	१९ रागत. प्राप्त तदिदानीं नियम्यते शिष्टैः । सर्पिर्मिश्र पयोमिश्र वा
२० सायंकालिको गृह्यहोमः	२० पाणिग्रहणादि गृह्य परिचरेत्स्वयम्. आश्व. गृ. सू. १ । ९
२१ ब्रह्मादनैर्निर्वाप.	२१ ब्रह्मौदन चतु शरावं निर्वपति. आ. श्रौ. सू ५ । १ । १
२२ ब्रह्मौदनपचनम् ।	२२ ब्रह्मौदन पचति. तै. ब्राह्म० १ । १ । ९
२३ ब्रह्मौदनाग्नौ होम.	२३ दर्व्या ब्रह्मौदनादुद्धृत्य जुहोति. आ. श्रौ. सू. ५ । ५ । ८
२४ ब्रह्मौदनस्य पृथक्पात्रेषु निक्षेप.	२४ चतुर्धा ब्रह्मौदन व्युद्धृत्य. आ. श्रौ. सू. ५ । ५ । ९
२५ ऋत्विग्भ्यो ब्रह्मौदनदानम्	२५ ऋत्विग्भ्य उपोहति. आ. श्रौ. सू ५।५।९
२६ समिद्विवर्तनम्	२६ समिधो विवर्तयति. आ.श्रौ. ५ । ५ । १
२७ समिदाधानम्	२७ (१) समिधोऽभ्यज्यादधाति तै.ब्रा. १।१।९.
	(२) तिस्र आदधाति ,,
	(३) इयतीर्भवन्ति ,,
	(४) आर्द्रा भवन्ति ,,
	(५) चित्रियस्याश्वत्थस्यादधाति ,,
	(६) घृतवतीभिरादधाति ,,
	(७) गायत्रीभिर्ब्राह्मणस्यादध्यात् ,,

विषयानुक्रमणिका ।	विधिवाक्यानि ।
२८ वत्सतरीदानम्	२८ वत्सतरीर्ददाति. आ. श्रौ. सू. ५।७।१
२९ ब्रह्मौदनप्राशनम्	२९ प्राश्नन्ति ब्राह्मणा ओदनम्. तै. ब्रा. १।१।९
३० वरदानम्	३० वरं ददाति. आ. श्रौ. सू. ५ । ७ । ३
३१ अध्वर्योर्व्रतचर्या	३१ व्रतं चरति आ. श्रौ. सू. ५ । ७ । ६
३२ अजबन्धनम्	३२ अजं बध्नाति आ. श्रौ. सू. ५।७।१७
३३ यजमानव्रतचर्या	३३ यजमानो व्रतमुपैति आ.श्रौ. सू.५।८।१
३४ अग्निप्रज्वालनम्	३४ अग्निमिन्धीत तै. ब्रा. १ । १ । ९

पर्वदिनेऽनुष्ठेयं कर्म ।

१ अरणीनिष्टपनम्	१ अरणी निष्टपेत् तै. ब्रा. १ । १ । ९
२ अरण्यभिमन्त्रणम्	२ अरणी अभिमन्त्र्य. आ. श्रौ. सू. ५ । ८ । ६.
३ अरणीप्रतीक्षणम्	३ यजमानः प्रतीक्षते. आ. श्रौ. सू. ५ । ८ । ६
४ अरणीप्रदानम्	४ यजमानाय प्रयच्छति. आ. श्रौ. सू. ५ । ८ । ७
५ अरणीप्रतिग्रहणम्	५ प्रतिगृह्य. आ. श्रौ. सू. ५ । ८ । ७
६ अरण्यभिमन्त्रणम्	६ अभिमन्त्रयते यजमानः आ.श्रौ.सू.५।८।८
७ जपः	७ उभौ जपतः आ. श्रौ. सू. ५ । ९ । १
८ अग्न्यायतनोद्धननम्	८ गार्हपत्यायतनमुद्धत्य एव दक्षिणाग्नेराहवनीयस्य आ. श्रौ. सू. ९ । ९ । १।२
९ अवोक्षणम्	९ अवोक्षति आ. श्रौ. सू. ५ । ९ । १
१० अनुष्ठानेऽग्नीनामानन्तर्यम्	१० एवमनुपूर्वाण्येवैष्वत ऊर्ध्वं कर्माणि क्रियन्ते आ. श्रौ. सू. ५ । ९ । ३
११ संभारविभागः	११ सिकतानामर्धं द्वैधं विभज्य एतेनैव कल्पेन पार्थिवान्संभारान् आ. श्रौ. सू. ५।९।५
१२ सिकतानिवपनम्	१२ सिकता निवपति तै. ब्रा. १ । १ । ३
१३ ऊषनिवपनम्	१३ ऊषान्निवपति तै. ब्रा. १ । १ । ३

विषयानुक्रमणिका	विधिवाक्यानि
१४ ध्यानम्	१४ अदो ध्यायेत् तै. ब्रा. १ । १ । ३
१५ आखुकरीषनिर्वपनम्	१५ यदाखुकरीषꣳ संभारो भवति तै. ब्रा. १। १ । ३
१६ वल्मीकवपानिवपनम्	१६ यद्वल्मीकवपासंभारो भवति तै ब्रा.१।१।३
१७ सूदनिवपनम्	१७ यस्य सूदः संभारो भवति तै.ब्रा. १।१।३
१८ वराहविहतनिवपनम्	१८ यद्वराहविहतꣳ सभारो भवति तै.ब्रा. १ । १ । ३
१९ शर्करानिवपनम्	१९ शर्करा भवन्ति धृत्यै तै. ब्रा. १।१।३
२० द्वेष्यध्यानम्	२० द्वेष्य च मनसा ध्यायति आ. श्रौ. सू. ५ । ९ । ११
२१ संभारव्यूहनम्	२१ संभारानुन्व्यूहति आ.श्रौ.सू. ५ ।१०।१
२२ वानस्पत्यसमारससर्जनम्	२२ वानस्पत्यान्ससृजेत् आ. श्रौ. सू.५।१०।२
२३ समारविभागः	२३ सिकतावद्विभाग कुर्यात् आ. श्रौ. सू. ५ । १० । २
२४ संभारनिवपनम्	२४ निवपति आ. श्रौ. सू. ५ । १० । २
२५ हिरण्यनिवपनम्	२५ यद्धिरण्यमुपास्यति तै. ब्रा. १ । १ । ३
२६ हिरण्याभिमन्त्रणम्	२६ उपास्तमभिमन्त्रयते आ. श्रौ. सू. ५ । १० । ४
२७ रजतप्रदानम्	२७ रजतं प्रयच्छति
२८ अपामुपस्पर्शनम्	२८ निरसनं कृत्वाप उपस्पृशेत् आप प.सू.२।९
२९ मन्थनदेशः	२९ अपोदूह्य भस्माग्निं मन्थति तै. ब्रा.१।१।९
३० अरणिस्थापनम्	३० दशहोत्रारणिमवदध्यात्. तै. ब्रा. २।२।१
३१ अश्वस्थितिः	३१ उपतिष्ठत्यश्वे आ. श्रौ. सू. ५ । १० । ९
३२ अश्वलक्षणम्	३१ श्वेतोऽश्वो विक्लिन्नाक्षो भवति रोहितो वा सितजानुरपि वा य एव कश्चित्साण्डः आ. श्रौ. सू. ५ । १० । १०
३३ अग्निमन्थनम्	३३ अग्निं मन्थति तै. ब्रा. १ । १ । ९
३४ सामगानम्	३४ साम गायति आ. श्रौ.सू. ५। १०।११
३५ अग्नेरभिमन्त्रणम्	३५ अभिमन्त्रयते आ. श्रौ. सू.५।१०।१२

विषयानुक्रमणिका	विधिवाक्यानि
३६ चतुर्होतृवाचनम्	३६ चतुर्होतृन्यजमानं वाचयति आ. श्रौ. सू. ५ । ११ । १
३७ जाताग्नेरभिमन्त्रणम्	३७ जातमभिमन्त्रयते आ. श्रौ. सू. ५ । ११।२
३८ वरदानम्	३८ वरं ददाति आ. श्रौ. सू. ५ । ११ । ३
३९ अभिप्राणनम्	३९ अभिप्राणिति आ. श्रौ. सू. ५ । ११ । ५
४० अभिग्रहणम्	४० अभिगृह्य आ. श्रौ. सू. ५ । ११ । ६
४१ उपसमिन्धनम्	४१ उपसमिध्य. आ. श्रौ. सू. ५ । ११ । ६
४२ प्रागुद्धरणम्	४२ प्राञ्चमुद्धृत्य आ. श्रौ. सू. ५ । ११ । ६
४३ गार्हपत्याधानम्	४३ निदधाति आ. श्रौ. सू. ५ । १२ । २
४४ आधानकाले सामगानादि	४४ रथंतरे गीयमाने यज्ञायज्ञीये च यथर्ष्याधानेन प्रथमया व्याहृत्या द्वाभ्यां वा प्रथमाभ्यां च सर्पराज्ञीभ्यां प्रथमेन च घर्मशिरसा । घर्मः शिर इति गार्हपत्यमादधाति । रथंतरमभिगायते गार्हपत्य आधीयमाने तै. ब्रा. १ । १ । ८ त्रिभिरक्षरैर्गार्हपत्यमादधाति तै. ब्रा. १ । १ । ९
४५ अभिमन्त्रणम्	४५ आधीयमानमभिमन्त्रयते आ. श्रौ. सू. ५ । १२ । ३
४६ वाचनम्	४६ वाचयति आ. श्रौ. सू. ५ । १२ । ३
४७ अग्न्यनुपस्पर्शनम्	४७ नाग्निमुपस्पृशति आ. श्रौ. सू ५ । १६ ।२
४८ आज्यौषधिहोमः (शमनहोमः)	४८ आज्यमौषधीश्च जुहोति आ. श्रौ. सू. ५ । १६ । ४
४९ आहवनीयाधानम्	४९ अर्धोदिते सूर्य आहवनीयमादधाति, तै. ब्रा. १ । १ । ४
५० इध्मादीपनम्	५० इध्ममादीपयति आ. श्रौ. सू. ५ । १३ । ३
५१ सिकताग्रहणम्	५१ सिकताश्चोपयमनीरुपकल्पयते आ. श्रौ. सू. ५ । १३ । ३
५२ अग्न्युद्यच्छनम्	५२ अग्निमुद्धृह्णीयात् तै. ब्रा. १ । १ । ९
५३ अग्नेर्धारणम्	उपयतं धारयति आ. श्रौ. सू. ५।१३।६
५४ वाचनम्	५४ वाचयति । आ. श्रौ. सू. ५ । १३ । ७

विषयानुक्रमणिका	विधिवाक्यानि
५५ दक्षिणाग्न्याधानम्	५५ दक्षिणमग्निमादधाति आ. श्रौ. सू. ५। १३। ८
५६ सामगानादि	५६ यज्ञायज्ञीये गीयमाने यथर्ष्याधानेन द्वितीयया व्याहृत्या तिसृभिः सर्पराज्ञीभिः द्वितीयेन च घर्मशिरसा । आ. श्रौ. सू. ५। १३। ८ वात' प्राण इत्यन्वाहार्यपचनम् । तै. ब्रा. १। १। ८
५७ अग्न्यनुपस्पर्शेन शमनहोमश्च	५७ विधि पूर्ववत्
५८ सामगानम्	५८ वामदेव्यमभिगायते । तै. ब्रा. १। १। ८
५९ साश्वाग्निप्रव्रजनम्	५९ अग्निप्रव्रजन्ति आ. श्रौ. सू. ५। १४। ५
६० रथचक्रपरिवर्तनम्	६० रथचक्रं प्रवर्तयति । तै. ब्रा. १। १। ६
६१ अग्निनयनम्	६१ इयत्यग्रे हरति तै. ब्रा. १। १। ५
६२ अन्तरागमनप्रतिषेधः	६२ नाग्निमादित्यं च व्यवेयात् । आ. श्रौ. सू. ५। १४। १०
६३ पार्श्वनियमनम्	६३ दक्षिणत आ. श्रौ. सू. ५। १४। १
६४ वरदानम्	६४ वरं ददाति आ. श्रौ. सू. ५। १४। १२
६५ हिरण्यनिधानम्	६५ हिरण्यं निधाय श्रौ. सू. ५। १४। १३
६६ हिरण्यातिक्रमणम्	६६ अतिक्रमति आ. श्रौ. सू. ५।१४।१३
६७ अश्वस्य समारोहणम्	६७ पार्श्वत आक्रमयेत् । तै. ब्रा. १। १। ५
६८ अश्वस्य प्रदक्षिणावर्तनम्	६८ आवर्तयित्वा आ. श्रौ. सू. ५। १४।१५
६९ अश्वस्य पुनराक्रमणम्	६९ पुनरावर्तयति तै. ब्रा. १। १। ५
७० अश्वधारणम्	७० अश्वं धारयति आ. श्रौ. सू. ५।१५।१६
७१ अश्वयोर्विधानम्	७१ पूर्ववाडश्वो भवति आ. श्रौ. सू. ५।१४।१७
७२ जपः	७२ यजमानः शिरो जपति आ. श्रौ. सू. ५। १५। २
७३ अग्न्यभिमन्त्रणम्	७३ अभिमन्त्र्य । आ. श्रौ. सू. ५।१५।५
७४ आहवनीयाधानम्	७४ बृहति गीयमाने श्यैतवारवन्तीययोर्यज्ञायज्ञीये च यथर्ष्याधानेन सर्वाभिर्व्याहृतीभिः सर्वाभिः सर्पराज्ञीभिस्तृतीयेन च घर्मशिरसा समारोपु निदधाति । आ. श्रौ. सू. ५।१५।६ बृहद्रथन्तरे । यद्वारवन्तीयमभिगायते

विषयानुक्रमणिका	विधिवाक्यानि
	ईतेन श्येती कुरुते । अर्कश्चक्षुरित्याहवनीयं तै. ब्रा. १ । १ । ८ पञ्चभिराहवनीयम् तै. ब्रा. १।१।५
७५ अभिमन्त्रणम्	७५ अभिमन्त्रयते । आ. श्रौ. सू. ५।१६।१
७६ अनुवर्तनम्	७६ सर्वेष्वाधानेषु यजमानोऽनुवर्तयते येन येनादधाति आ. श्रौ. सू. ५ । १६ । २
७७ आज्यौषधिहोमः	७७ आज्यमोषधीश्च जुहोति आ. श्रौ. सू. ५। १६ । ४
७८ समिदाधानम्	७८ समिध आदधाति आ. श्रौ. सू. ५ १७ । २ आश्वत्थः समिध आदधाति ५ । १७ । २ आश्वत्थीः शमीमय्यः समिध आदधाति ५ । १७ । ४ शमीमयीः । औदुम्बरीमादधाति वैकङ्कतीमादधाति शमीमयीमादधाति तै. सं. ५ । ४ । ७
७९ प्राजापत्यहोमः	७९ प्रजापतिं मनसा ध्यायञ्जुहोति आ. श्रौ. सू. ५ । १७ । ७
८० द्वेष्याय प्रेषणम्	८० द्वेष्याय प्रहिणोति आ. श्रौ. सू. ५।१७।८
८१ पूर्णाहुतिहोमः	८१ पूर्णाहुतिं जुहोति आ. श्रौ. सू. ५।१८।१
८२ वरदानम्	८२ वरं दत्त्वा
८३ जपः	८३ शिवा जपति आ. श्रौ. सू. ५।१८।१
८४ प्रायश्चित्तहोमः	८४ प्रायश्चित्त विध्यपराधे विधीयते आ. श्रौ. सू. ९।१।१
८५ व्रतसंकल्पः	८५ व्रतानि संकल्पयति आ. श्रौ. सू. ५।५।२
८६ होमः	८६ जुहोति आ. श्रौ. सू. ५।१८।१
८७ उपस्थानम्	८७ उपतिष्ठते आ. श्रौ. सू. ५।१८।२
८८ आज्याहुतयः	८८ आज्याहुतीर्हुत्वा आ. श्रौ. सू. ५।२१।५
८९ अजस्रधारणम्	८९ आधानाद्द्वादशरात्रमजस्रा आ. श्रौ. सू. २ । १ । ३५
९० दशहोतृहोमः	९० दशहोतारं हुत्वा आ. श्रौ. सू. ९।२२।२०

विषयानुक्रमणिका		विधिवाक्यानि	
९१	अग्निहोत्रहोमः	९१	अग्निहोत्रं जुहोति
९२	दक्षिणादानम्	९२	दक्षिणा ददाति ५।२३।१
९३	होमानुष्ठानम्	९३	एतौ होमौ पुरस्ताज्जुहुयात् तै. सं. ३। ५।१
९४	अन्वारम्भणीयेष्टयनुष्ठानम्	९४	अन्वारम्भणीयामिष्टिं निर्वपति आ. श्रौ. सू. ५।२३।४
९५	दक्षिणादानम्	९५	मिथुनौ गावौ दक्षिणा समृद्ध्यै तै.स. ३। ५।१
९६	चतुर्होतृहोमः	९६	चतुर्होतार जुहुयात्. तै. ब्रा, २।२।२
९७	दर्शपूर्णमासारम्भः	९७	दर्शपूर्णमासावारभते आ.श्रौ.सू. ५।२४।७
९८	पौर्णमासयागः	९८	पौर्णमासेन यजते. आ. श्रौ, सू. ५।२५।१

इति सविधि आधानविषयानुक्रमणम् ।

आधानसंभारस्मरणपट्टिका ।

१	जायापती	अग्न्याधानादिकर्मानुष्ठानार्थम्
२	ऋत्विजः	याजनार्थम्
३	अग्न्यागारम्	विहारार्थम्
४	अग्न्यायतनम्	अग्निस्थापनार्थम्
५	अरणी	अग्निमन्थनार्थम्
६	स्फ्यः	वेद्युद्धननादिनिमित्तकः
७	कपालानि	पुरोडाशाधिश्रयणार्थम्
८	अग्निहोत्रहवणी	अग्निहोत्रादिकार्यार्थम्
९	शूर्पम्	निर्वापार्थम्
१०	कृष्णाजिनम्	व्रीह्यवघातार्थम्
११	शम्या	अधिवपनार्थम्
१२	उलूखलम्	अवहननार्थम्
१३	मुसलम्	
१४	दृषद्	पेषणार्थम्
१५	उपला	
१६	स्रुवः	आज्यावदानार्थम्
१७	जुहूः	पुरोडाशादिहोमार्थम्
१८	उपभृत्	प्रयाजाद्याज्यधारणार्थम्
१९	ध्रुवा	आज्यग्रहणार्थम्
२०	वेदः	समार्जनार्थम्
२१	पात्री	पिष्टमर्जनार्थम्
२२	आज्यस्थाली	आज्यनिर्वापार्थम्
२३	प्राशित्रम्	प्राशित्रावदानार्थम्
२४	इडापात्रम्	इडावदानार्थम्
२५	प्रणीताप्रणयनम्	अप्प्रणयार्थम्
२६	योक्त्रम्	पत्न्या कटिबन्धनार्थम्
२७	मदन्तीपात्रम्	जलतापनार्थम्
२८	मेक्षणम्	पिष्टमर्जनार्थम्
२९	वेदाग्राणि	पात्रसमार्गाय

३०	अन्वाहार्यस्थाली	दक्षिणौदनश्रपणार्थम्
३१	उपवेषः	अङ्गारनिरूहणार्थम्
३२	पिष्टलेपफलीकरणपात्रम्	पिष्टलेपफलीकरणस्थापनार्थम्
३३	अग्निहोत्रस्थाली	पयोधिश्रयणार्थम्
३४	अग्निहोत्रस्रुवः	पयउन्नयनार्थम्
३५	धृष्टिः	भस्माङ्गारनिरूहणाद्यर्थम्
३६	दर्भा अपरिमिता	पवित्राद्यर्थम्
३७	सिकता. ऊषा. आखुकरीषम्, वल्मीकवपा, सूद –वराहविहतम् शर्कराः–हिरण्यम रजतम् अश्वत्थ –उदुम्बर.–पर्णः शमी–विकङ्कत'– अशनिहतवृक्षशकलम् पुष्करपर्णम्	गार्हपत्याद्यग्न्यायतनेषु स्थापनार्थम्
३८	नापितः	क्षौरार्थम्
३९	शीतोष्णजलम्	स्नानार्थम्
४०	क्षौमवस्त्रचतुष्टयम्	जायापत्योर्धारणार्थम्
४१	गृह्याग्निः	ब्रह्मौदनाद्यर्थम्
४२	चित्रियाश्वत्थस्य समिधः सपलाशा फलवत्य·	ब्रह्मौदनाग्नौ निधानार्थम
४३	आश्वत्थ्यो नव	गार्हपत्यादिषु होमार्थम
४४	शमीमय्यो द्वादश	
४५	औदुम्बर्यस्तिस्रः	
४६	वैकङ्कत्यस्तिस्रः	
४७	पाकः	जायापत्योर्भोजनार्थम्
४८	तण्डुलाः	ब्रह्मौदनार्थम्
४९	पाजकम्	ब्रह्मौदननिर्वापार्थम्
५०	शरावाः षट्	अग्निप्रणयनाद्यर्थम्
५१	चरुस्थाली	ब्रह्मौदनार्थम्

५२	दर्वी	ब्रह्मौदनस्योद्धरणार्थम्
५३	पैत्तलपात्री	ओदनस्थापनार्थम्
५४	घृतं पर्याप्तम्	होमाद्यर्थम्
५५	वत्सतर्यस्तिस्रः	अध्वर्यवे दानार्थम्
५६	चत्वारो वराः	ऋत्विग्भ्यो दानार्थम्
५७	यज्ञियवृक्षकाष्ठानि	अग्निसमिन्धनार्थम्
५८	अजः कृष्णबिन्दुः	बन्धनार्थम्
५९	ब्रह्मौदनाभिधारणम्	अरणीनिष्टपनार्थम्
६०	युवा अश्वः	पदस्थापनार्थम्
६१	वरः	अध्वर्यवे दानार्थम्
६२	सिकताः	अग्निप्रणयनार्थम्
६३	तिल, माष, व्रीहियव, प्रियङ्ग्वणु, गोधूम, श्यामाक, वेणुबीज, नीवार, जर्तिल, गवीधुक, मर्कटाः *	ग्राम्यहोमार्थम्
६४	रथो रथचक्रं वा	परिवर्तनार्थम्
६५	वरः	अध्वर्यवे दानार्थम्
६६	हिरण्यम्	अश्वनिधानार्थम्
६७	वरः	अध्वर्यवे
६८	समिधः प्रादेशमात्र्यः	होमार्थं यथा पर्याप्ता भवेयुः
६९	परिधयः बाहुमात्राः	इध्मार्थं यथा पर्याप्ता भवेयुः
	सामिधेन्यश्च अरत्निमात्र्यः	
७०	तण्डुलपिष्टम्	पुरोडाशार्थम्
७१	तण्डुलाः स्थाली च	चर्वर्थम्
७२	दक्षिणा	ऋत्विग्भ्यो दानार्थम्

ऋत्विजां नामानि.

अध्वर्युः	ब्रह्मा
होता	अग्नीत्

* मर्कटो धान्यविशेषः। मटकीति भाषायाम्।

३०	अन्वाहार्यस्थाली	दक्षिणौदनश्रपणार्थम्
३१	उपवेष	अङ्गारनिरूहणार्थम्
३२	पिष्टलेपफलीकरणपात्रम्	पिष्टलेपफलीकरणस्थापनार्थम्
३३	अग्निहोत्रस्थाली	पयोधिश्रयणार्थम्
३४	अग्निहोत्रस्रुग	पयउन्नयनार्थम्
३५	धृष्टि	भस्माङ्गार निरूहणाद्यर्थम्
३६	दर्भा अपरिमिता	पवित्राद्यर्थम्
३७	सिकता ऊषा आखुकरीषम्, वल्मीकवपा, सूद –वराहविहतम् शर्करा –हिरण्यम रजतम् अश्वत्थ –उदुम्बर –पर्ण शमी–विकङ्कत – अशनिहतवृक्षशकलम् पुष्करपर्णम्	गार्हपत्याद्यग्न्यायतनेषु स्थापनार्थम्
३८	नापित	क्षौरार्थम्
३९	शीतोष्णजलम्	स्नानार्थम्
४०	क्षौमवस्त्रचतुष्टयम्	जायापत्योर्धारणार्थम्
४१	गृह्याग्नि	ब्रह्मौदनाद्यर्थम्
४२	चित्रियाश्वत्थस्य समिधः सपलाशा फलवत्य	ब्रह्मौदनाग्नौ निधानार्थम्
४३	आश्वत्थ्यो नव	गार्हपत्यादिषु होमार्थम
४४	शमीमय्यो द्वादश	
४५	औदुम्बर्यस्तिस्र	
४६	वैकङ्कत्यस्तिस्र	
४७	पाक	जायापत्योर्भोजनार्थम्
४८	तण्डुला	ब्रह्मौदनार्थम्
४९	पाजकम्	ब्रह्मौदननिर्वापार्थम्
५०	शरावा षट्	अग्निप्रणयनाद्यर्थम्
५१	चरुस्थाली	ब्रह्मौदनार्थम्

आधानप्रयोगः ।

चतुर्दश्यां प्रातरनुष्ठेयं कर्मजातम् ।

१ आधानसंकल्पः । दर्भेष्वासीनः सपत्नीको यजमानः पवित्रपाणिराचम्य ' ममोपात्त-दुरितक्षयद्वारा परमेश्वरप्रीत्यर्थमग्नीनाधास्ये ' ।

२ ऋत्विग्वरणम् । यजमानः ' अस्मिन्नाधाने चन्द्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वा वृणे ' ।

ब्रह्मा ' महन्मे वोचो भर्गो मे वोचो भगो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिं मे वोचस्तृप्तिं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचः । चन्द्रमास्ते ब्रह्मा स ते ब्रह्मा ब्रह्मा...अहं ते मानुषः ' ।

यजमानः ' अस्मिन्नाधाने अग्निर्मे होता स मे होता होतारं त्वा वृणे ' । होता ' महन्मे वोचो भर्गो मे वोच ' इत्यादि । ' अग्निष्टे होता स ते होता होता...अहं ते मानुषः ' ।

यजमानः ' अस्मिन्नाधाने आदित्यो मेऽध्वर्युः स मेऽध्वर्युरध्वर्युं त्वा वृणे ' । अध्वर्युः ' महन्मे वोचो भर्गो मे वोच ' इत्यादि । आदित्यस्तेऽध्वर्युः स तेऽध्वर्युरध्वर्युः....अहं ते मानुषः ' ।

[' त्वा ' इत्यस्याग्रे यजमानः ब्रह्मप्रभृतीना नाम वदेत् ।
...इत्यङ्किते चिह्ने ब्रह्मप्रभृतयः स्वं स्वं नाम वदेयुः]

यजमानः ' अस्मिन्नाधाने आग्नीध्रं त्वा वृणे ' ।

३ मधुपर्काहरणम् । यजमानः ' आधानाङ्गभूतमृत्विग्भ्यो मधुपर्कमाहरिष्ये ' इति संकल्पासनं दद्यात् । विष्टरो विष्टरो विष्टर इति त्रिर्निवेदितमासनार्थमृत्विग्भ्यस्ते विष्टरं दद्यात् । ऋत्विक्

' अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ।
इदं तमधितिष्ठामि यो मा कश्चाभिदासति ' ॥ १ ॥

इत्युदगग्रे विष्टर उपविशेत् । ततोऽर्चकेन पाद्यं पाद्यं पाद्यमिति त्रिर्निवेदितं पाद्यमृत्विग्गृह्णीयात् । ततोऽर्चकस्तेनोदकेनर्त्विजो दक्षिणसव्यपादौ क्रमेण क्षालयेत् । तत ऋत्विक् पूर्ववत्त्रिर्निवेदितमर्घमञ्जलिना प्रतिगृह्याचमनीयेनाप्याचामति । तत्र मन्त्रः

' अमृतोपस्तरणमसि ' ॥ २ ॥

तत आह्रियमाणं मधुपर्कमीक्षते । तत्र मन्त्रः

' मित्रस्य त्वा चक्षुषा प्रतीक्षे ' ॥ ३ ॥

दक्षिणाद्रव्यम् ।

अग्नीधे अजं पूर्णपात्रं सार्वसूत्रमुपबर्हणम्
ब्रह्मणे अश्वम्
अध्वर्यवे अनड्वाहम्
होत्रे धेनुम्
सर्वेषां वासो मिथुनौ गावौ नवं च रथं गौः

अङ्गदक्षिणा

अध्वर्यवे तिस्रो वत्सतर्यः अश्वः वरचतुष्टयं च । ब्रह्मणे होत्रे अग्नीधे च प्रत्येकमेकैको वरः यस्मै कस्मै अग्निहोत्रदक्षिणा गौः । अन्वारम्भणीयदक्षिणा । मिथुनौ गावौ । वरशब्दवाच्या गौः । इति आधानप्रभृति अन्वारम्भणीयान्ता सामान्यतः सामग्रीपट्टिका । याचार्ध्योपार्धयत्नी सा विचार्य शिष्टैः संपाद्या ।

इति आधानसंभारस्मरणपट्टिका ।

आधानप्रयोगः ।

चतुर्दश्यां प्रातरनुष्ठेयं कर्मजातम् ।

१ आधानसंकल्पः । दर्भेष्वासीनः सपत्नीको यजमानः पवित्रपाणिराचम्य ' ममोपात्त-दुरितक्षयद्वारा परमेश्वरप्रीत्यर्थमग्नीनाधास्ये ' ।

२ ऋत्विग्वरणम् । यजमानः ' अस्मिन्नाधाने चन्द्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वा वृणे ' ।

ब्रह्मा ' महन्मे वोचो भर्गो मे वोचो भगो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिं मे वोचस्तृप्तिं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचः । चन्द्रमास्ते ब्रह्मा स ते ब्रह्मा ब्रह्मा...अहं ते मानुषः ' ।

यजमानः ' अस्मिन्नाधाने अग्निर्मे होता स मे होता होतारं त्वा वृणे ' । होता ' महन्मे वोचो भर्गो मे वोच ' इत्यादि । ' अग्निष्टे होता स ते होता होता...अहं ते मानुषः ' ।

यजमानः ' अस्मिन्नाधाने आदित्यो मेऽध्वर्युः स मेऽध्वर्युरध्वर्युं त्वा वृणे ' । अध्वर्युः ' महन्मे वोचो भर्गो मे वोच ' इत्यादि । आदित्यस्तेऽध्वर्युः स तेऽध्वर्युरध्वर्युः....अहं ते मानुषः ' ।

[' त्वा ' इत्यस्याग्रे यजमानः ब्रह्मप्रभृतीनां नाम वदेत् ।
...इत्यमङ्किते चिह्ने ब्रह्मप्रभृतयः स्वं स्वं नाम वदेयुः]

यजमानः ' अस्मिन्नाधाने आग्नीध्रं त्वा वृणे ' ।

३ मधुपर्काहरणम् । यजमानः ' आधानाङ्गभूतमृत्विग्भ्यो मधुपर्कमाहरिष्ये ' इति संकल्प्यासनं दद्यात् । विष्टरो विष्टरो विष्टर इति त्रिर्निवेद्यासनार्थमृत्विग्हस्ते विष्टरं दद्यात् । ऋत्विक्तु

' अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ।
इदं तमधितिष्ठामि यो मा कश्चाभिदासति ' ॥ १ ॥

इत्युदगग्रे विष्टर उपविशेत् । ततोऽर्चकेन पाद्यं पाद्यं पाद्यमिति त्रिर्निवेदितं पाद्यमृत्विग्गृह्णीयात् । ततोऽर्चकस्तेनोदकेनर्त्विजो दक्षिणसव्यपादौ क्रमेण क्षालयेत् । तत ऋत्विक् पूर्ववत्त्रिर्निवेदितमर्घमञ्जलिना प्रतिगृह्याचमनीयेनाचामति । तत्र मन्त्रः

' अमृतोपस्तरणमसि ' ॥ २ ॥

तत आह्रियमाणं मधुपर्कमीक्षते । तत्र मन्त्र

' मित्रस्य त्वा चक्षुषा प्रतीक्षे ' ॥ ३ ॥

ततो मधुपर्को मधुपर्को मधुपर्क इति त्रिर्दात्रा निवेदितं मधुपर्कं 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ' ॥ ४ ॥ इत्यञ्जलिना प्रतिगृह्य मधु वाता इति तृचेनावेक्षेत ।

'मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥ ५ ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥ ६ ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ' ॥ ७ ॥

इत्यवेक्ष्यानामिकया चाङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य

'वसवस्त्वा गायत्रेण च्छन्दसा भक्षयन्तु ' ॥ ८ ॥

इति पुरस्तान्निमार्ष्टि । एवं

'रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा भक्षयन्तु ' ॥ ९ ॥

इति दक्षिणतो निमार्ष्टि ।

'आदित्यास्त्वा जागतेन च्छन्दसा भक्षयन्तु ' ॥ १० ॥

इति पश्चान्निमार्ष्टि ।

'विश्वे त्वा देवा आनुष्टुभेन च्छन्दसा भक्षयन्तु ' ॥ ११ ॥

इत्युत्तरतः । ततो मध्यान्निर्गृह्णीत्वा त्रिरूर्ध्वं निक्षिपेत् । तत्र मन्त्रः

'भूतेभ्यस्त्वा ' इति ॥ १२ ॥

ततो मधुपर्कप्राशनम् । तत्र मन्त्राः

'विराजो दोहोऽसि ॥ १३ ॥

इति प्रथमं प्राश्नीयात् ।

'विराजो दोहमशीय ' ॥ १४ ॥ इति द्वितीयम् ।
'मयि दोहः पद्यायै विराजः ॥ १५ ॥ इति तृतीयम् ।

अथाचमनीयेनान्वाचामति

'अमृतापिधानमसि ' ॥ १६ ॥ इति ।

'सत्यं यशः श्रीर्मयि श्रीः श्रयताम् ' ॥ १७ ॥ इति द्वितीयमाचमनम् ।

ततो दात्राचान्तोदकाय गौर्गौरिति निवेदिता गां

'माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ' ॥ १८ ॥

इति जपित्वा ' ॐ उत्सृजत ' इति ब्रूयात् । ततो गा निवेद्यर्त्विग्भ्यो भोजनमपि दत्वाचम्य ' अनेन मधुपर्काख्येन कृतेन कर्मणा परमेश्वरः प्रीयताम् ' ।

सामग्री

(१) विष्टर आसनमुपवेशनार्थम् । (२) जल पाद्यार्थमर्घ्यार्थमाचमनीयार्थं च ।

(३) मधुपर्को भक्षणार्थं प्रतिदिशं निक्षेपार्थं च । (४) गौर्ऋत्विग्भ्यो निवेदनार्थम् । (५) भोजनं च तेभ्य ।

ऋत्विजा मधुपर्कदाने द्वे मती संभवतः पदार्थानुसमयः काण्डानुसमय इति । तत्र पदार्थानुसमयो नाम सर्वेषां वरणक्रमेण विष्टरं दत्वा ततः पाद्यं ततोऽर्घ्यमिति । काण्डानुसमयो नामैकस्यैव विष्टरादिगोनिवेदनान्तं समाप्य ततोऽन्यस्य ततोऽन्यस्येति । (ऋत्विग्वरणादि मधुपर्कान्तं कर्माश्वलायनगृह्ये १ । २३—२४)

४ अरण्याहरणम् । अध्वर्यु.

' यो॑ऽश्व॒त्थः श॑मी॒ग॒र्भ आ॑रु॒रोह॒ त्वे सचा॑ ।

तं ते॑ हरामि॒ ब्रह्म॑णा य॒ज्ञियैः॑ के॒तुभिः॑ स॒ह ' (तै० ब्रा० १ । २ ॥ १ । २१) ॥

अत्राश्वलायनश्रौतसूत्राध्यायिना यजमानेनाप्यरण्याहरणं कार्यम् ।

' अश्वत्थाच्छमीगर्भादरणी आहरेदनवेक्षमाणः ' इति सूत्रात् । (आश्व० श्रौ० २ । १ । १६) । अत्र वृत्तिकारः ' अध्वर्युणारण्याहरणे क्रियमाणे तेन सह यजमानोऽप्यनेन मन्त्रेणाहरेत् ' । तदा मन्त्रे 'तं त्वा हरामि ' एतावान् भेदः। शेषं समानम् ।

५ अरण्यभिमर्शनम् । अध्वर्युः सर्वाणि यज्ञपात्राण्यप्यत्राभिमृशेत्केतुभिः सहेति-मन्त्रलिङ्गात् ।

' अ॒श्व॒त्थाद्ध॑व्यवा॒हाद्धि जा॒ताम॒ग्नेस्त॒नूं य॒ज्ञियाँ॒ सं भ॑रामि ।

शा॒न्तयो॑निꣳ शमीग॒र्भम॒ग्नये॒ प्रज॑नयितवे ।

आयु॒र्मयि॑ धे॒ह्यायु॒र्यज॑माने (तै० ब्रा० १ । २ । १ । २०) ॥'

६ पार्थिवसंभाराहरणम् । अध्वर्युः— औपासनदेशे

१ ' वै॒श्वा॒न॒रस्य॑ रू॒पं पृ॑थि॒व्यां परि॑स्र॒सा ।

स्यो॒नमा वि॑शन्तु नः ' (तै० ब्रा० १ । २ । १) इति सिकताः ॥

१ अभिमन्त्रण नाम मन्त्रोच्चारणकाले तदर्थस्य स्मरणम् ।
मन्त्रमुच्चार्यैव मन्त्रार्थत्वेन स्मरेत् ।
शेषेण तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ।
एतदेवाभिमन्त्रस्य लक्षणं वेदगोचितम् (आश्व० श्रौ० वृत्तिः १।१।२

ततो मधुपर्को मधुपर्को मधुपर्क इति त्रिर्दात्रा निवेदितं मधुपर्कं 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि' ॥ ४ ॥ इत्यञ्जलिना प्रतिगृह्य मधु वाता इति तृचेनावेक्षेत ।

'मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥ ५ ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥ ६ ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः' ॥ ७ ॥

इत्यवेक्ष्यानामिकया चाङ्गुष्ठेन च निः प्रदक्षिणमालोड्य

'वसवस्त्वा गायत्रेण च्छन्दसा भक्षयन्तु' ॥ ८ ॥

इति पुरस्तान्निमार्ष्टि । एवं

'रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा भक्षयन्तु' ॥ ९ ॥

इति दक्षिणतो निमार्ष्टि ।

'आदित्यास्त्वा जागतेन च्छन्दसा भक्षयन्तु' ॥ १० ॥

इति पश्चान्निमार्ष्टि ।

'विश्वे त्वा देवा आनुष्टुभेन च्छन्दसा भक्षयन्तु' ॥ ११ ॥

इत्युत्तरतः । ततो मध्यात्प्रगृह्य त्रिरूर्ध्वं निक्षिपेत् । तत्र मन्त्रः

'भूतेभ्यस्त्वा' इति ॥ १२ ॥

ततो मधुपर्कप्राशनम् । तत्र मन्त्राः

'विराजो दोहोऽसि ॥ १३ ॥

इति प्रथमं प्राश्नीयात् ।

'विराजो दोहमशीय' ॥ १४ ॥ इति द्वितीयम् ।

'मयि दोहः पद्यायै विराजः ॥ १५ ॥ इति तृतीयम् ।

अथाचमनीयेनान्वाचामति

'अमृतापिधानमसि' ॥ १६ ॥ इति ।

'सत्यं यशः श्रीर्मयि श्रीः श्रयताम्' ॥ १७ ॥ इति द्वितीयमाचमनम् ।

ततो दात्राचान्तोदकाय गौर्गौरिति निवेदितां गां

'माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट' ॥ १८ ॥

२ ऊर्जः पृथिव्या अध्युत्थितोऽसि वनस्पते शतवल्शो विरोह ।
त्वया वयमिषमूर्जं मदन्तो रायस्पोषेण समिषा मदेम [तै० ब्रा० १।२।१।१३]
इत्युदुम्बरम् ॥ १२

३ ' गायत्रिया ह्रियमाणस्य यत्ते पर्णमपतत्तृतीयस्यै दिवोऽधि ।
सोऽयं पर्णः सोमपर्णाद्धि जातस्ततो हरामि सोमपीथस्यावरुद्ध्यै ॥
देवानां ब्रह्मवादं वदतां यदुपाशृणोः सुश्रवा वै श्रुतोऽसि ।
ततो मामाविशतु ब्रह्मवर्चसं तत्संभरंस्तदवरुन्धीय साक्षात् [तै० ब्रा० १।२
१।१४-१५] इति पर्णम् ॥ १३

४ ' यथा ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः ।
तामिमामप्रदाहाय शमीꣳ शान्त्यै हराम्यहम् ' [तै० ब्रा० १।२।१।१६]
इति शमीम् ॥ १४

५ ' यत्ते सृष्टस्य यतो विकङ्कतं भा आर्च्छज्जातवेदः ।
तया भासा संमित उरुं नो लोकमनुप्रभाहि ' [तै० ब्रा० १।२।१।१७]
इति वैकङ्कतम् ॥ १५

६ ' यत्ते तान्तस्य हृदयमाच्छिन्दञ्जातवेदो मरुतोऽद्भिस्तमयित्वा ।
एतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेह [तै० ब्रा० १।२।१
१८] इत्यशनिहतवृक्षशकलानि त्वचो वा ॥ १६

७ ' यत्पर्यपश्यत्सरिरस्य मध्ये उर्वीमपश्यज्जगतः प्रतिष्ठाम् ।
तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनꣳ हरामि [तै० ब्रा० १।२।१
९] इति पुष्करपर्णम् ॥ १७

८ संभारनिधानम् । अध्वर्युः संभारानाहृत्य तूष्णीं संभारानेकस्मिन्पात्रे संभृतान्कृत्वो-पासनदेशे निदध्यात् । तत्र मन्त्रः

१ 'यं त्वा समभरं जातवेदो यथाशरीरं भूतेषु न्यक्तम् ।
स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वान् [तै० ब्रा० १
२।१।२२] ॥ १८

९ उद्वासनम् । गृहाग्निगृहाद्विहारदेशे गमनम् । तद्यथा ।

२ 'यदिदं दिवो यददः पृथिव्याः संजज्ञाने रोदसी संबभूवतुः ।
ऊषान्कृष्णमवतु कृष्णमूषा इहोभयोर्यज्ञियमागमिष्ठाः' (तै० ब्रा० १ । २ । १ । ४) इत्यूषान् ॥

३ 'ऊतीः कुर्वाणा यत्पृथिवीमचरो गुहाकारमाखुरूपं प्रतीत्य ।
तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीराः'
(तै० ब्रा० १ । २ । १ । ५) इत्याखुकरीषम् ॥

४ 'ऊर्जं पृथिव्या रसमाभरन्तः शतं जीवेम शरदः पुरूचीः ।
वम्रीभिरनुवित्तं गुहासु श्रोत्रं त उर्व्यबधिरा भवामः' (तै० ब्रा० १।२। १ । ६) इति वल्मीकवपाम् ॥

५ 'प्रजापतिसृष्टानां प्रजानां क्षुधोपहत्यै सुवितं नो अस्तु ।
उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामि' (तै० ब्रा० १ । २ । १ । ७) इति सूदम् ॥

६ 'यस्य रूपं बिभ्रदिमामविन्दद्गुहा प्रविष्टां सरिरस्य मध्ये ।
तस्येदं विहतमाभरन्तोऽच्छम्बट्कारमस्या विधेम' (तै० ब्रा० १ । २ । १ । ८) इति वराहविहतम् ॥

७ 'याभिरदृंहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भर्त्रीम् ।
ता नः शिवाः शर्कराः सन्तु सर्वाः' (तै० ब्रा० १ । २ । १ । १०) इति शर्कराः ॥

८ 'अग्ने रेतश्चन्द्रं हिरण्यमद्भ्यः संभूतममृतं प्रजासु ।
तत्संभरन्नुत्तरतो निधायातिप्रयच्छन्दुरितिं तरेयम्' [तै० ब्रा० १।२।१ । ११ इति हिरण्यम् ॥ १०

द्वेष्याय रजतं प्रयच्छतीत्यग्रे वक्ष्यमाणत्वादत्र रजतस्य शकलत्रयात्मकः संग्रहः कार्यः । सुवर्णस्यापि तावानेव । इति पार्थिवाः संभाराः ।

७ अथ वानस्पत्यसंभाराहरणम् । अध्वर्युः

१ 'अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः संवत्सरं देवेभ्यो निलाय ।
तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीराः' [तै०ब्रा० १।२।१ १२ इत्यश्वत्थम् ॥ ११

२ ऊर्जः पृथिव्या अध्युत्थितोऽसि वनस्पते शतवल्शो विरोह ।
त्वया वयमिषमूर्जं मदन्तो रायस्पोषेण समिषा मदेम [तै० ब्रा० १।२।१।१३]
इत्युदुम्बरम् ॥ १२

३ ' गायत्रिया ह्रियमाणस्य यत्ते पर्णमपतत्तृतीयस्यै दिवोऽधि ।
सोऽयं पर्णः सोमपर्णाद्धि जातस्ततो हरामि सोमपीथस्यावरुध्यै ॥
देवानां ब्रह्मवादं वदतां यदुपाशृणोः सुश्रवा वै श्रुतोऽसि ।
ततो मामाविशतु ब्रह्मवर्चसं तत्संमरꣳस्तदवरुन्धीय साक्षात् [तै० ब्रा० १।२
१।१४-१५] इति पर्णम् ॥ १३

४ ' यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः ।
तामिमामप्रदाहाय शमीꣳ शान्त्यै हराम्यहम् ' [तै० ब्रा० १।२।१।१६]
इति शमीम् ॥ १४

५ ' यत्ते सृष्टस्य यतो विकङ्कतं भा आर्च्छज्जातवेदः ।
तया भासा संमित उरुं नो लोकमनुप्रभाहि ' [तै० ब्रा० १।२।१।१७]
इति वैकङ्कतम् ॥ १५

६ ' यत्ते तान्तस्य हृदयमाच्छिन्दज्जातवेदो मरुतोऽद्भिस्तमयित्वा ।
एतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेह [तै० ब्रा० १।२।१]
१८] इत्यशनिहतवृक्षशकलानि त्वचो वा ॥ १६

७ ' यत्पर्यपश्यत्सरिरस्य मध्ये उर्वीमपश्यज्जगतः प्रतिष्ठाम् ।
तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनꣳ हरामि [तै० ब्रा० १।२।१
९] इति पुष्करपर्णम् ॥ १७

८ संभारनिधानम् । अध्वर्युः संभारानाहृत्य तूष्णीं संभारानेकस्मिन्पात्रे संभृतान्कृत्वो-
पासनदेशे निदध्यात् । तत्र मन्त्रः

१ 'यं त्वा समभरं जातवेदो यथाशरीरं भूतेषु न्यक्तम् ।
स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वान् [तै० ब्रा० १
२।१।२२] ॥ १८

९. उद्वासनम् । गृह्याग्निगृहाद्विहारदेशे गमनम् । तद्यथा ।

यजमानः श्वासनिरोधं कृत्वा गृह्याग्निं गृहीत्वा गृहीतसंभारेणाध्वर्युणा सह विहारदेशं गच्छेत् ।

१० अग्निप्रतिष्ठापनम् । इषुमात्रावरं सर्वतः स्थण्डिलमुपलिप्योल्लिख्य षड्लेखा उदगायता पश्चात्प्रागायते नानान्तयोस्तिस्रो मध्ये तदभ्युक्ष्याग्निं प्रतिष्ठापयेत् [आप० गृह्य० १।३।१] ।

११ देवयजनोद्धननम् । अध्वर्युर्यज्ञियकाष्ठमादाय प्राचीनप्रवणमुद्धन्यात् [आप० श्रौ० ५।४।१] ।

उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमानस्य हन्तु ।

शिवा नः सन्तु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसाता [तै० ब्रा० १ २।१।१] ॥ १९

। १२ देवयजनाभ्युक्षणम् । अध्वर्युः

' शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

शंयोरभिस्रवन्तु नः ' (तै. ब्रा. १ । २ । १ । २) इत्यद्भिरभ्युक्ष्य ।

१३ शरणकरणम् । तस्मिन्नुदीचीनवंशं शरणं करोति (आप० श्रौ० ५ । ४ । १)॥

१४ अग्न्यायतनम् । अध्वर्युः शरणस्याग्रेण मध्यमं वंशं गार्हपत्यायतनं तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनं दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनं कुर्यात् (आप० श्रौ० ५ । ४ । २ । ५) ।

१५ वपनस्नाने यजमानः केशश्मश्रु वपते नखानि निकृन्तते स्नाति । एवं पत्नी केशवर्जम् (आप० श्रौ० ५ । ४ । ९) ।

१६ क्षौमवस्त्रधारणं जायापत्योः (आप० श्रौ० ५ । ४ । १०) ।

१७ ब्राह्मौदनिकाग्नेराधानम् । अध्वर्युरपराह्णेऽधिवृक्षसूर्ये वा गृह्याग्नेरर्धमाहृत्यापरेण गार्हपत्यं स्थण्डिलं कृत्वा तिस्रस्तिस्रो लेखा लिखित्वाद्भिरभ्युक्ष्याग्निं प्रतिष्ठापयेत् (आप० श्रौ० ५ । ४ । १२) ।

१८ समित्संपादनम् । अग्रे सूत्रकारेण विनियोगस्य वक्ष्यमाणत्वादेव केनापि कार्यम् ॥ तद्यथा ।

चित्रियाः समिधस्तिस्र आश्वत्थ्यो नव एव च ।
शमीमय्यो द्वादश स्युरौदुम्बरसमित्त्रयी ।
वैकङ्कतास्तथा तिस्रः शुष्का होमार्हतां गताः ॥

· चित्रियास्तु समिध आर्द्राः सपलाशाः प्रादेशमात्र्यः शितिभिगवत्यः। [शितिभिगवत्यः फलवत्यः] इतरा अपि प्रादेशमात्र्यः (आप० श्रौ० ५।५।१०)।

१९. जायापत्योर्हविष्यान्नभोजनं सर्पिर्मिश्रस्य पयोमिश्रस्य।

२०. सायं गृह्यहोमः। यजमान आचम्य 'ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायं गृह्यं परिचरिष्यामि'।

'अग्नये स्वाहा। अग्नय इदं न मम।

प्रजापतये स्वाहा। प्रजापतय इदं न मम'॥

आचम्य 'अनेन गृह्यपरिचरणेन परमेश्वरः प्रीयताम्'।

२१ ब्रह्मौदननिर्वापः। अध्वर्युरपरेण ब्रह्मौदनिकं पाजके निशायां ब्रह्मौदनं चतुःशरावं निर्वपेत् (आप० श्रौ० ५।५।१)। मन्त्राः

'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां

ब्रह्मणे प्राणाय जुष्टं निर्वपामि। २१

देवस्य त्वा० हस्ताभ्यां ब्रह्मणेऽपानाय जुष्टं निर्वपामि।

देवस्य त्वा० हस्ताभ्यां ब्रह्मणे व्यानाय जुष्टं निर्वपामि।

देवस्य त्वा० हस्ताभ्यां ब्रह्मणे जुष्टं निर्वपामि (आप०श्रौ० ५।५।२)।

(पाजकं वैदलं महानसोपकरणम्)।

२२ ब्रह्मौदनपचनम्। अध्वर्युः कश्चन कुशलो वा चतसृषूदपात्राणि स्थाल्यामासिच्य श्रपयति। तण्डुलान् प्रक्षाल्येन प्रक्षालयेत्। जीवतण्डुलमिव श्रपयेत् (आप० श्रौ० ५।५।४।७)।

२३ ब्रह्मौदनाग्नौ होमः। अध्वर्युरुदगुद्वास्योपस्तरणाभिघारणवर्जं दर्व्या ब्रह्मौदनादुद्धृत्य जुहुयात् (आप० श्रौ० ५।५।८)।

'प्र वेधसे कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे।

यतो भयमभयं तन्नो अस्त्वव देवान्यजे हेड्यान्स्वाहा' (तै०ब्रा० १।२।१।२३)।

यजमानः 'प्र वेधस इदं न मम'। २२

२४ ब्रह्मौदनस्य पृथक्पात्रेषु निक्षेपः। यजमानश्चतुर्धा ब्रह्मौदनं व्युद्धृत्य प्रभूतेन सर्पिषोपसिच्य स्थाल्यां शेषं निधत्ते (आप० श्रौ० ५।५।९)।

२५ ऋत्विग्भ्यो ब्रह्मौदनम्। यजमानोऽध्वर्यवे होत्रे ब्रह्मणेऽग्नीधे च प्रयच्छेत्। ते च हस्तेन गृहीतपिण्डा घृतपात्राश्च भवेयुः (आप० श्रौ० ५।५।९)।

यजमानः श्वासनिरोधं कृत्वा गृह्याग्निं गृहीत्वा गृहीतसंभारेणाध्वर्युणा सह विहारदेशं गच्छेत् ।

१० अग्निप्रतिष्ठापनम् । इषुमात्रावरं सर्वतः स्थण्डिलमुपलिप्योल्लिख्य षड्लेखा उदगायतां पश्चात्प्रागायते नानान्तयोस्तिस्रो मध्ये तदभ्युक्ष्याग्निं प्रतिष्ठापयेत् [आप० गृ० १।३।१]।

११ देवयजनोद्धननम् । अध्वर्युर्यज्ञियकाष्ठमादाय प्राचीनप्रवणमुद्धन्यात् [आप० श्रौ० ५।४।१]।

उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमानस्य हन्तु ।

शिवा नः सन्तु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसाता [तै० ब्रा० १ २।१।१]॥ १९

१२ देवयजनावोक्षणम् । अध्वर्युः

'शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

शंयोरभिस्रवन्तु नः' (तै. ब्रा. १ । २ । १ । २) इत्यद्भिरवोक्ष्य ।

१३ शरणकरणम् । तस्मिन्नुदीचीनवंशं शरणं करोति (आप० श्रौ० ५ । ४ । १)॥

१४ अग्न्यायतनम् । अध्वर्युः शरणस्याग्रेण मध्यमं वंशं गार्हपत्यायतनं तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनं दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनं कुर्यात् (आप० श्रौ० ५ । ४ । २ । ५) ।

१५ वपनस्नाने यजमानः केशश्मश्रु वपते नखानि निकृन्तते स्नाति । एवं पत्नी केशवर्जम् (आप० श्रौ० ५ । ४ । ९) ।

१६ क्षौमवस्त्रधारणं जायापत्योः (आप० श्रौ० ५ । ४ । १०) ।

१७ ब्राह्मौदनिकाग्नेराधानम् । अध्वर्युरपराह्णेऽधिवृक्षसूर्ये वा गृह्याग्नेर्धमाहत्यापरेण गार्हपत्यं स्थण्डिलं कृत्वा तिस्रस्तिस्रो लेखा लिखित्वाद्भिरवोक्ष्याग्निं प्रतिष्ठापयेत् (आप० श्रौ० ५। ४ । १२) ।

१८ समित्संपादनम् । अग्रे सूत्रकारेण विनियोगस्य वक्ष्यमाणत्वात् केनापि कार्यम् । तद्यथा ।

चित्रियाः समिधस्तिस्र आश्वत्थ्यो नव एव च ।

शमीमय्यो द्वादश स्युरौदुम्बरसमित्त्रयी ।

वैकङ्कत्यस्तथा तिस्रः शुष्का रोमार्तिं गताः ॥

१ प्रजा अग्ने संवासयाशाश्च पशुभिः सह ।

राष्ट्राण्यस्मा आधेहि यान्यासन्सवितुः सवे (तै. ब्रा. १।१।३३)॥

३३ यजमानव्रतचर्या । यजमानः ' अनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमि दैवीं वाचं यच्छामि ' । (तै. ब्रा. १ । २ । १ । ३८) ।

३४ अग्निप्रज्वालनम् । आप्रातः (अरणीनिष्टपनपर्यन्तं) यथाऽग्निर्न शाम्येत्तथा प्रज्वालयेत् (आप. श्रौ. ५ । ८ । ४) ।

१ शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् ।

उभयोर्लोकयोर्ऋद्ध्वातिमृत्युं तराम्यहम् (तै. ब्रा. १ । २ । १ । ३९)॥

॥ इति चतुर्दश्याम् आ-उपव्युषं कर्म ॥

१ अरणीनिष्टपनम् । अध्वर्युस्तस्मिन् ब्रह्मौदनाग्नौ अरणी निष्टपेत् (आप. श्रौ. ५ । ८ । ५) ।

१ जातवेदो भुवनस्य रेत इह सिञ्च तपसो यज्जनिष्यते ।

अग्निमश्वत्थादधि हव्यवाहꣳ शमीगर्भाज्जनयन्यो मयोभूः (तै. ब्रा. १ । २ । १ । ४०) ॥

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।

तं जानन्नग्न आरोहाथा नो वर्धया रयिम् । (तै. ब्रा. १।२।१।४१) ॥

'उत्तरं भस्मापोह्य' (आप. श्रौ. ५ । १० । ७) इति सूत्रणाद्ब्रह्मौदनिकाग्निमनुगमयेत् (शामयेदित्यर्थः)

२ अरण्यभिमन्त्रणम् । यजमानो निष्टप्ते अरणी अभिमन्त्रयेत् (आप. श्रौ. ५।८।६)

१ अग्नी रक्षाꣳसि सेधति शुक्रशोचिरमर्त्यः ।

शुचिः पावक ईड्यः (तै. ब्रा. २ । ४ । १ । ३२)

३ अरणीप्रतीक्षणम् । यजमान आह्रियमाणे अरणी प्रतीक्षेत (आप. श्रौ. ५।८।६)

१ मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणाम् ।

अन्तर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगाम् (तै. ब्रा १ । २ । १ । ३४) ॥

४ अरणीप्रदानम् । अध्वर्युर्यजमानाय प्रयच्छेत् ।

१ ' दोह्या च ते दुग्धभृच्चोर्वरी ते ते भागधेयं प्रयच्छामि (आप. श्रौ. ५।८।७) ।

२६ समिद्विवर्तनम् । अध्वर्युर्वामहस्तेन पात्रं गृहीत्वा पिण्डहस्तेनैव ब्रह्मौदनशेषं संकृष्य तस्मिन्नाज्यशेषमानीय तस्मिंश्चित्रियस्याश्वत्थस्य तिस्रः सपलाशा आर्द्राः प्रादेशमात्रीः फलवतीः समिधो विवर्तयेत् (आप० श्रौ० ५ । ५ । १०) ।

१ 'चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसꣳस्कृताः स्थ ।
प्रजापतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै (तै. ब्रा. १ । २ । १ । १९) ॥ २३

२७ समिदाधानम् । अध्वर्यु. समिध आदध्यात्

१ 'समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
आस्मिन्हव्या जुहोतन स्वाहा (तै० ब्रा० १ । २ । १ । २४) ॥

यजमानः 'अग्नय इद न मम' । २४

२ उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत ।
जुषस्व समिधो मम स्वाहा (तथैव २५) ॥

यजमानः 'अग्नय इद न मम' । २५

३ तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठ्य स्वाहा (तथैव २६) ॥

यजमानः 'अग्नय इद न मम' । २६

२८ वत्सतरीदानम् । यजमानः 'अध्वर्यो वत्सतरीत्रयनिष्क्रयद्रव्य ते दास्ये' (आप० श्रौ० ५ । ७ । १)

अत्र तूष्णीं प्रतिग्रहः । [वत्सतरी स्तनपानोपरता] ।

२९ ब्रह्मौदनप्राशनम् । सर्वे ऋत्विजो ब्राह्मणा ब्रह्मौदन प्राश्नीयुः (आप० श्रौ० ५ । ७ । २) ।

पूर्वगृहीताः पिण्डा. प्रथमग्रासा भवन्ति (आप० श्रौ० ५ । ५ । १०) ।

३० वरदानम् । यजमानः 'हे प्राशितवन्तो ब्राह्मणा समानवरनिष्क्रयद्रव्यं वो दास्ये' (आप० श्रौ० ५ । ७ । ३) । पूर्ववत्तूष्णीमेव प्रतिग्रहः ।

३१ अध्वर्योर्व्रतचर्या । अध्वर्यु. 'न माꣳसमश्नामि न स्त्रियमुपैमि' (आप०श्रौ० ५। ७ । १६) ।

३२ अजबन्धनम् । अध्वर्युरुत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नीयात् (आप० श्रौ० ५ । ७ । १७) ।

१० अनुष्ठानेऽग्नीनामानन्तर्यम् । एवमेवानुपूर्व्येणैवात ऊर्ध्वं कर्माणि कुर्यात् (आप. श्रौ. ५ । ९ । ३) ।

११ संभारविभागः । अध्वर्युः सिकतानामर्धं द्वैधं विभज्यार्धं गार्हपत्यायतने निवप्यार्धं दक्षिणाग्नेरर्धमाहवनीयस्य । एतेनैव कल्पेन सर्वान्पार्थिवान्निवपति (आप. श्रौ. ५ । ९ । ४–५) ।

१२ सिकतानिवपनम् । अध्वर्युः सिकता निवपेद्गार्हपत्यायतने (आप. श्रौ. ५ । ९ । ६) ।

१ अग्नेर्भस्मास्यग्नेः पुरीषमसि (तै. ब्रा० १ । २ । १ । ४३) ।

एतेनैव मन्त्रेण दक्षिणाग्नेराहवनीयस्यायतने निवपेत् ।

१३ ऊषानिवपनम् । अध्वर्युरूषान्निवपेत् (आप. श्रौ० ५ । ९ । ६) ।

१ संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् (तै. ब्रा. १ । २ । १ । ४४) ।

१४ ध्यानम् । अध्वर्युर्मनसा ध्यायेत्तस्य प्रकारः ।

यददश्चन्द्रमसि कृष्णं तदिहास्तु (आप. श्रौ. ५ । ९ । ७)

एवमूपनिवपनं ध्यानं च प्रत्यायतनं कार्यम् ।

१५ आखुकरीषनिवपनम् । अध्वर्युराखुकरीषं निवपेद्गार्हपत्ये (आप. श्रौ. ५।९।८) ।

१ उदेद्ध्नो अधिमातुः पृथिव्या विश आविश महतः सधस्थात् ।

आखुं त्वा ये दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपाम् (आप. श्रौ. ५ । ९ । ८) ।

एवं प्रत्यायतनम् ।

१६ वल्मीकवपानिवपनम् । अध्वर्युर्गार्हपत्यायतने वल्मीकवपां निवपेत् (आप. श्रौ. ५ । ९ । ८) ।

१ यत्पृथिव्या अनामृतꣳ संबभूव त्वे सचा ।

तदग्निरग्नये ददात्तस्मिन्नाधीयतामयम् (आप. श्रौ० ५ । ९ । ८) । ४६

[दक्षिणाग्न्यायतने] १ यदन्तरिक्षस्यानामृतꣳ संबभूव त्वे सचा ।

तदग्निरग्नये ददात्तस्मिन्नाधीयतामयम् (आप. श्रौ. ९ । ९ । ९) ॥

[आहवनीयायतने] १ यद्दिवोऽनामृतꣳ संबभूव त्वे सचा ।

तदग्निरग्नये ददात्तस्मिन्नाधीयतामयम् (आप. श्रौ. ५ । ९ । ९) ॥

१७ सूदनिवपनम् । अध्वर्युर्गार्हपत्यायतने सूदं निवपेत् ।

५ अरणीप्रतिग्रहणम्। यजमानोऽध्वर्युदत्ते अरणी हस्ताभ्यां गृह्णीयात् (आप. श्रौ. ५।८।८)

१ आरोहतं दशतꣳ शक्वरीर्ममर्तेनाग्न आयुषा वर्चसा सह।
ज्योग्जीवन्त उत्तरामुत्तराꣳ समां दर्शमहं पूर्णमासं यज्ञं यथा यजै (तै. ब्रा. १।२।१।२५)॥

६ अरण्यभिमन्त्रणम्। यजमानः प्रतिगृह्याभिमन्त्रयेत् (आप. श्रौ. ५।८।८)।

१ ऊर्वश्यस्युरायुरसि पुरूरवा अग्निरेतसौ गर्भं दधाथा ते वामहं ददे।
तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथः।
ते मत्प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः।
प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोके (तै. ब्रा. १।२।१।२६–२७)

अभिमन्त्रणमारभ्य यावन्मन्थनं हस्ते अरणी यजमानो धारयेत्।

१ मन्त्रान्तेन प्रदानं स्यान्मन्त्रान्ते च प्रतिग्रहः।
अरण्योर्युगपत्स्यातामध्वर्युयजमानयोः॥

७ जपः। अध्वर्युयजमानौ जपतः।

मन्त्राः १ मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय।
मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः॥ ३९
यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश।
तमात्मन्परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परायात् (तै.सं. ५।७।९।१–२)॥

८ अग्न्यायतनोद्धननम्। अध्वर्युर्गार्हपत्यायतनमुद्धन्यात्।

१ अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः।
अदादिदं यमो वसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै (तै. ब्रा. १।२।१।४२)

९ अवोक्षणम्। अध्वर्युरद्भिरवोक्षेत्। (आप. श्रौ. ५।९।१)।

१ शं नो देवी रभिष्टय आपो भवन्तु पीतये।
शंयोरभिस्रवन्तु नः (तै. ब्रा. १।२।१।२)

एवमेव दक्षिणाग्नेराहवनीयस्य चोद्धननावोक्षणे कुर्यात् (आप. श्रौ. ५।९।२)।

२५ हिरण्यनिवपनम्। अध्वर्युर्गार्हपत्यायतने सौवर्णं हिरण्यशकलमुत्तरतः संभारेषूपास्येत्।

'यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम्।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने (आप० श्रौ० ४।१०।३)॥

२६ हिरण्याभिमन्त्रणम्। अध्वर्युरुपास्तं हिरण्यमभिमन्त्रयेत्।

१ चन्द्रमग्निं चन्द्ररथं हरित्वचं वैश्वानरमप्सुषदं सुवर्विदम्।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः (आप० श्रौ० ५।१०।४)॥

२७ रजतप्रदानम्। अध्वर्युर्यजमानस्य द्वेष्यं पृष्ट्वा तस्मै रजतं प्रयच्छेत् (आप० श्रौ. ५।१०।४।)।

यदि द्वेष्यं नाधिगच्छेया दिशं द्वेष्यः स्यात्तेन निरस्येत्। (आप० श्रौ० ५।१०।५)।

२८ अपामुत्सर्जनम्। अध्वर्युरप उपस्पृशति। एवं दक्षिणाग्न्याहवनीयायतनेषु हिरण्योपासनाभिमन्त्रणनिरसनानि कुर्यात् (आप० श्रौ० ५।१०।६)।

२९ मन्थनदेशः। ब्रह्मौदनिकाद्भस्मापोह्य तस्मिन् शमीगर्भादग्निं मन्थेत्। प्राच्यां दिशि जातप्रकाशायाम् (आप० श्रौ० ५।१०।७)।

३० अरणिस्थापनम्। अध्वर्युर्दशहोत्रारणी समवदधाति। (आप० श्रौ० ५ १०।८)।

१ चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। आधीतं बर्हिः।
केतो अग्निः। विज्ञातमग्निः। वाचस्पतिर्होता। मन उपवक्ता।
प्राणो हविः। सामाध्वर्युः। (तै० आ० ३।१)।

३१ अश्वस्थितिः। मन्थनदेशसमीपेऽश्वं स्थापयेत्। यः को वा (आप. श्रौ. ५।१०।१०)।

३२ अग्निमन्थनम्। अध्वर्युरग्निं मन्थेत्। प्रतिप्रयत्नं मन्त्रावृत्तिः।

१ सहाग्नेऽग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया
सह पशुभिः सह ब्रह्मवर्चसेन (आप. श्रौ ५।९।१०।)।

३३ सामगानम्। ब्रह्मा मथ्यमाने शक्ते साकृतेः साम गायेत् (आप. श्रौ. ५।१०।११)।

धूमे जाते गाथिनः कौशिकस्य। 'अरण्योर्निहितो जातवेदा' इति च (आप० श्रौ० ५।१०।११)।

१ ' उत्सं समुद्रान्मधुमाꣳ ऊर्मिरागात्साम्राज्याय प्रतरां दधानः ।
अमी च ये मघवानो वयं चेषमूर्जं मधुमत्संभरेम ' (आप. श्रौ. । ५ । ९ । १०) ॥

एवं दक्षिणाग्न्याहवनीयायतनयोः ।

१८ वराहविहतनिवपनम् । अध्वर्युर्वराहविहतां मृदं गार्हपत्यायतने निवपेत् ।
१ इयत्यग्र आसीः (आप. श्रौ० ५ । ९ । १०) ।

एवमितरयोः पूर्ववत् ।

१९ शर्करानिवपनम् । अध्वर्युः शर्करा गार्हपत्यायतने निवपेत् ।
' अदो देवी प्रथमाना पृथग्यद्देवैर्न्युप्ता व्यसर्पो महित्वा ।
अदꣳहथाः शर्कराभिस्त्रिविष्टप्य(?)जयो लोकान्प्रदिशश्चतस्रः ' (आप० श्रौ० ५ । ९ । ११) ॥

२० द्वेष्यध्यानम् । अध्वर्युर्यजमानं तद्द्वेष्यं पृष्ट्वा ध्यायेत् । (आप०श्रौ०५।९।११)
एवं शर्करानिवपनं तदुत्तरं द्वेष्यध्यानं च प्रत्यायतने कार्यम् । निवपनं तु पूर्ववत् ।

२१ संभारव्यूहनम् । अध्वर्युः प्रत्यायतनं संभारान्प्रथयेत् ।
' ऋतꣳ स्तृणामि पुरीषं पृथिव्यामृतेऽध्यग्निमादधे सत्येऽध्यग्निमादधे । (आप० श्रौ० ५ । १० । १) ।

२२ वानस्पत्यसंभारससर्जनम् । अध्वर्युर्वानस्पत्यान्संसृजति (आप० श्रौ० ५ । १० । २) ।
' स या वः प्रियास्तनुवः सं प्रिया हृदयानि वः ।
आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो मम (तै० ब्रा० १ । २ । १ । ४६) ॥
सं वः सृजामि हृदयानि सꣳसृष्टं मनो अस्तु वः ।
सꣳसृष्टः प्राणो अस्तु वः ' (तै० ब्रा० १ । २ । १ । ४५)॥

२३ संभारविभागः । अध्वर्युः सिकतावद्विभजति ।

२४ संभारनिवपनम् । अध्वर्युः प्रत्यायतन वानस्पत्यान्निवपेत् । आप० श्रौ० ५ । १० । २] ।
' इतः प्रथम जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः ।
स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन् (तै० ब्रा० १ । ४ । ४) ॥

२५ हिरण्यनिवपनम्। अध्वर्युर्गार्हपत्यायतने सौवर्णं हिरण्यशकलमुत्पातः संभारेषू-पास्येत्।

'यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम्।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने (आप० श्रौ० ४।१०।३)॥

२६ हिरण्याभिमन्त्रणम्। अध्वर्युरुप्तास्तं हिरण्यमभिमन्त्रयेत्।

१ चन्द्रमग्निं चन्द्ररथं हरित्वचं वैश्वानरमप्सुषदं सुवर्विदम्।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः (आप० श्रौ० ५।१०।४)॥

२७ रजतप्रदानम्। अध्वर्युर्यजमानस्य द्वेष्यं पृष्ट्वा तस्मै रजतं प्रयच्छेत् (आप० श्रौ. ५।१०।४।)।

यदि द्वेष्यं नाधिगच्छेद्यां दिशं द्वेष्यः स्यात्तेन निरस्येत्। (आप० श्रौ० ५।१०।५)।

२८ अपामुपसर्जनम्। अध्वर्युरप उपसृजति। एवं दक्षिणाग्न्याहवनीयायतनेषु हिरण्योपासनाभिमन्त्रणनिरसनानि कुर्यात् (आप० श्रौ० ५।१०।६)।

२९ मन्थनदेशः। ब्राह्मौदनिकाङ्गारमपोह्य तस्मिन् शमीगर्भादग्निं मन्थेत्। प्राच्यां दिशि जातप्रकाशायाम् (आप० श्रौ० ५।१०।७)।

३० अरणिस्थापनम्। अध्वर्युर्देशहोत्रारणी समवदध्यात्। (आप० श्रौ० ५ १०।८)।

१ चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। आधीतं बर्हिः।
केतो अग्निः। विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता।
प्राणो हविः। सामाध्वर्युः। (तै० आ० ३।१)।

३१ अश्वस्थितिः। मन्थनदेशसमीपेऽश्वं स्थापयेत्। यः को वा (आप. श्रौ. ५।१०।१०)।

३२ अग्निमन्थनम्। अध्वर्युरग्निं मन्थेत्। प्रतिप्रयत्नं मन्त्रावृत्तिः।

१ सहाग्नेऽग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया
सह पशुभिः सह ब्रह्मवर्चसेन (आप. श्रौ ५।९।१०।)।

३३ सामगानम्। ब्रह्मा मथ्यमाने शक्तेः साकृतेः साम गायेत् (आप. श्रौ. ५। १०।११)।

धूमे जाते गाथिनः कौशिकस्य। 'अरण्योर्निहितो जातवेदा' इति च (आप० श्रौ० ५।१०।११)।

३४ अग्नेरभिमन्त्रणम्। अध्वर्युरभिमन्त्रयेत् (आप. श्रौ. ५।१०।१२)।

१ 'उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्।
आयुः प्रजाꣳ रयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोणे (तै. ब्रा. २।५।८)।

३५ चतुर्होतृवाचनम्। अध्वर्युर्यजमानं चतुर्होतॄन्वाचयेत् (आप. श्रौ. ५।११।१)।

१ चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। आधीतं बर्हिः।
केतो अग्निः। विज्ञातमग्निः। वाक्पतिर्होता। मन उपवक्ता
प्राणो हविः। सामाध्वर्युः (तै. आ. ३।१)।

पृथिवी होता। द्यौरध्वर्युः। रुद्रोऽग्नीत्। बृहस्पतिरुपवक्ता (तै. आ. ३।२)। अग्निर्होता। अश्विनाध्वर्यू। त्वष्टाग्नीत्। मित्र उपवक्ता (तै. आ. ३।३)। सूर्यं ते चक्षुः। वातं प्राणः। द्यां पृष्ठम्। अन्तरिक्षमात्मा। अङ्गैर्यज्ञम्। पृथिवीꣳ शरीरैः (तै० आ० ३।४) महाहविर्होता। सत्यहविरध्वर्युः। अच्युतपाजा अग्नीत्। अच्युतमना उपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ। अयास्य उद्गाता (तै. आ. ३।५)।

३६ जाताग्नेरभिमन्त्रणम्। अध्वर्युर्जातमग्निमभिमन्त्रयेत्।

१ अजनग्निः पूर्वः पूर्वेभ्यः पवमान शुचिः पावक ईड्यः (आप. श्रौ. ५।११।२)।

३७ वरदानम्। यजमान. 'अध्वर्यो वरनिष्क्रयद्रव्यं ते दास्ये' (आप. श्रौ. ५।११।३)।

३८ अभिप्राणनम्। यजमानो जातमग्निमभिप्राण्यात् (उपरि उच्छ्वसेत्) (आप. श्रौ. ५।११।५)।

१ प्रजापतेस्त्वा प्राणेनाभिप्राणिमि पूष्णः पोषेण मह्यम्।
दीर्घायुत्वाय शतशारदाय शतꣳशरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय (तै. ब्रा. १।२।१।११)।

३९ अभिग्रहणम्। अध्वर्युर्जातमग्निमञ्जलिनाभिगृह्णीयात् (न्युब्जमञ्जलिमग्नेरुपरि कुर्यात्) (आप. श्रौ. ५।११।६)। प्रत्यग्न्याधानमध्वर्युमाग्नीध्रं चान्वारभेते जायापती।

१ अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीडुजम्भम्।

दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभिसंरभन्ताम् ।(तै. ब्रा. १।२।१।५०)॥

४० उपसमिन्धनम्। अध्वर्युरग्निं यज्ञियकाष्ठैः प्रज्वालयति

'सम्राडसि विराडसि सारस्वतौ त्वोत्सौ समिन्धातामन्नादं त्वान्नपत्याय (आप० श्रौ. ५।११।६) इत्यनेन मन्त्रेण।

४१ प्रागुद्धरणम्। अध्वर्युरग्निं प्राञ्चमुद्धरेत् (आप. श्रौ. ५।११।६) (प्रागुद्धरणम्—ऊर्ध्वाञ्जलिना ग्रहणम्)

४२ गार्हपत्याधानम्। अध्वर्युरासीनः सर्वेषां ब्रह्मणामन्तेनाग्निं संभारेषु निदध्यात् (आप. श्रौ. ५।११।६)।

'भृगूणां त्वा देवानां व्रतपते व्रतेनादधामि'

इति भार्गवस्यादध्यात्।

'अङ्गिरसां त्वा देवानां व्रतपते व्रतेनादधामि'

इति यो ब्राह्मण आङ्गिरसः स्यात्तस्य आदध्यात्।

'आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि'

इत्यन्यासां ब्राह्मणीनां प्रजानामादध्यात् (आप. श्रौ. ५।११।७)।

भूर्भुवः—१।'भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा।

उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे॥

आयं गौः पृश्निरक्रमीदसनन्मातरं पुनः।

पितरं च प्रयन्त्सुवः' (तै. सं. १।५।३)॥

'घर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भुवत्।

छर्दिस्तोकाय तनयाय यच्छ' (तै. ब्रा. १।१।७॥)

यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः।

ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने (आप.श्रौ.५।१२।२)॥

'प्राणं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै (तै. ब्रा. १।२।१।६३)॥

'दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूनां तेजसा सर्वपशुमादधे। अग्ने गृहपतेऽहे बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय।

पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके।

यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामि (आप. श्रौ. ५।१२।२]॥

४३ सामगानम्। ब्रह्मा रथंतरं यज्ञायज्ञीयं च गार्हपत्याधानकाले गायेत् (आप श्रौ. ५ । ११ । ६)

यजमानोऽपि व्याहृत्यादि यास्ते शिवाः पर्यन्तं पठेदध्वर्युणा साकम्।

४४ अभिमन्त्रणम्। यजमानो गार्हपत्यमाधीयमानमभिमन्त्रयेत् (आप. श्रौ. ५ । १२ । ३)

१ सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत्।

अग्ने सपत्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि' (तै. ब्रा. १ । २ । १ ५४)॥

४५ वाचनम्। अध्वर्युर्धर्मशिरांसि यजमानं वाचयेत्।

१ घर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भुवत्॥ ७४॥

छर्दिस्तोकाय तनयाय यच्छ (तै० ब्रा० १ । १ । ७ । १)॥

वातः प्राणस्तदयमग्निः संप्रियः पशुभिर्भुवत्

स्वदितं तोकाय तनयाय पितुं पच (तै० ब्रा० १ । १ । ७ । २)॥

अर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः संप्रियः पशुभिर्भुवत्

यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रं तेन मे दीदिहि।

तेन त्वादधेऽग्निनाग्ने ब्रह्मणा (तै० ब्रा०१ । १ । ७ । ३ । ४)॥

४६ अग्न्यनुपस्पर्शनम्। आहितगार्हपत्यस्य शमनहोमेन विनोद्बोधनस्पर्शनादि न कार्यमेवमन्ययोरपि (आप. श्रौ. ५ । १६ । ३)।

४७ शमनहोमः। अध्वर्युस्तिलमाषव्रीहियवप्रियङ्ग्वणुगोधूमवेणुश्यामाकनीवारजर्तिलगवीधुकारण्यजमर्कटा एताः सर्वा ओषधीराज्यमिश्राः कृत्वा स्रुह्यामानीय पुनः पुनरादाय प्रतिमन्त्रं जुहुयात्। यथासंभवमोषधिलाभः।

या ते अग्ने पशुषु पवमाना प्रिया तनूर्या पृथिव्यां याऽग्नौ

या रथंतरे या गायत्रे छन्दसि तां त एतेनावयजे स्वाहा (आप. श्रौ. ५ । १६ । ४)।

यजमानः 'अग्नेः पवमानायै प्रियायै तन्वा इदं न मम'।

'या ते अग्नेऽप्सु पावका प्रिया तनूर्याऽन्तरिक्षे या वायौ या वामदेव्ये

या त्रैष्टुभे छन्दसि ता त एतेनावयजे स्वाहा' (आप० श्रौ० ५।१६।४)।

यजमान 'अग्ने पावकायै प्रियायै तन्वा इदं न मम'।

या ते अग्ने सूर्ये शुचि प्रिया तनूर्या दिवि यादित्ये या बृहति

या जागते छन्दसि ता त एतेनावयजे स्वाहा' (आप०श्रौ०५।१६।४)।

यजमान 'अग्ने शुच्यै प्रियायै तन्वा इदं न मम'।

४८ आहवनीयाधानम्। अध्वर्युरर्धोदिते सूर्ये आहवनीयमादधाति (आप० श्रौ० ५।१३।१)।

४९ इध्मादीपनम्। अध्वर्युर्गार्हपत्ये प्रणयनीयमाश्वत्थमिध्ममादीपयेत्सिकताश्चोपयमनी-रुपकल्पयेत् (पात्रेण सिकता गृह्णीयात्) (आप० श्रौ० ५।१३।३)। (उपयमनीः सिकताविशेषणम्)।

५० अग्न्युद्यच्छनम्। अध्वर्युरादीप्तमिध्ममुद्यच्छेत् (आप० श्रौ० ५।१३।४)।

ओजसे बलाय त्वोद्यच्छे वृषणे शुष्मायायुषे वर्चसे।

सपत्नतूरसि वृत्रतूः (तै० ब्रा० १।२।१।५६)॥

यस्ते देवेषु महिमा सुवर्गो यस्त आत्मा पशुषु प्रविष्टः।

पुष्टिर्या ते मनुष्येषु पप्रथे तया नो अग्ने जुषमाण एहि (तै०ब्रा०१।२।१)।

दिवः पृथिव्याः पर्यन्तरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः।

यत्र यत्र जातवेदः संबभूथ ततो नो अग्ने जुषमाण एहि (तै०ब्रा०१।२।१)

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः

(तै० सं० ४।६।३।१)॥

५१ अग्नेर्धारणम्। अध्वर्युरुद्यतमुपयत धारयेत् (आप० श्रौ० ५।१३।६)॥

(उपयतं सिकताभिरुपगृहीतम्)।

५२ वाचनम्। अध्वर्युर्यजमानमग्नेरनूरथस्य दक्षिणे कर्णे यदन्वाचयेत्।

१ या वाजिन्नग्ने पशुषु पवमाना प्रिया तनूस्तामारह।

या वाजिन्नग्नेऽप्सु पावका प्रिया तनूस्तामारह।

या वाजिन्नग्ने सूर्ये शुचिः प्रिया तनूस्तामारह (आप०श्रौ० ५।१३।७)।

५२ दक्षिणाग्न्याधानम् । आग्नीध्रो गार्हपत्याद्ग्निमाहृत्योर्ध्वज्ञुरासीनो दक्षिणमग्निमाद-ध्यात् (आप० श्रौ० ५ । १३ । ८) ।

' भृगूणा त्वा देवानां व्रतपते व्रतेनादधामि '

इति भार्गवस्यादध्यात् ।

' अङ्गिरसा त्वा देवाना व्रतपते व्रतेनादधामि '

इति यो ब्राह्मण आङ्गिरसः स्यात्तस्य आदध्यात् ।

१ आदित्याना त्वा देवाना व्रतपते व्रतेनादधामि ।

इत्यन्यासा ब्राह्मणीना प्रजानामादध्यात् (आप० श्रौ० ५ । ११ । ७) ।

' भुवः—भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा ।

उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥

आयं गौः पृश्निरक्रमीदसनन्मातरं पुनः ।

पितरं च प्रयन्सुवः ॥

त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये ।

प्रत्यस्य वह द्युभिः ' (तै. सं. १ । ५ । ३) ॥

वातः प्राणस्तदयमग्निः संप्रियः पशुभिर्भुवत् ।

स्वदितं तोकाय तनयाय पितुं पच (तै० ब्रा० १ । १ । ७ । २) ॥

२ यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः ।

ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने (आप० श्रौ० ५ । १२ । २) ।

ध्यानं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै (तै० ब्रा० १।२ । १ । ६ । ३) ।

---

१ एतदन्याहरणमाश्वलायनसूत्र ' एकयोनय इत्येके ' इति सूचितत्वात् । अतोऽत्राश्व-लायनसूत्रानुसारमनुष्ठानं कुर्वतां विकल्पोऽप्यस्ति. सह ।

बौधायनानामप्येवमेव । तदीय हि सूत्रम् ।

'अपि वा गार्हपत्यादेवान्वाहार्यपचनमावपाति ' (बौ० श्रौ० २ । १७)

आपस्तम्बसत्याषाढीयानां तु स्वसूत्रोक्त एव पक्षो युक्ततर इति । एव ह्यापस्तम्बसूत्रम् ।

' अथाग्नीध्रो लौकिकमग्निमाहरत्य मथित्वा वा ' इति स्वसूत्रोक्त पक्षं सत्यक्त्यान्यसूत्रोक्तपक्ष-मङ्गीकुर्वतो स्वसूत्रत्यागयुक्तप्रत्यवायः समापतित इत्यस्मतिप्रायेन ।

दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूनां
तेजसा सर्वपशुमादधे (तै० ब्रा० १ । २ । १ । ४९) ॥

'अग्नेऽपा मयोभुव सुशेव दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय ।
पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके ।
यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामि (आप०श्रौ०५।
१३।८)।

५४ सामगानम्। ब्रह्मा यज्ञायज्ञियं साम गायेत् (तथैव)।

५५ अग्न्युपस्पर्शनं शमनहोमश्च पूर्ववत्। तत्र शमनहोममाग्नीध्रो जुहुयात्।

५६ सामगानम्। ब्रह्मा वामदेव्यमभिगायेदाहवनीय उद्ध्रियमाणे (आप० श्रौ. ५।
१४।४)।

५७ साग्न्यभिप्रव्रजनम्। अध्वर्युयजमानाद्याः प्राञ्चः प्रव्रजेयुः (आप०श्रौ०५।१४।५)।
पत्न्यपि। मन्त्रस्त्वध्वर्युयजमानयोः।

१ प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे (तै०ब्रा०१।२।
१।५९)॥

विक्रमस्व महाँ असि वेदिषन्मानुषेभ्यः।
त्रिषु लोकेषु जागृहि प्रजया च धनेन च (तै०ब्रा० १।२।१।६१)॥
इमा उ मामुपतिष्ठन्तु रायं आभि प्रजाभिरिह संवसेय।
इहो इडा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेदः (तै०ब्रा०१।२।
१।५५)॥

५८ रथचक्रपरिवर्तनम्। ब्रह्मा विहारस्य दक्षिणतो रथं रथचक्रं वा वर्तयति। रथ-
चक्रं त्रिः परिवर्तयते तावति काले (आप० श्रौ० ५। १४। ६)।

५९ अग्निग्रहणम्। अध्वर्युर्जानुदघ्ने धारयमाणस्तृतीयमध्यनोऽग्निं हरेन्नाभिदघ्ने तृतीयमास्यदघ्ने तृतीयं न कर्णदघ्नमत्युद्गृह्णीयात् (आप० श्रौ० १।५।१४।८)।

६० अन्तसगमनप्रतिषेधः। अभ्यगारस्था नाभिमादित्य च व्यवेयुः (आप०श्रौ०५।
१४।१०)

६१ पार्श्वनियमनम्। अध्वर्युर्दक्षिणपार्श्वतो हस्ताभ्यां धारयन्नयेत्। (आप०श्रौ०५।
१४।११)

६२ वरदानम्। यजमानः 'अध्वर्यो वरनिष्क्रयद्रव्यं ते दास्ये' (आप० श्रौ०
५।१४।१२)।

६३ हिरण्यनिधानम्। अध्वर्युरर्धाधे हिरण्यं निधत्ते (आप०श्रौ०५।१४।१३)।

६४ हिरण्यातिक्रमणम्। अध्वर्युर्निहित हिरण्यमतिक्रामेत्

'नाकोऽस्ति मन्त्रः प्रतिष्ठासक्रमणः' (आप० श्रौ० ५। १४। १३)

६५ अश्वस्य संभाराक्रमणम्। अश्वनेताहवनीयदेशं प्राप्य प्राञ्चमश्वं दक्षिणेन पदोचरत संभारानाक्रमयेत् (आप० श्रौ० ५। १४। १४)।

१ अग्र्यस्यादिषाः पृतना अरातीस्तदग्निराह तदु सोम आह।

बृहस्पतिं सविता तन्मे अह पूषा माधात्सुकृतस्य लोके (त. स. ४। २ ८। १)॥

६६ अश्वस्य प्रदक्षिगमावर्तनम्। अश्वनेता प्रदक्षिगमश्वमावर्तयित्वा पुनरेवमाक्रामयेत् (आप० श्रौ० ५। १४। १५)।

यदक्रन्दः प्रथम जायमान उद्यन्त्समुद्रादुत वा पुरीषात्।

श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत जनिम तत्ते अर्वन् (तै० स० ४। २। ८। २)॥

६७ अश्वधारणम्। अश्वनेताहवनीयस्य पुरस्तात्प्रत्यङ्मुखमश्व धारयेत् (आप० श्रौ० ५। १४ १६)।

६८ जप। यजमानो जपति (५। १५। २-३)

'१ ये ते'अग्ने शिवे तनुवौ सम्राट् चाभिभूश्च ते मा विशतां ते मां जिन्वताम्।

ये ते' अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते मां विशतां ते मां जिन्वताम्॥

ये ते' अग्ने शिवे तनुवौ विराट् च स्वराट् च ते मा विशतां ते मां जिन्वताम्।

ये ते' अग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते मा विशतां ते मां जिन्वताम्॥

यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वादधे' (तै० ब्रा० १। १। ७)।

यास्ते अग्ने घोरास्तनुवः। क्षुच्च तृष्णा च। अस्नुक्चानाहुतिश्च। अशनया च पिपासा च। सेदिश्चामतिश्च। एतास्ते अग्ने घोरास्तनुवस्ताभिः। पाप्मानं गच्छ।

योऽस्मान्द्वेष्टि'। यं च वय द्विष्मः (तै० आ० ४। २२)

निरुक्च श्रीहितिश्च निर्हितिश्च। उष्णा च शीता च।

उग्रा च भीमा च सदाम्नी सेदिरनिरा। एतास्ते अग्ने घोरास्तनुवः।

ताभिः पाप्मानं गच्छ । योऽस्मान्द्वेष्टि यं च वयं द्विष्मः (तै० आ० ४ । २३) ॥

६९ अग्न्यभिमन्त्रणम् । अध्वर्युराहवनीयाधानार्थमाहृतमग्निं प्राङ्मुख एवाभिमन्त्रयेत् (आप० श्रौ० ५ । १५ । ५) ।

१ यदिदं दिवो यददः पृथिव्याः संविदाने रोदसी संबभूवतुः ।
तयोः पृष्ठे सीदतु जातवेदाः शंभूः प्रजाभ्यस्तनुवे स्योनः (तै. ब्रा. १ । २ १ । ६२ । ९६) ॥

७० आहवनीयाधानम् । अध्वर्युराहवनीयायतनस्य पुरस्तात्तिष्ठन्नाहवनीयमादध्यात् (आप. श्रौ. ५ । १५ । ६) । आधानकाले ब्रह्मा बृहच्चैत, वारवन्तीयं यज्ञायज्ञीय चेति सामानि गायेत् । तथैव । यथाध्वर्योर्मन्त्रसमाप्तेरनन्तरं सामगानं न स्यात्तथा प्रागेव गातव्यम् । सामगानमन्त्रसमाप्तिराधानं च युगपत् 'गीयमान आदधाति' इति सूत्रप्रामाण्यात् ।

' भृगूणां त्वा देवानां व्रतपते व्रतेनादधामि ।

इति भार्गवस्यादध्यात् ।

आङ्गिरसां त्वा देवानां व्रतपते व्रतेनादधामि ।

इति यो ब्राह्मण आङ्गिरसः स्यात्तस्यादध्यात् ।

आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि ।

इत्यन्यासां ब्राह्मणीनां प्रजानामादध्यात् ' (आप० श्रौ० ५ । ११ । ७) ।

भूर्भुवः सुवः ' भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा ।
उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥
आयं गौः पृश्निरक्रमीदसनन्मातरं पुनः ।
पितरं च प्रयन्त्सुवः ॥
त्रिꣳशद्धाम विराजति वाक्पतङ्गाय शिश्रिये ।
प्रत्यस्य वह द्युभिः ॥

१ अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषः सुवः ' (तै०सं०१ । ५ । ३) ।

अर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः संप्रियः पशुभिर्भुवत् ।
यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रं तेन मे दीदिहि
तेन त्वादधेऽग्निनाग्ने ब्रह्मणा (तै. ब्रा. १ । १ ७) ।

यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः ।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने (आप०श्रौ०५।१५।६)
अपानं त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै (तै०ब्रा०१।२।१।१३)
दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूना तेजसा सर्वपशुमादधे
(आप० श्रौ० ५ । १५ । ६) ॥
अग्ने सम्राडजैकपादाहवनीयादिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय
(तथैव) ।

पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके ।
यो नो अग्ने निष्टयो योऽनिष्टयोऽभिदासतीदमहं तं त्वयाभिनिदधामि (तथैव)

७१ अभिमन्त्रणम् । यजमान आधीयमानमभिमन्त्रयेत् (तथैव ५ । १६ । १) ।
१ आनशे व्यानशे सर्वमायुर्व्यानशे (तै० ब्रा० १ । १ । ७) ।
अहं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि ।
ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेदः (तथैव १ । २
१ । ५२) ।

७२ अनुवर्तनम् । यजमानो गार्हपत्याधानानुवर्तनवदनुवर्तयेत् (आप० श्रौ. ५ । १६ । २)

७३ आग्न्यनुपसर्शनं शमनहोमं च पूर्ववदध्वर्युः कुर्यात् । (तथैव ५ । १ । ३) ।

७४ समिदाधानम् । अध्वर्युस्तिस्र आश्वत्थीः समिध एकैकस्मिन्नादध्यात् (तथैव ५ । १७ । २)

१ अग्न आयूंषि पवस आसुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाꣳ स्वाहा (तै० सं० १ । ३ । १४) ॥

यजमानः ' अग्नये पवमानायेदं न मम ' ।

१ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
दधत्पोषꣳ रयिं मयि स्वाहा (तथैव) ॥

यजमानः ' अग्नये पवमानायेदं न मम ' ।

१ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।

तमीमहे महागयꣳ स्वाहा (तै० आ० २ । ५) ॥

यजमानः ' अग्नये पवमानायेदं न मम '

प्रत्यृचं गार्हपत्ये दक्षिणाग्नावाहवनीये च तिस्रस्तिस्रस्तिस्रः समिधः शमीमय्यो घृतान्वक्तास्तिसृभिस्तिस्र एकैकस्मिन्नादध्यात् (आ० श्रौ० सू० ५ । १७ । ४) ।

शमीमय्यः शमीमयीरित्यर्थः ।

१ समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानट् ।

घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः स्वाहा (तै०आ० १० । १२) ।

यजमानः—' आदित्यात्मने ब्रह्मण इदं न मम ' ।

वयं नाम प्र ब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः ।

उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्स्वाहा (तै० आ० १० । १२) ॥

यजमानः—' यज्ञात्मने ब्रह्मण इदं न मम ' ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ आविवेश स्वाहा (तै० आ० १० । १२) ॥

यजमानः—' यज्ञात्मने ब्रह्मण इदं न मम ' ।

इति प्रत्यृचं गार्हपत्ये दक्षिणाग्नावाहवनीये च नव समिधः । एवं नानावृक्षीया घृतान्वक्ताः । तत्र—औदुम्बरीमादध्यात् । (आ० श्रौ० ५ । १७ । ५) ।

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।

त्वाꣳ शश्वन्त उपयन्ति वाजाः स्वाहा । (तै० सं० ४ । ६ । ५ ।)

यजमानः—' अग्नय इदं न मम ' । वैकङ्कतीमादध्यात् (आ० श्रौ० सू० ५ । १७ । ५) ।

१ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।

यस्माद्योनेरुदारिथा यजे तं प्रत्वे हवीꣳषि जुहुरे समिद्धे स्वाहा (तै० सं० ४। ६ । ५) ॥

यजमानः—' अग्नय इदं नमम ' । शमीमयीमादध्यात् (५ । १७ । ५ ।)

तां सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्।

यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गां स्वाहा (तै० सं० ४।६।५)

यजमानः—'सवित्र इदं न मम'। एवं दक्षिणाग्नावाहवनीये च मिलित्वा समिधो नव।

७५ प्राजापत्यहोमः। अयमग्निहोत्रस्थानीयः। अध्वर्युर्द्वादशगृहीतेन स्रुचं पूरयित्वा प्रजापतिं मनसा ध्यायन् जुहुयात् (आ० श्रौ० ५।१७।७) 'प्रजापतये स्वाहा'।

यजमानः—'प्रजापतय इदं न मम'।

७६ द्वेष्याय प्रेषणम्। यजमानो—घोरां जपेत्

यास्ते अग्ने घोरास्तनुवः। क्षुच्च तृष्णा च। अस्नुक्चानाहुतिश्च।

अशनया च पिपासा च सेदिश्चामतिश्च।

एतास्ते अग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ।

योऽस्मान्द्वेष्टि यं च वयं द्विष्मः (तै० आ० ४।२२)।

स्निक्च स्नीहितिश्च स्निहितिश्च। उष्णा च शीता च।

उग्रा च भीमा च सदाम्नी सेदिरनिरा।

एतास्ते अग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ।

योऽस्मान्द्वेष्टि यं च वयं द्विष्मः (तै० आ० ४।२३)

७७ पूर्णाहुतिहोम.—अध्वर्युर्द्वादशगृहीतेन स्रुचं पूरयित्वा सप्तर्चा पूर्णाहुतिं जुहुयात् (आ० श्रौ० सू० ५।१८।१)

१ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि।

सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा (तै० सं० ४।६।५)॥

यजमानः—'अग्नये सप्तवत इदं न मम'।

७८ वरदानम्। यजमानः—'अध्वर्यो वरनिष्क्रयद्रव्यं ते दास्ये'।

७९ जपः। यजमानः शिवां जपेत्।

ये ते अग्ने शिवास्तनुवस्ताभिस्त्वादधे इत्यन्तम् (तै० ब्रा० १।१।७)।

८० प्रायश्चित्तहोमः। अध्वर्युराहवनीये सर्वाणि प्रायश्चित्तानि।

यद्यग्न्याधेये सूर्योऽस्तमियात् इत्यादीन्याहुतीर्जुहुयात् (आ० श्रौ० ९।१२।३)

१ उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् ।

देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमꣳ स्वाहा । (तै० सं० ४ । १ । ७) ।

यजमानः–' सूर्यायेदं न मम ' । सर्वत्राग्न एवमेव त्यागः ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।

दृशे विश्वाय सूर्यꣳस्वाहा (तै० सं० १ । ४ । ४३) ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा (तै०सं० १ । ४ । ४३) ।

अस्मिन्कर्मणि ज्ञाताज्ञातकृतदोषपरिहारार्थं वक्ष्यमाणं प्रायश्चित्तमध्वर्युर्जुहुयात् ।

१ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु ।

अग्ने तदस्य कल्पय त्वꣳहि वेत्थ यथातथꣳस्वाहा (तै० ब्रा० ३।७ ११)

यजमानः–' अग्नय इदं न मम ' ।

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः ।

अग्ने तदस्य कल्पय त्वꣳहि वेत्थ यथातथꣳस्वाहा (तै० ब्रा० ३ । ७।११)॥

त्यागः पूर्ववत् ।

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः ।

अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाꣳऋतुशो यजाति स्वाहा (तै० ब्रा० ३ । ७ । ११) त्यागः पूर्ववत् ।

कर्मान्तरितकर्मविपर्यासार्थम्

१ त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽव यासिसीष्ठाः ।

यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्स्वाहा (तै०सं० २ । ५ । १२)॥

यजमानः–'अग्नीवरुणाभ्यामिदम् ' ।

१ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।

अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि स्वाहा (तै० सं० २ । ५ । १२)॥

यजमान'–' अग्नीवरुणाभ्यामिदं न मम ' ।

१ त्वमग्ने अयास्ययासन्मनसा हितः ।

अयासन्हव्यमूहिषेऽया नो धेहि भेषजꣳ स्वाहा (तै० ब्रा० २ । ४ । १)॥

यजमानः-' अयसेऽग्नय इदं न मम '।

-वाङ्नियमलोपप्रायश्चित्तार्थम्

२ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।

समूढमस्य पाꣳसुरे स्वाहा (तै० सं० १ । २ । १३) ॥

यजमानः—'विष्णव इदं न मम ' ।

२ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्स्वाहा तै० सं० १ । ८ । ६) ॥

यजमानः—त्र्यम्बकायेदं न मम ॥

स्वराक्षरवर्णादिलोपप्रायश्चित्तार्थम्

१ त्वामिर्गीर्भिर्यदत्तो न ऊनमाप्यायय हरिवो वर्धमानः ।

यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम स्वाहा (तै० ब्रा० ३ । ७ । ११) ॥

यजमानः—' इन्द्राय हरिवते वर्धमानायेदं न मम ' ।

ऋत्विग्दौष्ट्यप्रायश्चित्तार्थम्

१ यद्विद्वाꣳसो यदविद्वाꣳसो मुग्धाः कुर्वन्त्यृत्विजः ।

अग्निर्मा तस्मादेनसः श्रद्धा देवी च मुञ्चताꣳ स्वाहा । (आ० श्रौ० सू० ३ । १२ । १) ॥

यजमान —'अग्नये श्रद्धायै देव्या इद न मम ' ॥

अग्न्युपघातप्रायश्चित्तार्थम्

२ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।

घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा—

(तै० सं० ४ । २ । ३)

यजमानः—' अग्नये वसुनीथायेदं न मम ' ॥

आप. श्रौ. सू. (९ । १६ । ४)

आप. श्रौ. सू. (९ । १६ । ४)	भूः स्वाहा	यजमानः—'अग्नय इदं न मम '
	भुवः स्वाहा	,,—'वायव इद न मम '
	सुवः स्वाहा	,,—'सूर्यायेदं न मम '
	भूर्भुवः सुवः स्वाहा	,,—'प्रजापतय इदं न मम ' ।

यजुर्भेषपाधिवार्थे दक्षिणाग्नौ जुहुयात् (९ । १६ । ४)॥

स्रुवः ' स्वाहा वायव इदं न मम '।

८१ आहिताग्नेर्व्रतसंकल्पः।

यजमानः—'अनृतं न वदिष्यामि। अनाधार्से ब्राह्मणं न वासयिष्ये ' सूर्योदनातिथिं वसत्यै नापरोत्स्ये। शूद्रीसपकस्य नाशिष्ये। छिन्नं दारु नाग्नावाधास्ये। अन्तर्नाग्नो नाशिष्ये स्वकृत इरिणे नोष्ये पुण्यः स्याम्। हिंकृत्य स्त्रियमुपैष्यामि। सायमहुतावहुतायां नाशिष्ये। प्रातराहुतावहुतायां नाशिष्ये। नक्तमन्नादन्यन्न दास्ये। एतस्मिन्संवत्सरे पशुनानिष्ट्वा मांसं न भक्षयिष्ये (आ० श्रौ० ५ । २५ । ३—१९)।

८२ होमः। अध्वर्युः।

१ ये अग्नयो दिवो ये पृथिव्याः समागच्छन्तीषमूर्जं दुहानाः।
ते अस्मा अग्नयो द्रविणं दत्त्वेह्याः प्रीता आहुतिभाजो
भूत्वा यथालोकं पुनरस्तं परेत स्वाहा (आ० श्रौ० ५ । ८ । १)॥

यजमानः—' अग्निभ्य इदं न मम '।

८३ उपस्थानम्।

यजमान उपतिष्ठते

१ ' अथर्वपितुं मे गोपायास्मे प्राणेन संमितम्।
त्वया गुप्ता इषमूर्जं मदन्तो रायस्पोषेण समिषा मदेम ' (आ० श्रौ० ५।१८।२)॥

इत्यन्वाहार्यपचनं (दक्षिणाग्निम्)।

१ ' नर्य प्रजां मे गोपाय मूलं लोकस्य संततिम्।
आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहम् '' (आ० श्रौ० ५।१८।२)॥

इति गार्हपत्यम्।

१ ' शंस्य पशून्मे गोपाय विश्वरूपं धनं वसु।
गृहाणां पुष्टिमन्तं तां ते परिददाम्यहम् ''। (आ० श्रौ० ५।१८।२)॥

इत्याहवनीयम्॥

१ ' पञ्चधाग्नीन्व्यक्रामद्विराट् सृष्टा प्रजापतेः।
ऊर्ध्वारोहद्रोहिणी योनिरग्नेः प्रतिष्ठितिः (आ० श्रौ० ५ । १८ । २

इति सर्वानग्नीनुपतिष्ठेत।

इत्याधानप्रयोगः।

आग्नेयादीष्टयः । तत्राग्नेयेष्टिः ।

यजमानः सपत्नीकः प्राणानायम्य 'परमेश्वरप्रीत्यर्थमाग्नेयं हविर्निर्वप्स्ये' । विद्युदसि० । पौर्णमासं तन्त्रम् । अष्टौ कपालानि । अग्निर्देवता । आसादनान्ते वल्हिसामनसीभ्यामग्नीन्यजमान उपतिष्ठते । प्रोक्षणादि मन्त्रेणाभिघारणम् । प्रियेणेत्यासादनम् । यज्ञोऽसि० । न पार्वणहोमः । नारिष्ठादि । त्रिहव्य प्राशित्रम् । वक्ष्यमाणाधानदक्षिणा । वस्त्रदाने च । अग्नय इदम्० ॥ अग्नेरहमुज्जितिमनूज्जेषम् । अगन्माग्नीनग्नीनगन्म संदशस्त इत्यादि । यज्ञो बभूव यज्ञशंयुमवर्जम् । सिद्धमिष्टिः संतिष्ठत । अथाज्याहुतयः । अग्नये पवमानाय स्वाहा । यज० । अग्नये पवमानायेदम्० । अग्नये पावकाय स्वाहा । यज० । अग्नये पावकाये-दम्० ॥ अग्नये शुचये स्वाहा । यज० । अग्नये शुचय इदम्० । सोमाधाने आज्याहुतीनां निवृत्तिः ।

अथेष्टित्रयपक्षो लिख्यते ॥

सपत्नीकयजमानः संकल्पं करोति । इष्ट्या यक्ष्ये । विद्युदसि० । अद्य यज्ञाय० । यस्यां तिथौ तस्याः कीर्तनम् । ऐष्टꣳ हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । बर्हिराहृत्य व्रतप्रवेशः । परिस्तरणम् । देवा देवेषु । पात्रासादनकाले द्वात्रिंशत्कपालानि । अन्वाहार्यस्थालीवर्जपवित्राणि प्रकृतिवत् । निर्वपणकाले । अग्नये जुष्टं निर्व० । अग्नये पवमानाय जुष्टं नि० । अग्नये पावकाय जुष्टं नि० । अग्नये शुचये जुष्टं नि० । इदं देवा-नामित्यादि० । अग्ने ' हव्यꣳ रक्षस्वाग्ने पवमान हव्यꣳ रक्षस्वाग्ने पावक हव्यꣳ रक्षस्वाग्ने शुचे हव्यꣳ रक्षस्व ' इत्युपसादनम् । सशूकायामित्यादि । प्रोक्षण्यभिमन्त्रणान्तं कृत्वा न प्रोक्षणम् । अथ यजमानः कृत्तिसामनसीभ्यामग्नीनुपतिष्ठते । तत्र मन्त्र ' कल्पेतां द्यावा-पृथिवी कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथक् मम ज्यैष्ठ्याय सव्रताः । येऽग्नयः समनसोऽन्तरा द्यावापृथिवी । वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंवि-शन्तु ' । शैशिरावृतू इति शैशिरे । प्रोक्षादिकर्म प्रतिपद्यते । ' अग्नये वो जुष्टं प्रोक्षाम्य-ग्नये पवमानाय वो जुष्टं प्रोक्षाम्यग्नये पावकाय वो जुष्टं प्रोक्षाम्यग्नये शुचये वो जुष्टं प्रोक्षामि ' । एवमधिवापः संवापश्च । अग्नये जुष्टमधिवपामि । अग्नये जुष्टꣳ संवपामीति विशेषः । पुरोडाशपिण्डं कृत्वा । यथाभाग व्यावर्तध्वम् । व्यावर्तेथाम् । इदमग्नेः पावकस्य । इदमग्नेः शुचेः । मन्त्रेणाभिघारणम् । प्रियेणेत्यासादनम् । यज्ञोऽसीति चतुर्णाम् । अयं यज्ञ इत्यादि पौर्णमासवत् । प्रचरणकाले । आग्नेयस्य प्रकृतिवत् । अग्नये पवमानायानुब्रूहि । अग्निं पवमानं यज । अग्नये पवमानायेदं० । अग्नेः पवमानस्याहं देवयज्ययान्नादो भूयासम् । अग्नये पावकायानुब्रूहि । अग्निं पावकं यज । अग्नये पावकायेदं० । अग्नेः

पावकस्याहं० मादो भूयासम् । अग्नये शुचयेऽनुब्रूहि । अग्निं शुचिं यज । अग्नये शुचय इदं० । अग्नेः शुचेरहं देवयज्यया ऽन्नादो भूयासम् । न पार्वणहोमः । नारिष्ठादि । सर्वेषां शिरोजनप्राशित्रचतुर्धाकरणानि । चतुर्धाकरणमक्षणान्ते आधानदक्षिणादानम् । 'आग्नी-ध्रजपूर्णपात्रसानसूत्रोपबर्हणनिष्क्रयद्रव्यं ते दास्ये । ब्रह्मन्नश्वनिष्क्रयद्रव्यं ते दास्ये । अध्व-र्यो अनडुन्निष्क्रयद्रव्यं ते दास्ये । होतर्धेनुनिष्क्रयद्रव्यं ते दास्ये ' । ऋत्विजो वासो गोमि-थुनद्वयनवरथगोनिष्क्रयद्रव्यं यो दास्ये ' । अध्वर्यवे परिहितवस्त्रदानं च । तूष्णीमेव प्रतिग्रहः । ब्रह्मन्प्रस्थास्याम इत्यादि ।

अग्ने पवमानस्याहमुज्जितिं० । अग्ने पावकस्याहमुज्जितिं० । अग्नेः शुचेरहमुज्जितिं० । अगन्मास्मीनग्नीनगन्म संदशास्त इत्यादि । यज्ञो बभूव यज्ञसंधमरर्जम् । सिद्धमिष्टिः संति-ष्ठते । अपारेस्यग्नीन् । यजमान इष्ट्या यक्ष्ये इति संकल्पयेत् । विद्युदसि । तेऽध्वेवा-ग्निन्वाधानादि० । ऐष्टकहविः । ऐन्द्राग्नस्य मुख्यत्वादामावास्यं तन्त्रम् । अन्वाधाय व्रतप्रवेशः । सप्तदश सामिधेन्य । वेदं कृत्वा वेदिः । पात्रप्रयोगकाले एकादश पात्राणि स्थाली स्रुवश्च इदमन्वाहार्यस्थालीवर्जमिनराजि प्रकृतिवत् । निर्वपणकाले इन्द्राग्निभ्यां जुष्टं निर्वपामि । अदित्यै जुष्टं निर्वपामि । इन्द्राग्नी हव्यश्रक्षेयामदिते हव्यश्रक्षस्व । उत्करे त्रिर्निनीय । यथाभागं व्यावर्तेथाम् । इदमिन्द्राग्न्योः पुरोडाशीयम् । इदमदित्या इति चर्वर्थम् । कृष्णाजिनादानादि । इन्द्राग्निभ्यां जुष्टमधिवपामि । कपालानामुपधानकाले मन्त्रेणोपधाय । तूष्णीं त्रीणि । ध्रुवोऽसीति चरुस्थालीमुपदधाति । पिष्टानुपूय तण्डुलानुपुनाति । देवस्त्वा सवितेति । पूतमुत्पूय पश्चात्पुनाति । उदकवत्यां स्थाल्यां पूतमासिञ्चेत् । पुरोडाशमधिश्रित्य तेनैव मन्त्रेण तण्डुलानावपति । प्रथनादि पुरोडाशस्यैव । द्वयोः पर्यग्निकरणम् । अदित्यै जुष्टमभिघारयामि । आर्द्रो भुवनस्येति चरोरुद्वासनम् । विशेषेणासादनम् । यज्ञोऽसि । अयं यज्ञः । यो नः कनीयः । मम ग्ने० । यज्ञहोता० । इध्मेनैवासमाभिमर्शनम् । प्रकृतिवदैन्द्राग्नस्य प्रचारः । अदित्या अनुब्रूहि । अदितिं यज । अदित्या इदम्० । अदित्या अहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय । न पार्वणहोमः । नारिष्ठादि चरुं विरुज्य प्राशित्रम् । चतुर्धाकरणकाले शम्यं चरुं भक्षणे परिहरेत् । तमृत्विजो भक्षयन्ति । इदं यजमानस्येति निर्दिश्य वेदेन परिहरति । गोनिष्क्रयद्रव्यमन्तर्वेद्यामामाय । ब्रह्मन्महासीति० । महाभिमृशति । ब्रह्म जिन्वतं० । सदस्यस्तुसामधीयमाणम् । तदाधार पृथिवीमन्तरिक्षं दिवं च तेन गोनिष्क्रयद्रव्येणाति० । दक्षिणा एत० । इदं यो गोनिष्क्रयद्रव्यं यथाभागं प्रतिगृह्णीध्वम् । नमो देवि दक्षिणे उदानत्वाङ्गिरसः प्रति-

गृह्णातु । तेनामृतत्वमश्यामित्यादि प्रतिग्रहमन्त्रः । अगन्माग्नीनगन्म संदृशस्त इत्यादि । यज्ञो बभूव यज्ञशंयमवर्जम् । सिद्धमिष्टिः संतिष्ठते । अपरिसमाप्याग्नीन् । यज० । इष्टया यक्ष्ये । विद्युदसि० । तेष्वेवाग्निष्वन्वाधानादि । एष ह्यविः । पौर्णमास तन्त्रम् । बर्हिराहृत्य व्रतप्रवेशः । पञ्चदश सामिधेन्यः । पात्रासादनकाले द्वादशकपालानि स्थाली च । शिष्टानि सान्वाहार्यस्थालीनि प्रकृतिवत् । अग्नाविष्णुभ्यां जुष्टं निर्व० । अग्नीषोमाभ्यां जु० । विष्णवे शिपिविष्टाय जु० । 'अग्नाविष्णू हव्यꣳ रक्षेथामग्नीषोमौ हव्यꣳ रक्षेथाम् । विष्णो शिपिविष्ट हव्यꣳ रक्षस्व' इत्युपसादनम् । उत्करे त्रिर्निनीय । यथाभागं व्यावर्तध्वम् । 'इदमग्नाविष्ण्वोरग्नीषोमीययोः' इति पुरोडाशार्थान् । 'इदं विष्णोः शिपिविष्टस्य' इति चर्वर्थान् । कृष्णाजिनादानादि । अग्नाविष्णुभ्यां जुष्टमधिवपाम्यग्नीषोमाभ्यां जुष्टमधिवपामि धान्य० । कपालानि मन्त्रेणाष्टावुपधाय तूष्णीं त्रीणि । एवमग्नीषोमीयस्य । ध्रुवोऽसीति स्थालीमासाद्य । अधिश्रयणादि पूर्ववत् । पुरोडाशौ तूष्णीमभिघार्य विष्णवे शिपिविष्टाय जुष्टमभिघारयामि । त्रिवृणेत्यासादनम् । यज्ञोऽस्यय यज्ञो ममाग्ने चतुर्होता प्रचरणकाले अग्नाविष्णुभ्यामनुब्रूहि । अग्नाविष्णू यज । अग्नाविष्णुभ्यामिदं० । अग्नाविष्ण्वोरहं देवयज्यया वृत्रहा भूयासम् । अग्नीषोमीयस्य प्रकृतिवत् । विष्णवे शिपिविष्टायानुब्रूहि । विष्णुं शिपिविष्टं यज । विष्णवे शिपिविष्टायेदं० । विष्णोः शिपिविष्टस्याहं देवयज्ययान्नादो भूयासम् । न पार्वणहोमः । नारिष्ठादि । अन्वाहार्यो दक्षिणा । अगन्माग्नीनगन्म संदृशस्त इत्यादि । यज्ञो बभूव यज्ञशंयमवर्जम् । सिद्धमिष्टिः संतिष्ठते ।

इति इष्टित्रयपक्षः समाप्तः ।

अथेष्टिद्वयपक्षाश्रयेण प्रयोगो लिख्यते ।

आदित्यं घृते चरुं सप्तदशसामिधेनीकं धेनुदक्षिणं सर्वेषामनुनिर्वाप्याणां स्थाने वाजसनेयिनः समामनन्ति । पूर्वोक्तामाग्नेयेष्टिं समाप्यापरिसमाप्याग्नीनाज्याहुतीर्न जुहुयात् । यजमा० । सर्वेषामनुनिर्वाप्याणां स्थाने । इष्टया यक्ष्ये । विद्युदसि० । तेष्वेवाग्निष्वन्वाधानादि । एष ह्यविः । पौर्णमासं तन्त्रम् । सप्तदश सामिधेन्यः । पात्रप्रयोगकाले स्थाली स्रुवश्च द्वंद्वम् । शम्यादृषदुपलान्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् । उपवेषनपात्रं च । पवित्रकरणादि । अदित्यै जुष्टं निर्वपामि । अदिते हव्यꣳ रक्षस्व नोवै समाहन्नेः । हस्तेन तुषोपवापः । ध्रुवोऽसीति स्थाल्यासादनम् । तण्डुलानुत्पूय घृतमुत्पूयापधोत्पूय स्थाल्यामानीय घर्मोऽसीति तण्डुलानावपति । अन्तरितꣳ रक्षः । अविदहन्तः श्रपयत । स्थ्यादानादि । सूर्यज्योति० ।

अदित्यै जुष्टमभिघारयामि । आर्द्रो भुवनस्येत्युद्वासनम् । अलंकृत्य प्रियेणेत्यासादनम् । यज्ञोऽसीत्यादिप्रचारः पूर्ववत् । नात्र ब्रह्मणे परिहरणम् । चतुर्धाकरणमेव । धेनुनिष्क्रयद्रव्यं दक्षिणा । ब्रह्मन्ब्रह्मासीत्यादि । सहस्रधारमुपसमश्नीयमाणं तद्दधार० । तेन धेनुनिष्क्रयद्रव्येण० । इदं वो धेनुनिष्क्रय० । नयतु देवि दक्षिणे । उत्तानस्त्वाङ्गिरसः प्रतिगृह्णातु । तेनामृतत्वमश्या० । अगन्मागन्नीनग्नीनगन्म संदृशस्त इत्यादि । यज्ञो बभूव । यज्ञशंयुवर्जम् । सिद्धमिष्टिः संतिष्ठते ।

इत्याधिद्वयपक्षः समाप्तः ।

अथाश्वलायनसूत्रोक्तपद्धतिपक्षेष्टिर्लिख्यते ।

पूर्ववदाज्याहुतीर्जुहुयात् । यजमान आचमनादि कृत्वा ' अग्निं पवमानमग्निं पावकमग्निं शुचिमिन्द्राग्नी अदितिं चाग्नेयेन समानतन्त्रं कुर्वन्निष्ट्या यक्ष्ये । विद्युदसि० । तेष्वेवाग्निष्वन्वाधानादि । ऐष्ट२ हविः । पौर्णमासं तन्त्रम् । सप्तदश सामिधेन्यः । त्रिचत्वारिंशत्कपालानि । स्थाली च । उत्तरनपात्रं च । अन्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् । निर्वपणकाले । अग्नये जुष्टं नि० । अग्नये पवमानाय जुष्टं नि० । अग्नये पावकाय जुष्टं नि० । अग्नये शुचये जुष्टं नि० । इन्द्राग्निभ्यां जुष्टं नि० । अदित्यै जुष्टं नि० । उत्करे त्रिर्निनीय । यथाभागं व्यावर्तध्वम् । ' इदमग्नेरिदं पवमानस्याग्नेः पावकस्याग्नेः शुचेरिन्द्राग्न्योः ' इति पुरोडाशार्थान् । इदमदित्याश्चर्वर्थान् । पिण्डं कृत्वा यथाभागं व्यावर्तध्वम् । यथाभागं व्यावर्तेथामित्यन्तयोर्निर्देशः । इदमिन्द्राग्न्योरिदमदित्याः । उपांशु प्रचारः सर्वेषाम् । मार्जनान्त आग्नेयादीनां चतुर्णां चतुर्धाकरणं कृत्वा बर्हिषदं करोति । ततोऽदितिचरुं ब्रह्मणे परिहरति । पूर्ववद्भक्षयन्ति । आधानदक्षिणादानम् ।

यजमानः ' अग्नीदजपूर्णपात्रसार्धसूत्रोपबर्हणनिष्क्रयद्रव्यं ते दास्ये । ब्रह्मन्नश्वनिष्क्रयद्रव्यं ते दास्ये । अध्वर्यो अनडुन्निष्क्रयद्रव्यं ते दास्ये । होतर्धेनुनिष्क्रयद्रव्यं ते दास्ये । ऋत्विजो वासोगोमिथुनद्वयनवरथ्यानिष्क्रयद्रव्यं वो दास्ये । सप्तदशकृष्णोऽपनयनादीनां निवृत्तिः । तूष्णीमेव प्रतिग्रहः । अध्वर्यवे परिहितवस्त्रदानं च । ब्रह्मन्प्रस्थास्याम इत्यादि पवमानेष्टिवत्कार्यम् । सिद्धमिष्टिः संतिष्ठते । इत्याधानं समाप्तम् ।

अजस्रधारणम् ।

आधानाद्द्वादशरात्रमजस्रा अग्नयः ।

द्वादशाहमजस्रेष्वग्निषु यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्नहतं वासो बिभर्ति ।

दशहोतृहोमः । अग्निहोत्रमारप्स्यमानो दशहोतारं मनसानुद्रुत्याहवनीये स्रुवं हुत्वाथ स्वयमग्निहोत्रं जुहोति ।

यजमान आचम्य प्राणानायम्य अग्निहोत्रमारप्स्ये तेन यावज्जीवं होष्यामीति संकल्प्य पुनः अग्निहोत्रमारप्स्यमानो दशहोतारं होष्यामीति संकल्प्य दशहोतृहोमकर्मणि अध्वर्युं त्वा वृणे इत्यध्वर्युं वृणुयात्—

अध्वर्युः लौकिकाज्यं जुह्वां सकृद्गृहीतं चतुर्गृहीतं वा गृहीत्वा तस्मिन्नेवाधानादिके दशहोतारं मनसानुद्रुत्य जुहुयात् । मन्त्रस्तु—

चित्तिः स्रुक् चित्तमाज्यं वाग्वेदिः आधीतं बर्हिः केतो अग्निः विज्ञातमग्निः वाक्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युः । इति संततं मनसा जपित्वा । अथोपांशुवाक्यशः पाठश्च ।

वाचस्पते विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोमं पिबतु । आस्मासु नृम्णं धात्स्वाहा । यज० । वाचस्पतये ब्रह्मण इदम् । अग्निहोत्रहोमः । यजमान आचम्य स्वयमग्निहोत्रं पयसा होष्यामीति संकल्प्य यथासूत्रं जुहुयात् । आपस्तम्बीयस्तु—तस्मिन्सायमग्निहोत्रे व्याहृतीभिर्हविरुपसादयेत् । नित्यस्तु उपसादनमन्त्रो निवर्तते । तत आरभ्य संवत्सरेऽतीते यदनन्तरं सायमग्निहोत्रहोमस्तत्राप्येवमुपसादयेत् । दक्षिणादानम् । त्रयोदशेऽह्नि प्रातरग्निहोत्रꣳ हुत्वाजस्रोत्सर्गं कृत्वा यां प्रथमामग्निहोत्राय दोग्धि तां गां ब्राह्मणाय दक्षिणां दद्यात् । सारस्वतहोमानुष्ठानम् । संस्थिते सेष्टिकेऽग्न्याधेये यानन्तरा पौर्णमासी तस्यां पौर्णमास्यां तत्पूर्वेद्युर्वा यजमानः प्रातरग्निहोत्रꣳ हुत्वा दर्शपूर्णमासावारप्स्यमाणः सारस्वतौ होमौ होष्यामीति संकल्प्य अस्मिन्सारस्वतहोमेऽध्वर्युं त्वामहं वृणे इति वृणुयात् । अध्वर्युराहवनीयं विहृत्य लौकिकाज्यं जुह्वाꣳ सकृद्गृहीतं गृहीत्वा पूर्णा पश्चादुत पूर्णा परस्तादुन्मध्यतः पौर्णमासी जिगाय तस्यां देवा अधिसंवसन्त उत्तमे नाक इह मादयन्ताꣳ स्वाहा । पौर्णमास्या इदं० । पुनर्गृहीत्वा । यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरꣳ स्वाहा । अमावास्या इदं० । अग्निं परिसृजेत् । अन्वारम्भणीयेष्ट्यनुष्ठानम् । यजमान आचम्य दर्शपूर्णमासावारप्स्यमानोऽन्वारम्भणीयया यक्ष्ये । विद्युदसि० । अस्यामन्वारम्भणीयायामध्वर्युं त्वामहं वृणे । इत्यध्वर्युं वृणीयात् । एवं ब्रह्माणं होतारमाग्नीध्रं च । विहरणादि । चतुर्दशी ये प्रविष्टाः

पञ्चदर्शी वा । आन्वारम्भणीयꣳ हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । एकत्रिंशत्कपालानि स्थाली च । उत्पन्नपात्रम् । अन्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् । देवस्य त्वा० । हस्ताभ्यामग्नाविष्णुभ्यां जुष्टं निर्वपामि । सरस्वत्यै जुष्टं निर्वपामि । सरस्वते जुष्टं निर्वपामि । अग्नये भगिने जुष्टं निर्वपामि । अग्नाविष्णू हव्यꣳ रक्षेथाꣳ सरस्वति हव्यꣳ रक्षस्व सरस्वन्हव्यꣳ रक्षस्वाग्ने भगिन्हव्यꣳ रक्षस्वेत्युपसादनम् । देवस्य त्वा० अग्नाविष्णुभ्यां वो जुष्टं प्रोक्षामि सरस्वत्यै वो जुष्टं प्रोक्षामि सरस्वते वो जुष्टं प्रोक्षाम्यग्नये भगिने वो जुष्टं प्रोक्षामि । उत्करे त्रिर्निनीय । यथाभागं व्यावर्तध्वम् । इदमग्नाविष्ण्वोः सरस्वतोऽग्नेर्भगिनः पेषणार्थान् । इदꣳ सरस्वत्याः । इति चर्वर्थान् । देवस्य त्वा० मग्नाविष्णुभ्यां जुष्टमधिवपामि सरस्वते जुष्टमधिवपाम्यग्नये भगिने जुष्टमधिवपामि धान्यम० । मन्त्रेणाष्टौ कपालान्युपधाय । तूष्णीं त्रीणि । ध्रुवोऽसीति स्थालीम् । ततो द्वितीयचतुर्थयष्ठमानामावृत्त्या द्वादश कपालानि सरस्वतः । ततोऽष्टाव नेर्भगिनः । पिष्टान्युत्पूय तण्डुलानुत्पुनाति । अप उत्पूय स्थाल्यामानयति । पिण्ड कृत्वा यथाभागं व्यावर्तध्वम् । व्यावर्तेथाम् । इदꣳ सरस्वतः । इदमग्नेर्भगिनः । प्रथममधिश्रित्य तण्डुलानप्योत्तराणधिश्रयति । प्रथमं पुरोडाशानामन्तरितꣳ सर्वेषाम् । प्रथमं तूष्णीमभिघार्य मन्त्रेणेतराणि । सरस्वत्यै जुष्टमभिघारयामि' सरस्वते जुष्टमभि० । अग्नये भगिने जुष्टमभि० । पूर्ववचरोरुद्वासनम् । प्रियेणेत्यासादनम् । प्रथमवर्ज यज्ञोऽसीति त्रयाणाम् । अयं यज्ञो ममाग्ने चतुर्होतेत्यासन्नाभिमर्शनम् । प्रथमस्य पूर्ववत्प्रचारः । अनुमन्त्रणं च । सरस्वत्या अनुब्रूहि । सरस्वतीं यज । सरस्वत्या इदं० । सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयम् । सरस्वते अनुब्रूहि । सरस्वन्तं यज । सरस्वत इदं० । सरस्वतोऽहं देवयज्ययान्नादो भूयासम् । अग्नये भगिनेऽनुब्रूहि अग्निं भगिनं यज । अग्नये भगिन इदं । अग्नेर्भगिनोऽहं देव० न्नादो भूयासम् । न पार्वणहोमः । नारिष्टान्हुत्वा । ततो जुह्वाꣳ सकृन्मक्द्गृहीत्वा । चित्तं च स्वाहा । चित्तायेदं० । चित्तिश्च स्वाहा । चित्त्या इदं० । आकूतं च स्वाहा । आकूतायेदं० । आकूतिश्च स्वाहा । आकूत्या इदं० । विज्ञातं च स्वाहा विज्ञातायेदं० । विज्ञानं च स्वाहा । विज्ञानायेदं० । मनश्च स्वाहा । मनस इदं० । शक्करीश्च स्वाहा । शक्करीभ्य इदं० । दर्शश्च स्वाहा । दर्शायेदं० । पूर्णमासश्च स्वाहा । पूर्णमासायेदं० । बृहच्च स्वाहा । बृहत इदं० । रथंतरं च स्वाहा । रथंतरायेदं० । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा । प्रजापतय इदं० । स्विष्टकृतादि । प्रथमवर्जं चतुर्धाकरणं करोति' । दक्षिणादानम् । गोमिथुननिष्क्रयद्रव्यमन्तर्वेद्यासाद्य । ब्रह्मन्नत्रासीति । सहस्रमस्तुमनसाभिमर्शनं तदाभर० । तेन गोमिथुननिष्क्रयद्रव्येणा० । इदं वो गोमिथुननिष्क्रयद्रव्यं० । देवि दक्षिण उचानस्त्वाङ्गीरसः प्रतिगृ-

ह्वातु । तेनामृतत्व० । अग्नाविष्ण्वोरहमु० । सरस्वत्या अहमु० । सरस्वतोऽहमु० । अग्नेर्भगिनोऽहमु० । अगन्म दर्शपूर्णमासावारप्स्यमानं दर्शपूर्णमासावारप्स्यमानमगन्म संदशास्त इत्यादि । यज्ञो बभूव यज्ञशवमवर्जम् । सिद्धमिष्टिः संतिष्ठते ।

चतुर्होतृहोमः ।

दर्शपूर्णमासावारप्स्यमानश्चतुर्होतारं मनसानुद्रुत्याहवनीये समहं हुत्वाथ दर्शपूर्णमासा-वारभते । यजमान आचम्य दर्शपूर्णमासावारभमाणश्चतुर्होतारं होष्यामीति संकल्प्य अग्निश्चतुर्होतृहोमेऽध्वर्युं त्वामहं वृण इति वृणुयात् । अध्वर्यु.–आहवनीयं विहृत्य लौकिकाज्यं जुह्वां सकृद्गृहीतं गृहीत्वा । पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता । इति संततं मनसा जपित्वा । अथोपांशुजप. । वाचस्पते वाचो वीर्येण । संभृततमेनायक्ष्यसे । यजमानाय वार्यम् । आसुवस्करस्मै । वाचस्पतिः सोमं पिबतु ।' जजनदिन्द्रमिन्द्रियाय स्वाहा । इति वाक्यशः पाठश्च । वाचस्पतये ब्रह्मण इद० । अग्निं परिस्तृजेत् । इति चतुर्होतृहोमः ।

अथ दर्शपूर्णमासारम्भः ।

यजमान आचम्य प्राणानायम्य परमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां यक्ष्ये । तत्र प्रधानदे-वता. । तत्र पौर्णमास्याम् ।

१ अग्निः २ विष्णुः ३ अग्नीषोमौ ।

अमावास्यायाम् । १ अग्नि' । २ विष्णुः ३ इन्द्राग्नी । इति असंनयतः । संनयतः पौर्णमास्या पूर्ववत् । अमावास्यायाम् अग्निः विष्णु. महेन्द्रः । आपस्तम्बाना तु । पौर्ण-मास्याम् । अग्निः प्रजापतिः ।

अमावास्यायामग्निः इन्द्राग्नी । इत्यसंनयतः । संनयतस्तु पौर्णमास्यामग्नि. प्रजापतिः अग्नीषोमौ ।

अमावास्यायामग्नि. वर्षपर्यन्तमिन्द्रः । अनन्तरं महेन्द्र. ।

अथ पौर्णमासयागः ।

संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वपति ॥ १ ॥ समानतन्त्रमेके समामनन्ति ॥ २ ॥

समानतन्त्रपक्षाश्रयेण प्रयोगो लिख्यते ।

यजमान आचम्य पवित्रपाणिः श्रीपरमेश्वरप्रीत्यर्थमैन्द्रवैमृधेन समानतन्त्र कुर्वन्पौर्णमासेन यक्ष्ये। इति प्रथमपौर्णमासयागे संकल्प.। द्वितीयादौ पौर्णमासेन यक्ष्य इति सकल्प्य यथासूत्र यागं कुर्यादिति शम्।

प्रथमपौर्णमासे व्याहृतिभिर्हवींषि आसादयेत्। संवत्सरे पर्यागत एताभिरेवासादयेत्।

इतीष्टयः।

आधानप्रयोगमन्त्रभाष्यम् ।

अहं वर्ष्म सजातानां विद्युतामिव सूर्यः ।
इदं तमधितिष्ठामि यो मा कश्चाभिदासति ॥ १ ॥
(आश्व० गृ० १ । २४ । ८)

भाष्यम्—कुलज्ञानाचारवपुर्वयोगुणैरहं सजातानां समानानां मध्ये वर्ष्म श्रेष्ठः ज्येष्ठ इति यावत् । विद्युतां प्रकाशवतां ग्रहनक्षत्रादीनां मध्ये सूर्य इव इदम् इमं तम् । विष्टरम्, अधितिष्ठामि, अभितिष्ठामि, तं पुरुषमुद्दिश्य विष्टरवद्भवम् । अभिलक्षीकृत्य अभिभूय वा तिष्ठामि, अधः कृत्वा उपर्युपविशामि, यः कश्चन मा माम् । अभिदासति, उपक्षीणं कर्तुमिच्छति दसु उपक्षये ।

अमृतोपस्तरणमसि ॥ २ ॥ (आ० गृ० १ । २४ । १२)

अमृतस्य उपस्तरणम् । आच्छादनमसि, अथवा अमृतं जलरूपम् । उपस्तरण-माच्छादनमसि ।

मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ ३ ॥ (आ० गृ० १।२४।१३)

मित्रस्य चक्षुषा त्वा त्वां प्रतीक्षे अवलोकयामि मित्राधिष्ठितं चक्षुः अथवा मित्रस्य आदित्यस्य मित्रस्य हि शान्तं चक्षुः । अथवा हे मधुपर्क जगन्मित्रस्य सूर्यस्य चक्षुषा त्वामवलोकयामि न तु वैरिचक्षुषा अनुकूलोऽयमिति बुद्ध्युपादनाय मित्रशब्द-प्रयोग इत्याह " मित्रस्य त्वा चक्षुषा प्रेक्ष इत्याह मित्रत्वाय ॥ तै. ब्रा. ३ । २ । ४ प्रेक्षे प्रतीक्ष एतावान्भेद उभयत्र ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां प्रतिगृह्णामि ॥ ४ ॥
(आ० गृ० १ । २४ । १४)

भाष्यम्—देवस्य त्वाशब्देन मधुपर्क उच्यते, देवस्य सवितुः प्रसवे अभ्यनुज्ञाय वर्तमानः देवेन सवित्रा प्रसूतः अश्विनोर्बाहुभ्यां न स्वाभ्याम् । अश्विनौ हि देवानामध्वर्यू पूष्णो हस्ताभ्याम् । न स्वाभ्याम् । पूषा हि देवानां भागधुग्भागपूरकः प्रतिगृह्णामि स्वी करोमि मधुपर्कमिति यावत् ।

मधुपर्कः—दधिमिश्रितं मधु दधिमिश्रितं सर्पिर्वा ।

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥ ५ ॥ ऋ० सं० म० १ । १४।९१।६

भाष्यम्—ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वाता वायवो मधु माधुर्योपेतं कर्मफलं क्षरन्ति वर्षन्ति प्रयच्छन्तीत्यर्थः । तथा सिन्धवः स्यन्दनशीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरन्ति, एवं नोऽस्मभ्यमोषधीः फलपाकान्ता ओषधयश्च ताश्च माध्वीर्माधुर्योपेताः सन्तु भवन्तु ।

मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥

भाष्यम्—नक्तं रात्रिर्नोऽस्माकं मधु मधुमती माधुर्योपेतफलप्रदा भवतु । उतापि चोषस उषःकालोपलक्षितान्यहानि च मधुमन्ति भवन्तु । पार्थिवं रजः पृथिव्याः संबन्धी लोकोऽस्माकं मधुमत् माधुर्यविशिष्टफलयुक्तो भवतु । पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौर्द्युलोकोऽपि मधु मधुयुक्तो भवतु ।

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

नः अस्माकं वनस्पतिर्वनानां पालयिता वृक्षाभिमानी देवो मधुमान्माधुर्योपेतफलयुक्तोऽस्तु । तादृशं फलमस्मभ्यं प्रयच्छत्वित्यर्थः । सूर्यः सर्वस्य प्रेरकः सविता च मधुमानस्तु । गावः अग्निहोत्रार्थाः धेनवश्च नोऽस्माकं माध्वीर्माधुर्योपेतेन पयसा युक्ता भवन्तु ।

वसवस्त्वा गायत्रेण छन्दसा भक्षयन्तु ।
(आप० १ । २४ । १४)

वसवः त्वा त्वाम् गायत्रेण छन्दसा भक्षयन्तु । एवं सर्वत्र ।

रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयन्तु ।
आदित्यास्त्वा जागतेन छन्दसा भक्षयन्तु ।
विश्वे त्वा देवा आनुष्टुभेन छन्दसा भक्षयन्तु ।
भूतेभ्यस्त्वा ।

भूतेभ्यः प्राणिमात्रेभ्यस्त्वा त्वामुत्क्षिपामीत्यर्थः ।

विराजो दोहोऽसि ॥ १ । २४ । १६

प्राणधारणादिगुणैः सहस्रसंख्येन विविधतया राजन इति विराजस्तस्य विराजो दोहः परिणामभूतो रसः स त्वमसि तस्मात्त्वां प्राश्नामीत्यर्थः ।

विराजो दोहमशीय ॥

हे उदक सं त्वां विराजो दोहं परिणामभूतं रसमशीय अश्नुवे, व्याप्नुयाम् ।

मयि दोहः पद्यायै विराजः ।

किंच मयि विषये या पद्या पाद्या पादयोः साध्वी सपर्या तस्यै तदर्थं विराजो दोहः ।, मन्त्रसरूकं जल भवेति शेषः ।

अमृतापिधानमसि । (१ । २४ । २१)

अमृतरूपमाच्छादनमसि । तस्मात्त्वामाचामीत्यर्थः ।

सत्यं यशः श्रीर्मयि श्रीः श्रयताम् । (१ । २४ । २२)

सत्य यश श्रीः मयि श्रयताम्, आश्रय करोतु इत्यर्थः ।

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥
प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट ॥

अमृतस्य क्षीरस्य नाभिराश्रयः सुवितर्कं छन्दसि व्यवहिताश्चेयुक्तेरुपसर्गस्य वोचः मित्यत्रान्वयः प्रवोचं ब्रवीमि, चिकितेशु, चेतनावते जना यूयम् इमा गाम् । मा वधिष्ट मा घ्नताम् । किंभूताम् अनागामनपराधाम् । अदिति देवमातरं पयोदानात् । माता रुद्राणामित्यादिरप्यर्थम् ।

यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा ।
तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः सह ॥ (तै० ब्रा० १।२।१)

हे अरणे ते त्वयि निमित्तभूतायां सत्या शमीगर्भो योऽश्वत्थः स च तया शम्या समेत आररोह समारुह्य प्रवृद्धस्त तादृशमश्वत्थं ते त्वदर्थं ब्रह्मणा मन्त्रेण यज्ञियै केतुभिर्यज्ञार्हैश्चोच्छैनैरभिमन्त्रणादिवक्ष्यमाणसंस्कारैश्च सह हरामि यज्ञभूमावानयामि ।

अत्र केतुभिरितिपदेन केचित्पात्राणि इत्युक्त्वा तेषामपि अभिमर्शः प्रयुज्यते ।

अश्वत्थाद्धव्यवाहाद्धि जातामग्नेस्तनूं यज्ञियाꣳ संभरामि ।
शान्तयोनिꣳ शमीगर्भमग्नये प्रजनयितवे ॥ १ । २ । १)

हव्यं वहतीति हव्यवाडग्निस्तद्रूपोऽयमश्वत्थोऽश्वरूप धृत्वाग्निस्तस्मिन्वृक्षे प्रविश्य संवत्सरमवस्थितत्वात्तस्मादश्वत्थाजातामुत्पन्नामरणिं संभरामि सपादयामि । कीदृशीम् । अग्नेर्यज्ञियां तनूं लौकिकदाहपाकादि हेतुर्यज्ञिया तनू । अरणिरूपा तु या यज्ञार्हा शान्तयोनिं दाहप्रकाशादनभिव्यक्त्या शान्तामग्न्युत्पादकत्वेन योनिश्च शमीगर्भं शमीवृक्षवेष्टिताश्वत्थवृक्षजन्यत्वेन शमीगर्भमीदृशीमरणिमग्नये प्रजनयितवेऽग्नेरुत्पादनार्थं संभरामीति पूर्वत्रान्वयः ।

आयुर्मयि धेह्यायुर्यजमाने ॥ (आप० श्रौ० सू० ५।१।४)

हे अरणे मयि यजमाने च आयुर्धारय, आयुष्मन्त कुरु इति अध्वर्युः प्रार्थयते ।

वैश्वानरस्य रूपं पृथिव्यां परिस्रसा ।
स्योनमा विशन्तु नः ॥ (तै० ब्रा० १ । २ । १)

सा० भा० विश्वेषां नराणां हितकारी वैश्वानरोऽग्निस्तस्याग्ने स्वरूपं पृथिव्यां परिलसत्परित, पारयत्स सिकता स्योन सुख यथा भवति तथा नोऽस्माकं देवयजनमाविशतु ।

यदिदं दिवो यददः पृथिव्याः संजज्ञाने रोदसी संबभूवतुः ।
ऊषान्कृष्णमवतु कृष्णमूषा इहोभयोर्यज्ञियमागमिष्ठाः ॥ १।२।१

सा० भा० दिव सबन्धि यदिदमूषररूप पृथिव्या स्थापित पृथिव्या सबन्धि यददः कृष्णरूप चन्द्रमसि स्थापित तत्र यद्रूपद्वय सजज्ञाने सम्यगगच्छन्त्यौ रोदसी द्यावापृथिव्यौ सबभूवतु परस्परसगते अभूताम् । तत्र यत्कृष्णरूप द्यावापृथिव्योर्रूपमस्ति तदेतदूषान् दिव स्वरूपभूतानवतु रक्षतु । ते चोषास्त कृष्णमवन्तु । उभयोर्द्यावापृथिव्यो. सबन्धि यज्ञिय यज्ञयोग्यमशद्वयमिह देवयजन आगमिष्ठा आगच्छतु ।

ऊतीः कुर्वाणो यत्पृथिवीमचरो गुहाकार माखुरूपं प्रतीत्य ।
तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीराः ॥ ६ ॥ (१।२।१)

सा० भा० हे अग्ने त्वमाखुरूप मूषकरूप स्वीकृत्य गुहाकार पर्वतगुहाया आकारो यथा भवति तथोतीर्बिलानि कुर्वाण पृथिवीमचरो भूम्यां चरितवानसीति यत्तत्र न्यक्त निगूढं ते त्वदीय सारमिह देवयजने सभरन्त सपादयन्तो वय सवीरा पुत्रभृत्यसहिता शरदः शत शतसख्याकान्सवत्सरान् जीवेम सवीरा वीरै सहिता क्षत्रियमुर्धन्यसहिता इति वय राजन्यवान् ब्राह्मण इति ब्राह्मणस्य विशेषितत्वात्तथा प्रार्थना अग्नेर्युक्ता इति उत्पश्याम । वीरशब्दोऽपि तत्रैव योद्धृतमे रूढ । इत्यनवद्यम् ।

ऊर्जं पृथिव्या रसमाभरन्तः शतं जीवेम शरदः पुरूचीः ।
वम्रीभिरनुवित्तं गुहासु श्रोत्रं त उर्व्यबधिरा भवामः ॥ ७ ॥ (१।२।१)

सा० भा० पृथिव्या रस सारमूर्जं क्षीरादिवत्समान वल्मीकवपारूप सभरन्तो वय शत शरदो जीवेम । कीदृशी शरद पुरूची पुरूणि बहूनि भोग्यान्यञ्चन्ति सपादयन्तीति पुरूच्यस्तादृशी । कीदृश रस गुहसु भूच्छिद्रेषु वम्रीभि पिपीलिकासदृशीभिरनुवित्तमनुक्रमेण लब्धम् । हे उर्वि तत्स्थैव त्वदीयश्रोत्रस्थानीयां वल्मीकवपामाहृत्य वयमबधिरा अनुपहतश्रोत्रेन्द्रिया भूयास्म ।

प्रजापतिसृष्टानां प्रजानां क्षुधोपहत्यै सुवितं नो अस्तु ।
उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामि ॥ ८ ॥ (१।२।१)

सा० भा० या प्रजा प्रजापतिसृष्टास्तासां क्षुन्निवारणाय नोऽस्मत्सम्बन्धीद कर्दमरूप सुवित सुष्ठु प्रसन्नमस्तु । येयमिडन्न यचोर्जत , उभय प्रजाभ्य प्रजार्थमुपप्रभिन्नमलन्तसामीप्य यथा भवति तथैवोद्भूत तादृश सूदरस पङ्करूप गृहेभ्यो यहनीनामायतनार्थमाहरामि इहानयामि ।

यस्य रूपं बिभ्रदिमामविन्दद्गुहाप्रविष्टां सरिरस्य मध्ये ।
तस्येदं विहतमाभरन्तोऽच्छम्बट्कारमस्यां विधेम ॥ ९ ॥ (१ । २ । १)

सा० भा० पुरा प्रजापतिर्यस्य वराहस्य रूपं बिभ्रद्धार्यमाण इमां पृथिवीमविन्ददलभत । कीदृशीं सरिरस्य मध्ये प्रलयकालीनजलस्यान्तर्गुहा गोप्यं स्थानं पातालरूपं प्रविष्टाम् । तस्य वराहस्य विहतं पोत्रोत्खातमिदं मृद्द्रव्यमाभरन्त आनयन्तो वयमस्यां पृथिव्यामच्छ-म्बट्कारं वैयर्थ्यं यथा न भवति तथा विधेम कर्माण्यनुतिष्ठेम । सरिरं नाम सलिलं जलम् ।

याभिरदृंहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भर्त्रीम् ।
ता नः शर्कराः सन्तु सर्वाः ॥ १० ॥ (१ । २ । १)

सा० भा० जगतः स्थावरादेः प्रतिष्ठामाश्रयभूतां विश्वजनस्य भर्त्रीं सस्यादिद्वारा सर्वजन-स्य पोषयित्रीमिमामुर्वीं याभिः शर्कराभिरदृंहद्दृढीकृतवान् प्रजापतिः । शर्करा क्षुद्रपाषाणाः ।

अग्ने रेतश्चन्द्रंहिरण्यमद्भ्यः संभूतममृतं प्रजासु ।
तत्संभरन्नुत्तरतो निधायातिप्रयच्छन्दुरितिं तरेयम् ॥ ११ ॥ (१।२।१)

सा० भा० तद्धिरण्यं तत्संभरन्संपादयन्नग्नेर्भस्मनिवारणयोत्तरपार्श्वे तद्धिरण्यं निधाय द्वेष्याय रजतमतिप्रयच्छन्नह दुरितिं दुर्गतिं तरेयम् ।

अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः संवत्सरं देवेभ्यो निलाय ।
तत्ते न्यक्तमिह संभरन्तः शतं जीवेम शरदः सवीराः ॥ १२॥ (१।२।१)

सा० भा० हे अग्ने त्वं यदश्वत्थः सन्तद्दीयं रूपं च सम्यक्कृत्वा देवेभ्यो निलाय गूढोप-क्रम्य संवत्सरं निरन्तरमश्वत्थे स्थितवानसि । तत्तदा ते त्वदीयं नक्तमश्वत्थे निगूढं तेज-सारमिह यज्ञभूमौ संभरन्तः संपादयन्तो वयं सवीराः पुत्रभृत्यसहिताः शतं शरदो जीवेम । अन्यार्थं पूर्ववदवगन्तव्यं ।

ऊर्जः पृथिव्या अध्युत्थितोऽसि वनस्पते शतवल्शो विरोह ।
त्वया वयमिषमूर्जं मदन्तो रायस्पोषेण समिषा मदेम ॥१३ (तै. ब्रा.१।२।१)

सा० भा० हे वनस्पत उदुम्बरवृक्ष ऊर्जो रसनिमित्तात्तत्सिद्धये पृथिव्या अध्युत्थि-तोऽसि भूमेरुपरि प्ररूढोऽसि अतोऽस्माभिश्छिन्नोऽपि पुनः शतवल्शः शतशाखायुक्तो विरोह विशेषेण प्रादुर्भव । त्वयोपकृता वयमिषमन्नमूर्जं रसं च मदन्तो हर्षपूर सरं प्राप्नुवन्तो रायस्पोषेण धनपुष्ट्या समीचीनान्नेन युक्ता मदेम पुनरपि हृष्याम ।

गायत्रिया ह्रियमाणस्य यत्ते पर्णमपतत्तृतीयस्यै दिवोऽधि ।
सोऽयं पर्णः सोमपर्णाद्धि जातस्ततो हरामि सोमपीथस्यावरुध्यै ॥ १४ ॥
देवानां ब्रह्मवादं वदतां यदुपाशृणोः सुश्रवा वै श्रुतोऽसि ।
ततो मामाविशतु ब्रह्मवर्चसं तत्संभरंस्तदवरुन्धीय साक्षात् ।

सा० भा० हे सोम तृतीयस्यै दिवोऽर्थमिं लोकमारभ्य गणनायां तृतीयस्य द्युलोकस्योपरि गायत्रिया ह्रियमाणस्य गायत्रीदेवतया बलादाह्रियमाणस्य ते तत्र यत्पर्णं भूमावपतत्सोऽयं पर्णः पलाशवृक्षः स च सोमपर्णाज्जात इति पर्णनामधेयेनैव प्रसिद्धः। तत्तस्मात्कारणात्सोमपीथस्यावरुध्यै सोमपानस्य सिद्धये हरामि त्वामिहानयामि । किंच पलाशवृक्षच्छायायामुपविश्य ब्रह्मवादं वदतामात्मनिषयं संवादं कुर्वतां देवानां संबन्धं ब्रह्मवादं यत्तस्मात्कारणात्त्वमुपाशृणोः समीपे स्थित्वा श्रुतवानसि। अत एव सुश्रवा इति नाम्नेव त्वं श्रुतोऽसि प्रसिद्धोऽसि तत्तस्मात्कारणात्त्वदानयने प्रवृत्तं मां ब्रह्मवर्चसमाविशतु। तत्ताहशं पर्णाख्यं संभरन्नहं ब्रह्मवर्चसं साक्षादवरुन्धीय विलम्बमन्तरेण प्राप्नुयाम् ।

यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजापतिः ।
तामिमामप्रदाहाय शमीं शान्त्यै हराम्यहम् ॥ १५ ॥ (१ । २ । १)

सा० भा० हे शमीवृक्ष ते त्वदीयया यया शाखया प्रजापतिः स्वसृष्टस्याग्नेर्हेतिं प्रदाहरूपमायुधमशमयत्तामिमां शमीं पूर्वस्य दाहस्य शान्त्या इत ऊर्ध्वमप्रदाहाय च हरामि यज्ञभूमावानयामि ।

यत्ते सृष्टस्य यतो विकङ्कतं भा आर्च्छज्जातवेदः ।
तया भासा संमित उरुं नो लोकमनुप्रभाहि ॥ १६ ॥

सा०भा० हे जातवेदः प्रजापतिना सृष्टस्य यतः शीघ्रं गच्छतस्ते तव भा या दीप्तिर्विकङ्कतवृक्षमार्च्छत् प्राप्नोत्तया भासा संयुक्तः सन्नोऽस्मदर्थमुरुं विस्तीर्णं लोकं स्थानमनुप्रभाहि अनुक्रमेण प्रकाशय ।

यत्ते तान्तस्य हृदयमाच्छिन्दज्जातवेदो मरुतोऽद्भिस्तमयित्वा ।
एतत्ते तदशनेः संभरामि सात्मा अग्ने सहृदयो भवेह ॥१७॥ (१।२।१)

सा० भा० हे जातवेदः पुरा कदाचिन्मरुतो देवा विद्वेषादद्भिस्त्वदीयां तां ज्वालां तमयित्वा शमयित्वा ग्लानिं प्राप्य तान्तस्य ग्लानिं प्राप्तस्य ते तव यद्धृदयमाच्छिन्दंस्तदेतत्ते हृदयमशनेः सकाशादहं संभरामि । छिन्नस्य हृदयस्याशनौ प्रविष्टत्वात् । ततः संभरणं युक्तम् । तस्य हृदयस्य मया संभृतत्वादिह देवयजने हेऽग्ने त्वं सात्मा सत्त्वरूपः सहृदयो हृदययुक्तश्च भव ।

यत्पर्यपश्यत्सरिरस्य मध्ये उर्वीमपश्यज्जगतः प्रतिष्ठाम् ।
तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनं हरामि॥१८॥(१।२।१)

सा० भा० जगतः स्थावरजङ्गमरूपस्य प्रतिष्ठामाधारभूतामुर्वीं लब्धुकामः प्रजापतिः सरिरस्य मध्ये प्रलयकालीनजलस्यान्तर्यत्पुष्करपर्णमपश्यत्तत्पुष्करस्य पर्णं हरामि देवयजनभूमौ नयामि । कीदृशमायतनाद्धि जलमध्ये निमग्नादाधारादुत्पन्नम् । हिशब्दो ब्राह्मणप्रसिद्धिं सूचयति । तथा पृथिव्याः प्रथमभूमेर्विस्तारस्थानम् ।

यं त्वा समभरं जातवेदो यथाशरीरं भूतेषु न्यक्तम् ।
स संभृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वान् ॥ १९ ॥
(तै० ब्रा० १ । २ । १)

सा० भा० हे जातवेदो यं त्वामृत्विजः समभरन्संभारयुक्तं कृतवन्त. । कीदृशं त्वां भूतेषु प्राणिषु यथाशरीरं तच्छरीरमनतिक्रम्य न्यक्तमौदर्याग्निरूपेण निगूढं स तादृशस्त्वं संभृतः संभारयुक्तः प्रजाभ्यः शिवः प्रजानां सुखप्रदो भूत्वा सीदेह देवयजनस्थानमुपविश । विद्वान्सर्वलोकाभिज्ञस्त्वं नोऽस्मदर्थमुरुं विस्तीर्णं लोकमनुनेष्यनुक्रमेण संपादय ।

उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमानस्य सन्तु ।
शिवा नः सन्तु प्रदिशश्चतस्रः शंनोमाता पृथिवी तोकसाता ॥ २० ॥
(१ । २ । १)

सा० भा० अस्याः पृथिव्याः संबन्धि यत्स्थानं निष्ठीवनादिभिरपहतत्वादमेध्य यज्ञायोग्यं तदिदानीमुद्धन्यमानं सद्यजमानस्य पाप्मानमपहन्तु । प्राच्यादि चतस्रः प्रकृष्टा दिशो नोऽस्मान्प्रति शिवा सुखप्रदाः सन्तु तोकसाता तोकसातयेऽपत्यलाभाय पृथिवी माता नोऽस्माकं शं सुखं करोतु ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥ २१ ॥ (१ । २ । १)

सा०भा० आपो देवीरिमा जलदेवता नोऽस्माकमभिष्टयेऽभीष्टप्राप्त्यर्थं पीतये पानाय शं भवन्तु सुखप्रदा भवन्तु । किंच नोऽस्माकं शं सुखं संपादयितुं यो. दुःखं पृथक्कर्तुं चाभिस्रवन्तु सर्वतः प्रवर्तन्ताम् ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
ब्रह्मणे प्राणाय जुष्टं निर्वपामि ॥ २२ ॥ (तै० सं० १ । १ । ४)

ब्राह्मणव्याख्यानम्---देवस्य त्वा सवितु. प्रसव इत्याह प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । ब्रह्मणे प्राणाय प्राणभूताय ब्रह्मणे जुष्टं निर्वपामीत्याह । ब्रह्मण एवैनां जुष्टं निर्वपति ।

सा० भा० एतान्व्रीहीन् (तण्डुलान्वा) प्रियं हविर्यथा भवति तथा निर्वपति एवं चतुर्ष्वपि मन्त्रेषु अवगन्तव्यम् ।

प्रवेधसे कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
यतो भयमभयं तन्नो अस्त्वव देवान्यजे हेड्यान्स्वाहा ॥ २३ ॥
(१ । २ । १)

सा० भा० वेधसे कर्मद्वारा जगतो धात्रे कवये विदुषे सर्वज्ञाय मेध्याय यज्ञयोग्याय वृषभाय देवश्रेष्ठाय वृष्णे कामानां वर्षयित्रे वह्नये वन्दारु वचो नमस्कारशील वाक्यमस्माभिः प्रारब्धम् । प्राणिनां यतो यस्मान्नरकाद्भयं तत्तस्मान्नोऽस्माकमभयमस्तु । हेड्यान्क्रोधयोग्या-

नस्मद्विरोधिनो देवानरयजे विनाशयामि । " न ममेति स्वस्वताया (स्वसत्ताया) निवृत्तिमपि कीर्तयेत् " इतिवार्तिककारोक्त्या यजमानेन सर्वत्र उद्देशत्यागौ वक्तव्यौ । सूत्रकारास्त्वत्र न सूत्रयाबभूवुरित्यपरम् ।

चित्रियादश्वत्थात्संभृता बृहत्यः शरीरमभिसꣳस्कृताः स्थ ।
प्रजापतिना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै ॥ २४ ॥
(१ । २ । १)

सा० भा० ग्रामतडागादिचित्यप्रभूतः प्रसिद्धोऽश्वत्थश्चित्रियः । हे समिधो यूयं चित्रियादश्वत्थात्संभृता मया संपादिता अत एव बृहत्यो महत्यः पूज्यास्तथा शरीरमभिसस्कृताः स्थ चरुमते महत्याज्ये विवर्तनेन कृत्स्नं स्वशरीरमभिव्याप्य संस्कारयुक्ता भवथ । किंच प्रजापतिरूपेण यज्ञपुरुषमुखेर्णे प्रादेशमात्रेण संमितास्तुल्यास्तादृश्यस्तिस्रः समिधस्त्रिवृद्भिर्भविष्यदाहवनीयादिरूपेण त्रिगुणैरग्निभिः सह प्रजात्यै मिथुनाः प्रजोत्पादनार्थं मिथुनीभूताः ।

समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
अस्मिन्हव्या जुहोतन स्वाहा ॥ २५ ॥ (१ । २ । १)

सा० भा० हे ऋत्विजोऽनया प्रक्षिप्यमाणया समिधा अग्निं दुवस्यत प्रीणयत अतिथिं वैश्वदेवान्ते समागतं ब्राह्मणमिव पूजनीयमेनमग्निं घृतैर्बोधयत दीपयत अस्मिन्नग्नौ हव्या हवींष्या जुहोतन सर्वत्र जुहुत ॥

उपत्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम ॥ २६ ॥
(१ । २ । १)

सा० भा० हे हर्यत भजनीय वह्ने हविष्मतीर्व्रीह्यौदनाद्यहविष्मत्यो घृताचीर्घृताच्यो घृतसंपृक्ता एताः समिधस्त्वामुपयन्तु । मम समिधो जुषस्व प्रीत्या सेवस्व ।

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥ २७ ॥
(१ । २ । १)

सा०भा० हेऽङ्गिरोऽङ्गसौष्ठवयुक्त वह्ने त तादृशं सर्वकर्मसु प्रसिद्धं त्वां समिद्भिर्घृतेन च वर्धयामसि वयं वर्धयामः । हे यविष्ठ्य युवतमाग्ने बृहच्छोचा महत्त्वं यथा भवति तथा दीप्यस्व ।

प्रजा अग्ने संवासयाशाश्च पशुभिः सह ।
राष्ट्राण्यस्मा आधेहि यान्यासन्त्सवितुः सवे ॥ २८ ॥ (१ । २ । १)

सा० भा० तत्राग्निशब्देनाजः सम्बोध्यते तस्याग्निसबन्धित्वात् । " आग्नेयी या एषा यदजा " इति श्रुत्यन्तरादग्निना सह प्रजापतिमुखादुत्पन्नत्वाच्च । हे अग्नेऽजात्मन्प्रजा अस्मदीयाः पशुभिः सहाशा दिग्वर्तिनः प्राणिनश्च सवासय संत्रासनेन पालय । यानि राष्ट्राणि सवितुः सवे परमेश्वरस्याज्ञाया पूर्वमासस्तानि राष्ट्राणि अस्मै यजमानायाधेहि सर्वतः संपादय ।

शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् ।

उभयोर्लोकयोर्ऋद्ध्वाति मृत्युं तराम्यहम् ॥ २९ ॥ (तै० ब्रा० १।२।१)

सा० भा० अहं शल्कैः काष्ठलेशैः (काष्ठशकलैः) अग्निमिन्धानः प्रज्वालयन्नुभौ लोकाविहलोकपरलोकौ सनेँ संजयेयम् । तयोरुभयोर्लोकयोर्ऋद्ध्वा समृद्धो भूत्वा मृत्युमहमतिशयेन तरामि ।

जातवेदो भुवनस्य रेत इह सिञ्च तपसो यज्जनिष्यते ।

अग्निमश्वत्थादधि हव्यवाहं शमीगर्भाज्जनयन्यो मयोभूः ॥ ३० ॥ (१।२।१)

सा० भा० हे जातवेदो ब्रह्मौदनिकाग्ने भुवनस्य रेतः सर्वलोकस्य कारणभूतमाधातव्याग्निरूपमिह सिञ्च अनयोररण्योर्निषिञ्च । यद्रेतस्तपसोऽस्मत्संतापनाज्जनिष्यत उत्पत्स्यते तादृशं रेतः सिञ्चेति पूर्वत्रान्वयः ।

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।

तं जानन्नग्न आरोहाथा नो वर्धया रयिम् ॥ ३१ ॥

सा० भा० हे जनयितव्याग्नेऽस्मदरणिद्वयरूपस्ते तवोत्पत्त्यर्थमृत्वियो योनिर्ऋतुयुक्तमुपस्थानं यतो योनेर्जातस्त्वमरोचथा लोके दीप्तिमानासीः । योनिगतदरणिरूपं जानन्नारोह । अथानन्तरं नोऽस्माकं रयिं धनं वर्धय ।

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः ।

शुचिः पावक ईड्यः ॥ ३२ ॥ (तै० ब्रा० २ । ४ । १ ।)

सा० भा० अयमग्नी रक्षांसि प्रतिषेधति । कीदृशोऽग्निः शुक्रशोचिः निर्मलदीप्तिरमर्त्यो मरणरहितः शुचिः शुद्धः पावकोऽन्येषामपि शोधक ईड्यः स्तुत्यः ।

मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयीणाम् ।

अन्तर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगाम् ॥ ३३ ॥ (१।२।१)

सा० भा० रयीणां धनानां धरुणे धारयित्र्यौ हेऽरणी मही महत्यौ पूजनीये विश्पत्नी प्रजानां पालयित्र्यावर्वाची अभिमुखे सत्यौ ऋतस्य सदने यज्ञस्य स्थाने एतमागच्छतम् । अन्तर्वत्नी गर्भिण्यौ युवां जन्यं जनयितारमग्निं जातवेदसं जातानां वेदितारमध्वराणां पुरोगां यज्ञानामग्रगामिनं जनयथ उत्पादयतम् ।

दोह्या च ते दुग्धभृदोर्वरी ते ते भागधेयं प्रयच्छामि ॥ ३४ ॥ (आ० श्रौ० सू० ५ । ८ । ७)

+ ये अरणी दोह्या दुग्धभृत् । उर्वरीति द्विवचनार्थे एकवचनमार्षम् । दोह्या कामपूरणसमर्थे दुग्ध दुग्धवदाकृष्ट मथितमित्यर्थः । अग्निं बिभर्तीति दुग्धभृत् । उर्वरी विपुलसामर्थ्ये ते ते प्रसिद्धे अरणी ते तुभ्यं प्रयच्छामि ।

+ एतच्चिह्नाङ्कितं भाष्यं वाजसनेयसंहिताभाष्यकृद्भिः पाठकोपाह्वैः श्रीधरशर्मभिः कृतमित्यावेदयामि ।

आरोहतꣳ शक्करीमेमतें नाम्र आयुपा वर्चसा सह ।
ज्योग्जीवन्त उत्तरामुत्तराꣳ समां दर्शमहं पूर्णमासं यज्ञं यथा यजै ॥ ३५॥
(तै० ब्रा० १ । २ । १)

सा० भा० हेऽरणी मम मदीयाः शक्करीः शक्तियुक्ता अङ्गुल्यो याः सन्ति तासां दशतं दशसंख्यायुक्तवर्गमारोहतम् । हे अग्नेऽरणिगर्भस्य त्वमपि अनेन यज्ञेनायुषाऽस्मदीयेन दीर्घायुष्येण वर्चसा बलेन दशतमारोह । वयं ज्योग्दीर्घकालं जीवन्त उत्तरामुत्तरां समामुत्तरोत्तरसंवत्सरे विच्छेदमन्तरेण दर्शं पूर्णमासं च यज्ञं यथा यजै यथा यजामि तथा त्वमारोहेति पूर्वत्रान्वयः ॥

ऋतवियवती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे ।
तत्सत्यं यद्वीरं बिभृथो वीरं जनयिष्यथः ।
ते मत्प्रातः प्रजनयिष्येथे ते मा प्रजाते प्रजनयिष्यथः ।
प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोके ॥ ३६ ॥ (तै० ब्रा० १।२।१)

सा० भा० हेऽरणी युवामृतियवती ऋतुः प्राप्तोऽस्येत्यृत्वियो योनिः स ययोररण्योस्ते ऋत्वियवती प्रजननाभिमुखगर्भवत्यौ अग्निरेव रेतोरूपेण गर्भो ययोस्ते अग्निरेतसौ तादृशौ स्थो भवथः । तादृशौ युवां गर्भं दधाथां गर्भं पोषयन्तं ते तादृशौ वां युवामहं दद आदत्तवानस्मि । ते युवां वीरं कर्म सुशूरं पुत्रं बिभृथो धारयथः । अतो वीरमेव जनयिष्यथ इति यत्तत्सत्यं न तु मिथ्या । ते युवां मत्तो निमित्तभूतात्प्रातः प्रजनयिष्येथे परेद्युः प्रातः काले सर्वथा वह्निमुत्पादयिष्यथः । प्रजाते वह्निमुत्पादितवत्यौ ते युवामपि प्रजनयिष्यथः प्रजनयितारं कारिष्यथः अतःस्वर्गे लोके प्रजया पशुभिर्ब्रह्मवर्चसेन च युक्तो भविष्यामीति शेषः ॥

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ।
मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः ॥ ३७ ॥
(तै० सं० ५ । ७ । ९)

सा० भा० अग्ने परकीयस्याग्नेर्धयनात्पूर्वमग्निं स्वकीयं पूर्वसिद्धं वह्निं गृह्णामि स्वात्मन्येव यथा स्थिरो भवति तथा स्वी करोमि किमर्थं धनपुष्टिशोभनापत्यशोभनभृत्या (वीर्या) र्थमस्य गृहीतस्याग्नेः प्रसादात्प्रजामुत्पत्स्यमानां पुत्रादिका मयि स्थापयामि । वर्चः शारीरं बलं च मयि स्थापयामि । सुवीराः शोभनपुत्रभृत्योपेता वयं तनुवा मदीयेन शरीरेण सहारिष्टाहिंसारहिताः स्याम ॥

यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश ।
तमात्मन्परिगृह्णीमहे वयं मासो अस्माꣳ अवहाय परागात् ॥ ३८ ॥
(तै० सं० ५ । ७ । ९)

सा० भा० हे पितरः पालका अस्मच्छरीरगता भूतेन्द्रियविशेषा अमर्त्यो मरणरहितो योऽग्निर्हृत्स्वन्तर्हृदयावयवेषु मध्य मर्त्यान्मरणयोग्यानस्मानाविवेश सर्वतः प्रविष्टस्तमग्निमस्मात्मत्परिगृह्णीमहे स्वशरीर एव स्थिरं धारयामः। सोऽग्निरस्मानवहाय परित्यज्य मा परागादन्यत्र मा गच्छतु ।

चयनप्रकरणस्थे इमे ऋचे उत्कृष्य भगवता आपस्तम्बेन आधानप्रकरणे अध्वर्युयजमानयोर्जपार्थं विहिते । तत्र चयनात्पूर्वमित्यत्र आधानात्पूर्वमिति व्याख्येयम् ।

अपेत वीत वि च सर्पता तो येऽत्रस्थ पुराणा ये च नूतनाः ।
अदादिदं यमो वसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ ३९ ॥
(तै० ब्रा० १ । २ । १).

सा० भा० यमपुरुषाः संबोध्यन्ते । हे यमपुरुषा अत्राग्निदेशे पुराणा ये यूयं स्थ नूतनाश्च ये यूयं स्थ ते सर्वेऽप्यतो देशादपेतापगच्छत । वीत परस्परं वियुक्ता गच्छत पुनरपि विदूरं सर्पत । यमो राजेदमवस्थानमदायजमानाय दत्तवान् । पितरश्चेमं लोकं स्थानविशेषमस्मै यजमानार्थमक्रन् कृतवन्तः ।

अग्नेर्भस्मास्यग्नेः पुरीषमसि ॥ ४० ॥ (१ । २ । १)

सा० भा० हे सिकतेऽग्नेर्भस्म भासमानहेतुस्त्वमसि तथाग्नेः पुरीषं पूरणहेतुस्त्वमसि ।

संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ॥ ४१ ॥ (१ । २ । १)

सा० भा० हे ऊष संज्ञानं सम्यग्ज्ञानहेतुः कामधरण कामानां धारणहेतुश्च त्वमसि ते त्वदीयं यत्कामधारणं सामर्थ्यं तन्मय्यपि भूयात् ।

यद्दश्चन्द्रमसि कृष्णं तदिहास्तु ॥ ४२ ॥ (तै० ब्रा० १ । १ । ३),

नायं मन्त्रस्तथापि सूत्रकारेण ऊपनिवपनानन्तरं ध्यानं विहितं तत्कारोऽयं ब्राह्मणे विधीयते । यत् अदः इदं भूसारं दृश्यमानं चन्द्रमसि कलङ्करूपं कृष्णं तस्माद्भूसारत्वादूषाणां निवपनकाले तत्कृष्णरूपमत्र तिष्ठतीति ध्यायेत् । तथा सति द्युलोकसंबन्धिन्यूषे भूलोकसंबन्धिनि कृष्णे चाग्निराहितो भवति । इति विचारण्यचरणा बभाषिरे ।

उदेहाग्ने अधि मातुः पृथिव्या विश आविश महतः सधस्थात् ।
आनुं त्वा ये दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपाम् ॥ ४३ ॥
(आ० श्रौ० सू० । ५ । ९ । ८)

+ हे अग्ने । अधिमातुः पृथिव्या उदेहि उद्गच्छ । तथा सधस्थात् पृथिव्या सह विद्यमानान्महत उदकात् 'महदित्युदकनाम । इति निघण्टावेकशतसंख्याकोदकनामसु पठितम् । विश गच्छ । आविश आगच्छ । निरङ्कुशप्रवेशेनाखुना वह्निरुपमीयते । वडवानलस्योदधौ स्थितिः प्रसिद्धा भुवनस्य गोपां रक्षकं हव्यवाहं त्वां देवयन्तो यजमाना आखुम् आखनति विदारयति पापानीत्याखुस्तं पापविदारणं त्वा दधिरे आश्रितवन्तः ॥

यत्पृथिव्या अनामृतं संबभूव त्वे सचा ।
तदग्निरग्नयेऽददात्तस्मिन्नाधीयतामयम् ॥ ४४ ॥
(आप० श्रौ० सू० ५ । ९ । ८)

+ यत्पृथिव्या सचा सहानामृतममरणधर्मकं निर्जलं वा वल्मीकं त्वे अग्नये कीट- सर्पाद्यर्थं संबभूव उदपद्यत । तद्वल्मीकवपासंभाररूपमग्निर्लक्षणया तदुपासको यजमानः अग्नयेऽग्न्यर्थमददादगृह्णात्तस्मिन्वल्मीकवपारूपसंभारेऽयमग्निराधीयतां स्थाप्यताम् ।

उत्समुद्रान्मधुमाँ ऊर्मिरागात्साम्राज्याय प्रतरां दधानः ।
अमी च ये मघवानो वयं चेषमूर्जमधमत्संभरेम ॥ ४५ ॥
(आप० श्रौ० सू० ५ । ९ । १०)

+ समुद्रादग्निवासिनो ह्रदात् साम्राज्याय साम्राज्यं प्रतराम् उत्कृष्टतरं दधानो धारयन् मधुमान् मधुररसयुत ऊर्मिस्तरङ्ग उदागात् ऊर्ध्वमयात् । तैमधमदकम्प्यम् ऊर्जं बलवन्तमिषं रसं येऽमी मघवान इन्द्रप्रमुखा देवा धनवन्तो वा वयं च संभरेम पूरयेम । अनेन संभारे स्थापितेन वह्निना बलवद्रसोपलब्धिरिति तात्पर्यम् ।

इयत्यग्र आसीः । ४६

+ हे वराहविहते मृत्स्ने अग्रे सृष्ट्युत्पत्तिकाले त्वमियती प्रादेशमात्रपरिमाणा आसीः ।

अदो देवी प्रथमाना पृथग्यद्देवैर्न्युप्ता व्यसर्पो महित्वा ।
अदः दृथाः शर्कराभिस्त्रिविष्टप्यजयो लोकान्प्रदिशश्चतस्रः ॥ ४७ ॥
(आप० श्रौ० सू० ५ । ९ । ११)

+ प्रथमाना विस्तृता देवी दीप्यमाना पृथिवी देवैः पृथङ्न्युप्ता स्थापितेति यददः कृत्स्नं त्वा तव महि यशो व्यसर्पः व्यसृपदप्रथयदित्यर्थः । त्वं शर्कराभिरदंहथा दृढा अभू- स्त्वं त्रिविष्टप्यजयस्त्रिविष्टपे स्वर्गे भवो दिव्य इति यावत् जयश्चतस्रः प्रदिशश्चतुर्दिक्स्थान् लोकान् व्याप्नोतीति शेषः ।

ऋतं स्तृणामि पुरीषं पृथिव्यामृतेऽध्यग्निमादधे सत्येऽध्यग्निमादधे ॥४८॥
(५ । १० ।)

+ ऋतं सत्यस्वरूपं संभारं स्तृणामि प्रथयामि । पृथिव्यां वराहविहतादिमृदि विद्यमानं पुरीषं मलभूतभागम् ऋतेऽध्यग्निमग्नौ तथा सत्येऽध्यग्निमादधे स्थापयामि । संभारान्तर्गतम- शुचिपदार्थं वह्नौ विनाश्य सत्यं शुद्धपदार्थं प्रथयामीत्यर्थः ।

संयावः प्रियास्तनुवः संप्रिया हृदयानि वः । आत्मा वो अस्तु
संप्रियः । संप्रियास्तनुवो मम ॥ ४९ ॥ (तै० ब्रा० १ । २ । १ ।)

सा० भा० हे वानस्पत्य संभारा वो युष्माकं याः प्रियास्तनुवस्ताः समृध्यन्तामेकस्मि-

---

१ मधुमदिति सत्याषाढीय. पाठः

नेव कार्ये प्रवर्तन्ताम् । तथा वो युष्माकं प्रियाणि हृदयानि च संसृज्यन्ताम् । तथा वो युष्माकं प्रिय आत्मा जीवश्च संसृज्यताम् । तथा मम प्रियास्तनुरोऽपि संसृज्यन्ताम् । एकस्मिन्कार्ये प्रवर्तन्ताम् । ऋत्विग्भिः सह शरीरसङ्गत्वम् ।

सं वः सृजामि हृदयानि सꣳसृष्टं मनो अस्तु वः ।
सꣳसृष्टः प्राणो अस्तु वः ॥ ५० ॥ (१ । २ । १ ।)

सा० भा० हे वानस्पत्य संभारा वो युष्माकं मनो वचश्च संसृष्टमस्तु । हृदयवाक्येन परस्परस्नेहोऽपि विवक्षितः । मनोवाक्येन कार्यैक्यैकमत्यम् । तथा वो युष्माकं प्राणश्च संसृष्टोऽस्तु । अनेनैकविधा प्रवृत्तिर्विवक्षिता ।

प्रायः ब्राह्मणगतामन्त्रा आपस्तम्बेन पुनः सूत्रे पठ्यन्ते । संहितागतास्तु न पठ्यन्ते संहितायां ब्राह्मणे च विद्यमानोऽपि पुनर्न पठ्यते । यथा समाव प्रिया इति मन्त्र उभयत्र संहितायां ब्राह्मणे च पठितस्तथापि सूत्रकारेण प्रतीकमात्रं गृहीत्वा संहितास्थोऽयमिति ध्वनितम् । ब्राह्मणक्रमोऽपि अयथाक्रम इत्यत्र स्वतन्त्रक्रियैव प्रमाणम् ।

इतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः ।
सगायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन् ॥ ५१ ॥
(तै० ब्रा० १ । ४ । ४ ।)

सा० भा० जातवेदा उत्पन्नसर्वजगदभिज्ञोऽग्निः स्वायोनेः स्वकीयात्कारणादितोऽरणेः प्रथममुत्पन्नः । स च गायत्र्यादिच्छन्दस्त्रयेण सहकारिणा देवान्हविश्च प्रकर्षेण जानन्नस्मदीयं हव्यं देवेभ्यो वहतु ।

यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम् ।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ ५२ ॥
(आ० श्रौ० सू० ५ । १० । १३)

+ हे जातवेद । हे अग्ने यास्ते तवान्तरिक्षे दिवि पृथिव्यां च तव शिवा कल्याणकारिण्यस्तनुवस्तन्वः शरीराणीत्यर्थः । ताभिस्तनूभिः संभूयैकीभूय सगणः सखसमूहः सजोषाः सुप्रीतो भूत्वा हिरण्ययोनिर्हिरण्यस्य योनिर्निदानं त्वं हव्यं हविर्द्रव्यं वह देवेभ्यो दिग्देवताः प्रापयेत्यर्थः ।

चन्द्रमग्निं चन्द्ररथं हरित्वचं वैश्वानरमप्सुषदꣳ सुवर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥ ५३ ॥
(आ० सू० ५ । १० । ४)

+ देवास देवा इह सुवर्णे चन्द्रमाह्लादकं चन्द्ररथमाह्लादकरथयुक्तं हरित्वचं मनोहारिशरीरं वैश्वानरं विश्वेषां नराणां हितकृतमप्सुषदं कार्यभूतजले निवसन्तं सुवर्विदं स्वर्गलाभं विगाहं दुष्प्रवेशं तूर्णिं त्वराशीलं तविषीभिः सर्वप्रकारकबलैरावृतं युक्तं भूर्णिं पोषकं सुश्रियं शोभनमग्निं दधुर्धारयामासुः ।

चित्तिः स्रुक्चित्तमाज्यं वाग्वेदिः आधीतं बर्हिः केतो अग्निः विज्ञातमग्निः वाक्पतिर्होता मन उपवक्ता प्राणो हविः सामाध्वर्युः ॥ ५४ ॥
(तै० आ० ३ । १)

सा० भा० आदौ सिसृक्षुः प्रजापतिः सृष्ट्यर्थं केन विधानेन आध्यात्मिकेनेष्टवान् । तदानुवर्तिनः स्रुगादय एतेषु मन्त्रेषु प्रतिपाद्यन्ते । अत्र चित्तिचित्तशब्दाभ्यां निर्विकल्पकसविकल्पकभेदजनकावन्तःकरणवृत्तिभेदौ विवक्षितौ, वाक्प्रसिद्धा आधीत उच्चार्यमाण केतविज्ञातशब्दाभ्यां निर्विकल्पकसविकल्पकज्ञानविषयावभिधीयेते । वाक्पतिशब्देन वाचः प्रवर्तकः कण्ठताल्वादिस्थानेषु सयुज्यमानो वायुरुच्यते । मन प्राणौ प्रसिद्धौ । सामशब्देन तद्धेतुर्वर्णोच्चारणशक्तिरुच्यते । एवं चित्त्यादयो दश शरीरगता पदार्थविशेषाः स्रुगादयो दश पदार्था होमनिष्पादका । अग्निशब्दद्वयेन आहवनीयगार्हपत्यौ विवक्षितौ । उपवक्तृशब्देनानुवचनकर्तृहोम । प्रैषवक्ता मैत्रावरुणो विवक्षित । यद्वा प्रोक्षणादिष्वनुज्ञाया पृष्टाया ब्रह्मा समीपे स्थितः ॐ प्रोक्षेत्यादिना तदनुज्ञा वक्ति तस्मादयमुपवक्ता । चित्त्यादय शरीरगतपदार्था. स्रुगादिरूपा इतिवाक्यार्थः । अस्मिन्मन्त्रे स्रुगादीनां होमसाधनानां दशानामभिहितत्वं दश होतेत्युच्यते ।

सहाग्नेऽग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया सह पशुभिर्ब्रह्मवर्चसेन ॥ ५५ ॥ (आ० श्रौ० सू० ५ । १० । ९)

+ हे अग्ने ! अग्निना मथ्यमानवह्निना सह रय्या धनेन सह पुष्ट्या पोषणेन सह प्रजया सतत्या सह पशुभिर्ब्रह्मवर्चसेन ब्राह्मेण तेजसा सह जायस्वोत्पत्ति लभस्व । रयिपुष्टिप्रजापशुब्रह्मवर्चसानि मह्यं देहीत्यर्थः ।

उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् ।
आयुः प्रजा९ रयिमस्मासु धेह्यजस्रो दीदिहि नो दुरोणे ॥ ५६ ॥
(तै० ब्रा० २ । ५ । ८)

सा० भा० हे जातवेद पुनरपि त्वमुपावरोहारण्यो सकाशाद्भूमावतर । अवतीर्य च प्रजानंस्त्वं देवरेद हविरिति प्रकर्षेण जानन्नोऽस्मदीयं हव्यं देवेभ्यो वह प्रापय । आयुरादिकमस्मासु संपादय । अजस्रो निरन्तरं वर्तमानस्त्वं नो दुरोणेऽस्मदीये गृहे दीदिहि दीप्यस्व ॥

पृथिवी होता द्यौरध्वर्युः रुद्रोऽग्नीत् बृहस्पतिरुपवक्ता ॥ ५७ ॥
(तै० ३ । २)

सा० भा० तत्र पृथिव्यादयः प्रसिद्धा तथा होत्रादयश्च उपवक्तृशब्देन समीपे स्थित्वा तत्कर्मस्वनुजानानो ब्रह्मा विवक्षित ।

अग्निर्होता अश्विनाध्वर्यू त्वष्टाग्नीत् मित्र उपवक्ता ॥ ५८ ॥
(तै० आ० । ३ । ३)

सा० भा० अग्न्यादयः प्रसिद्धाः अध्वर्युं प्रतिप्रस्थाता चेत्येवमध्वर्युद्वित्वेन होतृपञ्चकपूरणीयम् । अस्य मन्त्रस्य पञ्चहोतृमन्त्र इति याज्ञिकसमाख्या तस्मात्कथं पञ्चत्वमिति चेदध्वर्युद्वित्वेनेति गृहाण इति भाष्यकार ।

सूर्यं ते चक्षुः वातं प्राणः द्यां पृष्ठम् अन्तरिक्षमात्मा
अङ्गैर्यज्ञम् पृथिवीꣳ शरीरैः ॥ ५९ ॥ (तै० आ० ३ । ४)

सा० भा० अस्य विनियोगः पशुबन्धावुक्तस्तदनुसारेण विद्यारण्यैर्भाषितोऽयं मन्त्रः । हे पशो योऽयं सूर्यः स ते चक्षुः यो वायुः स ते प्राणः या द्यौः स पृष्ठभागः उपरिवर्तित्वसामर्थ्यात् । यदिदमन्तारिक्षं तत्त्वदीयो जीवात्मा मध्यवर्तित्वसामर्थ्यात् । यानि हृदयादीनि अङ्गानि तैः यज्ञं संपादयतीति शेषः । यानि अन्यानि अस्थ्यादीनि शरीरगतानि तैः पृथिवीं प्राप्नुहि इति शेषः । यजमानपक्षेऽपि अयं योजयितुं शक्यः पशुस्थाने यजमान इति सबोधनीयम् । प्रकृते यजमानपरत्वे एव योजनीय कुत इति चेत् । आधाने " अथ चतुर्होतॄन्यजमान वाचयति " इति आपस्तम्बेन तत्र विनियुक्तत्वात्–चित्तिः स्रुगित्यादिपञ्चानुवाकाश्चतुर्होतार इति याज्ञिकसमाख्या । विद्यारण्यास्तु अन्यथा व्याचख्युः ।

महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् ।
अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता ॥ ६० ॥

सा० भा० महाहविः सत्यहविः अच्युतपाजाः अच्युतमना अनाधृष्यः अप्रतिधृष्यः अयास्यः एते सप्तर्षयो महर्षयः । तन्महर्षिस्वरूपा अनया होत्रादयः यज्ञस्य सोमयागस्य अभिगरौ अभित उद्गातुः पुरस्तात्पश्चाच्च गृहीतप्रस्तारप्रतिहारभागौ गायेत इति प्रस्तोतृप्रतिहर्तारावभिगरौ । होताध्वर्युराग्नीध्रो ब्रह्मा प्रस्तोता प्रतिहर्तोद्गातेति सप्तसंख्याका होतृनिष्पादका अत्रोक्ताः । अयं मन्त्रः सप्तहोतेत्युच्यते ।

अजनग्निः पूर्वः पूर्वेभ्यः पवमानः शुचिः पावक ईड्यः ॥ ६१ ॥
(आप० श्रौ० सू० ५ । ११ । १२)

+ पूर्वेभ्यः पूर्वस्थितेभ्यः पवमानः स्वयंशुद्धः शुचिर्दीप्यमानः पावकोऽन्यस्य शोधक ईड्यस्तुत्योऽग्निरजन् प्रादुरभूत् ।

प्रजापतेस्त्वा प्राणेनाभिप्राणिमि पूष्णः पोषेण मह्यम् ।
दीर्घायुत्वाय शतशारदाय शतꣳ शरद्भ्यः । आयुषे वर्चसे
जीवात्वै पुण्याय ॥ ६२ ॥ (तै० ब्रा० १ । २ । १ ।)

सा० भा० हे अग्ने प्रजापतेः प्राणेन प्राणवायुना त्वामभितः प्राणिमि श्वासं करोमि । तथा पूष्णो देवस्य पोषेण सामर्थ्येन त्वाऽभिप्राणिमि । किमर्थम् । मह्यम् । मम शतशारदाय दीर्घायुत्वाय शतसंवत्सरपरिमित दीर्घायुरस्त्विन्द्वति । किंच शतं शरद्भ्यः शतसंख्या-

न्म्य. संवत्सरेभ्य ऊर्ध्वमध्यायु सिद्धये वर्चसे बलाय जीवातवे जीवनौषधाय पुष्टाय सुकृतसिद्धये च ।

अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीडुजम्भम् । दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभिसꣳरभन्ताम् ॥ ६३ ॥ (१।२।१)

सा० भा० मर्त्यासो मनुष्यऋत्विजोऽमृतं मरणरहितमग्निं देवमजीजनन् । उत्पादितवन्तः । कीदृशमग्निमस्रेमाणमगम्यमशोषणीयं वा स्रिवु गतिशोषणयोरिति धातुः । तरणिं दुःखेभ्यस्तारकं वीडुजम्भं दृढदन्तमुग्रमग्रुवोऽङ्गुल्यस्ताश्च शरीरेण सहोत्पन्नत्वात्स्वसारो भगिनीसमानाः । दशसंख्याकास्ता अङ्गुल्यः समीचीरनुकूला भूत्वा जातमभिरूपं पुमांसमभिसरभन्तामभितः संगच्छन्तु ।

सम्राडसि विराडसि सारस्वतौ त्वोत्सौ समिन्धातामन्नादं त्वान्नपत्याय ॥ ६४ ॥ (आ० श्रौ० सूत्र० ५ । ११ । ६ ।)

+ हे अग्ने ! त्वं सम्राट् राजराजो विराट् विशेषेण शोभमानोऽसि । सारस्वतौ जलवन्तावुत्सौ मेघावन्नादमन्नं भक्षकं त्वा त्वामन्नपत्यायान्नाधिपत्याय समिन्धातां प्रदीपयताम् । अग्निन्धनं तेज इति तु प्रसिद्धम् ।

भृगूणां त्वा देवानां व्रतपते व्रतेनादधामि ॥ ६५ ॥ (आप० श्रौ० सू० ५ । ११ । ७ ।)

सा० भा० हे व्रतपते कर्मस्वामिन् ये मनुष्या भृगुगोत्रे त्पन्ना. तेषां सम्बन्धिना व्रतेन कर्मविशेषेण निमित्तभूतेन त्वामादधामि इहायतने स्थापयामि । देवानामिति सूत्रे विशेषः । तस्यार्थस्तु देवानां भृगूणां च व्रतपते इति ।

अङ्गिरसां त्वा देवानां व्रतपते व्रतेनादधामि ॥ ६६ ॥ (आप० श्रौ० सू० ५ । ११ । ७ ।)

सर्वं पूर्ववत् अङ्गिरोगोत्रेत्पन्नानामिति विशेष ।

आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामि ॥ ६७ ॥ (आप० श्रौ० सू० ५ । ११ । ७ ।)

अन्येषामन्यगोत्रोत्पन्नानां ब्राह्मणानामादित्यानां त्वा इति विशेष । तेषामादित्या एव देवता. । एतेषां मन्त्राणामर्थोऽप्यनुसंधातव्यः ।

भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे ॥ ६८ ॥ (तै० सं० १ । ५ । ३)

सा० भा० हे गार्हपत्यप्रदेश त्वं लोकत्रयात्मकोऽसि । तत्र भूम्ना बाहुल्येन भूमिरसि वरिणा वरिम्णा श्रेष्ठत्वेन द्यौरसि । महित्वा महत्त्वेनान्तरिक्षमसि । हेऽदिते भूमे सम्प्रदेशरूपे देवि तवोपस्थेऽन्नभक्षकं गार्हपत्याग्निं यजमानस्यान्नयोग्यान्नसिद्धय आदधे ॥

आयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥ ६९ ॥
(तै० सं० १ । ५ । ३ ।)

सा० भा० अयं गार्हपत्य आदित्यरूपेण गौर्गमनशील पृश्नि श्वेतवर्णो जगदाक्रमीत् । आक्रमणप्रकार एव स्पष्टी क्रियते । पुनर्मातर पृथिवीमसनत् । आसीदत् । प्राप्नोदित्यर्थ । सुव स्वर्गरूप पितर च प्रय प्रकर्षेण गच्छन्नवस्थित द्यौ पिता पृथिवी मातेति श्रुत्य तरात्तयोर्मातापितृत्वम् ॥

घर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भुवत् ।
छर्दिस्तोकाय तनयाय यच्छ ॥ ७० ॥ (तै० ब्रा० १ । १ । ७)

सा० भा० घर्मो दीप्तिर्ज्वाला स च घर्मोऽग्निशरीरस्य शिर स्थानीय । तच्च शिरः अय पुरोवर्ती गार्हपत्योऽग्नि । तादृश हे गार्हपत्याग्ने त्वमस्मदीये पशुभि सह संप्रियो भुवसम्यक्प्रीतियुक्तो भव । ततोऽस्मदपत्याय च च्छर्दिर्यच्छ तेजो देहि ।

यास्ते शिवास्तनुवो जातवेदो या अन्तरिक्ष उत पार्थिवीर्याः ।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ ७१ ॥
(आ० श्रौ० सू०)

+ हे जातवेद । हे अग्ने ! यास्ते तवा तरिक्ष उताथवा पार्थिवी पार्थिव्य पृथिव्यां विद्यमाना शिवा कल्याण्यस्तनव शरीराणि ताभिस्तनूभि सभूयैकीभूय सगण ससमूह सजोषा सुप्रीतो भूत्वा हिरण्ययोनिर्हिरण्यस्य योनिर्निदान त्व हव्य हविर्देव्य वहेन्द्रवाय्वादिसमीप प्रापय ।

प्राणे त्वामृत आदधाम्यन्नादमन्नाद्याय गोप्तारं गुप्त्यै ॥ ७२ ॥
(तै० ब्रा० १ । २ । १)

सा० भा० हे गार्हपत्य प्राणेऽस्मदीये निमित्तभूते सति तद्रक्षार्थममृत त्वामादधामि । ममान्नाद्यसिद्ध्येऽन्नाद मम गुप्त्यै रक्षणसिद्ध्ये गोप्तार त्वामादधामि ॥

दिवस्त्वा वीर्येण पृथिव्यै महिम्नान्तरिक्षस्य पोषेण पशूनां तेजसा सर्वपशुमादधे ॥ ७३ ॥ (आप० श्रौ० सू० ५ । १२ । २ तै० ब्रा० १ । २ । १)

सा० भा० हे गार्हपत्य द्युलोकस्य यद्वीर्यं पृथिव्याश्च यो महिमा अन्तरिक्षस्य यत्पोषसामर्थ्यं पशूना यत्तेजस्तै सर्वैरपि पशुप्रदानसामर्थ्यं त्वामिह आयतन आदधे । अत्र मन्त्रद्वये ब्राह्मणे सूत्रे च पाठभेद —प्रथममन्त्रे—प्राणे इति सप्तमीविभक्तिर्ब्राह्मणे-सूत्रे प्राणमिति द्वितीया । द्वितीये मन्त्रे " पशूनां तेजसा " इति पदद्वय ब्राह्मणे नास्त्येकसूत्रे त्वस्ति । विनियोगस्तूभयोरपि भाष्यकारेण आपस्तम्बसूत्रोक्त एवाङ्गीकृत ॥

प्रथमद्वितीयमन्त्रौ बौधायनः यथा ब्राह्मणं सूत्रयांबभूव। प्रथममन्त्रे भगवत आपस्तम्बस्य सूत्रेण अमृते इति सप्तमी ब्राह्मणे द्वितीया तदनुसारेणार्थोऽनुसंधेयः। वस्तुतस्तु ब्राह्मणेन आहवनीयाधाने विनियुक्तो मन्त्रः। विभक्तिपरिणामेन अत्र विनियुक्तः उभयत्रापि विभक्तिपरिणामः समानः। अत एव वयं न किंचिद्विशेषमाचक्ष्महे। तत्र तु प्राणमिन्द्रस्य स्थानेऽमान इति प्रत्यूह आपस्तम्बेन सूत्रित इत्यन्यदेतत्॥

अग्ने गृहपतेऽहे बुध्न्यपरिषद्य दिवः पृथिव्याः पर्यन्तरिक्षा ल्लोकं

विन्द यजमानाय। पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके।

यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनि-

दधामि॥ ७४॥ (आ० श्रौ० सू० ५। २। २)

+ हे अग्ने गृहपते गार्हपत्य अहे अयनादहिर्गमनशील इत्यर्थः। तत्संबुद्धिः। बुध्न्य अन्तरिक्षनिवासिन्। बुध्नमन्तरिक्षमिति निरुक्तम्। परिषद्य परिषदे हितः। परिषदः परितः सीदन्ति कर्मानुष्ठितारो य ऋत्विगादयस्तेभ्यो इष्टादृष्टफलप्रदत्वेन हितस्तत्संबुद्धिः। दिवः पृथिव्या अन्तरिक्षात्परि परस्तात्स्वर्गलोकं यजमानाय यजमानमित्यर्थः। विन्द प्रापय। अहमग्ने त्वां पृथिव्या मूर्धन् मूर्धनि यज्ञिये लोके सादयामि निदधामि। हे अग्ने। यो निष्ट्यः समीपस्थः। निसस्त्यप्। योऽनिष्ट्यो दूरस्थः शत्रुर्मामभिदासति पीडयति इदमिमं तमहं त्वया त्वत्साहाय्येनेत्यर्थः। अभिनिदधामि विनाशयामि॥

सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीःश्रेयसीर्दधत्।

अग्ने सपत्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि॥ ७५॥ तै. ब्रा. १। २। १-

सा० भा० शोभनो गार्हपत्योऽयमग्निः अरातीर्द्वेषिणो विशेषेण दहन्नुषसो दिवसान्श्रेयसीः श्रेयसीर्दधदुत्तरोत्तरश्रेष्ठान्कुर्वन्वर्तते। हेऽग्ने गार्हपत्य सपत्नानस्मदीयान् शत्रूनपबाधमानः पीडयन्धनपुष्टिमन्नरसं चास्मासु संपादय॥

वातः प्राणस्तदयमग्निः संप्रियः पशुभिर्भुवत्।

स्वदितं तोकाय तनयाय पितुं पच॥ ७६॥

सा० भा० योऽयमग्निर्वायुः सोऽग्निः प्राणस्तं प्राणरूपमयमाधीयमानो गार्हपत्याग्निः हे गार्हपत्याग्ने त्वमस्मदीयैः पशुभिः सह संप्रियो भव। अस्मत्पुत्राय तत्पुत्राय च स्वदितं स्वादुयुक्तं पितुमन्नं पच पक्वं कुरु इति दक्षिणाधानेऽयं मन्त्रो विनियुक्तः परं गार्हपत्याधानोत्तरं यजमानेन वाचनीयोऽयं मन्त्रः इति गार्हपत्यपदं प्रयुक्तमस्माभिरत्र पितुं पचेत्यपि यद्यप्यन्यनिदानमिति पुत्रादि संत्वै अमनुष्यादय पार्थिवेन धातुना सह योजयेत्यर्थः। विनियोगानुसारेणार्थोऽर्थविनिगम इति मीमांसका.। स च प्रतिविनियोगं भिन्न एव

यद्वाचन स्वरितसि ऐन्द्रया गार्हपत्यमुपतिष्ठते इत्यत्र बलाबलाधिकरणे मीमांसायोऽयं सम्प्रपञ्चितो विषयः ॥

अग्नेश्चभुस्त्वदसौ सूर्यस्त्वदयमग्निः संप्रियः पशुभिर्भुवत ।
यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रम् ॥ ७७ ॥
तेन मे दीदिहि तेन त्वादधेऽग्निनाऽग्ने ब्रह्मणा । (तै०ब्रा० १ । १ । ७))

सा० भा० अर्कोऽर्चमानो मण्डलाख्या वह्निशरीरस्य चक्षुःस्थानीयस्त्वत्तु,स्वरूपमसौ दिवि दृश्यमानः सूर्यरूप. स सूर्योऽयमाधीयमान आहवनीयोऽग्नि. । हे आहवनीयास्मदीयैः पशुभि. संप्रियो भव । हे शुक्र दीप्यमानाहवनीय ते त्वदीय यच्छुक्र वर्चो वह्निप्रभृत दीप्तिरूपं तेजो या च शुक्रा तनूर्ज्वालारूप शरीर यदप्यजस्र शुक्र ज्योति. सर्वदा वर्तमानो मास्वरशरीरगतप्रकाशस्तेन सर्वेण मे दीदिहि मां प्रकाशय । हेऽग्ने ब्रह्मणा परिवृढेन अग्नेश्चक्षुरितिमन्त्रेण तेन पूर्वोक्तगुणयुक्तेनाग्निनाऽऽहवनीयरूपेण त्वामिहादधे ।

या ते अग्ने पशुषु पवमाना प्रिया तनूर्या पृथिव्यां याऽग्नौ ।
या रथंतरे या गायत्रे छन्दसि तां त एतेनावयजे स्वाहा
॥ ७८ ॥ (आप० श्रौ० स० ५ । १६ । ४ ।)

+ हे अग्ने पशुषु पवमाना स्वयञ्शुद्धा या तव प्रिया तनू शरीर या पृथिव्या या अग्नौ मथ्यमाने या रथंतरे साम्नि गायत्रे छन्दसि च तनूरस्ति ते तव तां तनूमनेन हव्येनावयजे यजे स्वाहा ।

या ते अग्नेऽप्सु पावका प्रिया तनूर्याऽन्तरिक्षे या वायौ या वा-
मदेव्ये या त्रैष्टुभे छन्दसि तां त एतेनावयजे स्वाहा ॥ ७९ ॥
(५ । १६ । ४ ।)

+ अप्सु जलेषु । पावका शोधिका अन्तरिक्षे । वायौ । वामदेव्ये साम्नि त्रैष्टुभे छन्दसि । अन्यत्पूर्ववत् ।

या ते अग्ने सूर्ये शुचिः प्रिया तनूर्या दिवि यादित्ये या बृह-
ति या जागते छन्दसि तां त एतेनावयजे स्वाहा ॥ ८० ॥
(५ । १६ । ४ ।)

+ सूर्ये सवितरि शुचिर्दीप्यमाना । दिवि । बृहति साम्नि । जागते छन्दसि । अन्यत्पूर्ववत् ।

ओजसे बलाय त्वोद्यच्छे वृषणे शुष्मायायुषे वर्चसे ।
सपत्नतूरसि वृत्रतूः ॥ ८१ ॥ (तै० ब्रा० १ । १ ।

सा० भा० हेऽग्ने रथेन प्रभूतिनिमित्तभूतेन

शरीरसामर्थ्यम् । वृषन्शब्द. सेचनसामर्थ्यवाची शुष्मशब्दोऽत्र सहकारिसंपादित शक्तिमात्रवाची । आयुः प्रसिद्धम् । वर्चः कान्तिः । हेऽग्ने त्वं सपत्नतूरसि वैरिहिंसकोऽसि । तथा वृत्रतूः धर्मनुद्देरावरकाणां पापानां हिंसकोऽसि ।

यस्ते देवेषु महिमा सुवर्गो यस्त आत्मा पशुषु प्रविष्टः ।
पुष्टिर्या ते मनुष्येषु पप्रथे तया नो अग्ने जुषमाण एहि ॥८२॥ (१।२।१)

सा० भा० हेऽग्ने देवेषु मध्ये कर्मफलभूत. स्वर्गरूपो यस्ते महिमा पशुषु क्षीरादिद्रवि स्वरूपेण प्रविष्टो यस्तवात्माऽत्यन्तप्रियः पदार्थो मनुष्येषूदराग्निजनिता या त्वदीया पुष्टिः पप्रथे प्रसिद्धा वर्तते । तया पुष्ट्या तदुपलक्षितस्वर्गक्षीराभ्या च नोऽस्माञ्जुषमाण एहि ।

दिवः पृथिव्याः पर्यन्तरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः ।
यत्र यत्र जातवेदः संबभूथ ततो नो अग्ने जुषमाण एहि ॥ ८३ ॥
(१ । २ । १)

सा० भा० दिवः पृथिव्या अन्तरिक्षाद्वा परिगतात्पशुभ्य ओषधीभ्यश्चोपरि तथा यत्र यत्र देशविशेषे हे जातवेद सम्भूथोत्पन्नोऽसि । हे अग्ने ततः सर्वस्मात्स्थानान्नोऽस्माञ्जुषमाण एहि ।

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः स नो भव शिवतमः ।
सुप्रतीको विभावसुः ॥ ८४ ॥

सा० भा० हेऽग्ने विश्वे सर्वेऽपि देवाः प्राणरूपाश्चित्तिभिरयमनवुज्ञाताभिरिन्द्रियवृत्तिभिरुदु ऊर्ध्वमेव त्वा भरन्तु धारयन्तु । स त्वं नोऽस्माकं शिवतमः शान्ततमः सुप्रतीकः सुमुखो विभावसु. प्रभविता वासयिता च भव । अस्य मन्त्रस्य प्रथमपादे विश्वदेवशब्दार्थं दर्शयति । उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणैरेवैनमुद्यच्छते । अग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनं समर्धयति । दीव्यन्ति स्वस्वकार्येषु व्यवहरन्ति इति प्राणाः । चित्तिशब्देन चित्तिमात्रगतेन चित्तमभिप्रेतकार्यं सूच्यते तथा सति यस्मै कार्यायेदमुद्यमनं तेनैव कार्येणैनमग्निं समृद्धं करोति ।

या वाजिन्नग्नेः पशुषु पवमाना प्रिया तनूस्तामावह ।
या वाजिन्नग्नेरप्सु पावका प्रिया तनूस्तामावह ॥
या वाजिन्नग्नेः सूर्ये शुचिः प्रिया तनूस्तामावह ॥ ८५ ॥ (आ० श्रौ० सू० ५ । १३ । ७)

+ वाजिन् अन्नदातः । अग्ने । अन्यत्स्पष्टम् ।

त्रिंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये ।
प्रत्यस्य वह द्युभिः ॥ ८६ ॥ (तै० ब्रा० १ । ५ । ३)

सा० भा० आदित्यरूपस्य गार्हपत्यस्य सम्बन्धि त्रिंशत्संख्याकं धाम मुहूर्तरूपं तेजो विशेषेण राजते । अह्नः पञ्चदश मुहूर्ता रात्रेः पञ्चदश । किं च वैदिकस्तुतिरूपा वाक्पतङ्गाय पक्षिवदाकाशसञ्चारिणमादित्यं शिश्रिये आश्रितवतीत्यर्थः । हे तादृगार्हपत्य त्वां प्रति यदस्माभिरद्यासन्नरूपं प्रतिकूलमाचरितं तत्सर्वमप प्रतिक्षिप मनसि मा कृथाः । द्युभिर्ज्वालारूपाभिर्नोऽस्मदीयं हविर्देवेषु प्रापय । व्यानं त्वा इत्यस्य भाष्ये प्राणं त्वा इत्यत्रत्यमनुसन्धेयं केवलं प्राणमित्यस्य स्थाने व्यानमिति पदं प्रयोक्तव्यं व्यानः सर्वशरीरगः प्राण एव व्यानसंज्ञां प्राप स्थानभेदात् । अग्नेऽन्नपा मयोभुव सुशेव अयमपि पूर्वेण अग्ने गृहपते इत्यनेन व्याख्येयः, अन्नपते अग्ने मयोभुव सुखनिधान मय इति सुखनाम सुशेव सुसेवितुं योग्य । मय भेद शेष समानम् ।

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥८७॥ (तै० ब्रा० १ । २ । १)

विक्रमस्व महाँ असि वेदिषन्मानुषेभ्यः ।
त्रिषु लोकेषु जागृहि प्रजया च धनेन च ॥ (आप. श्रौ. सू.५। १४।५)
इमा उ मामुपतिष्ठन्तु राय आभिः प्रजाभिरिह संवसेय ।
इहो इडा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेदः ॥

सा० भा० हेऽग्ने प्राचीं पूर्वां प्रदिशं प्रकृष्टां दिशमनुलक्ष्य विद्वान् मार्गाभिज्ञः प्रेहि प्रकर्षेण गच्छ । अग्नेर्गार्हपत्यस्येह पुरोऽग्निर्भवास्मिन्देवयजने पूर्वदिग्वर्ती वह्निर्भव । दीद्यानस्त्वं प्रकाशमानः विश्वा आशा विभाहि सर्वा दिशः प्रकाशय । नोऽस्मदीयाय द्विपदे मनुष्याय चतुष्पदे पशवे चोर्जं रसं धेहि सम्पादय ।

हे अग्ने विक्रमस्व अनिष्टनिवारणे पराक्रमं कुरु । त्वं महानत्यधिकशक्तियुक्तोऽसि मानुषेभ्यः मनुष्याणामर्थे वेदिषन्वेद्यामुपविष्टः सन्त्रिषु लोकेषु जागृहि यजमानं नेतुं सावधानो भव प्रजया धनेन च यजमानः सपत्नो यथा स्यात्तथा जागृहि सावधानो भव । अस्मिन्मन्त्रे "प्रजया च धनेन च" इति ब्राह्मणपठितमन्त्रादधिकं सूत्रयाञ्चकार आपस्तम्बः । इमा उ रायो लोके दृश्यमानानि सर्वाण्यपि धनानि मामुपतिष्ठन्तु प्राप्नुवन्तु । आभिः पुत्रपौत्रादिभिः प्रजाभिः सह इह स्थितः सन् संवसेय सम्यक्तिष्ठामि किञ्चेह इहैव जन्मनि विश्वरूपी महिष्यजाधनेरपशुरूपयुक्तेडा गौस्तिष्ठतु । हे जातवेदस्त्वमस्मदीयस्य वसोर्मध्ये स्वामित्वेन स्थित्वा दीदिहि दीप्यस्व वसुर्नाम गृहम् ।

नाकोऽसि ब्रध्नः प्रतिष्ठासंक्रमणः ॥ ८८ ॥ (आ० श्रौ० सू०)

+ हे अश्व ! त्वं नाकः स्वर्गः स्वर्गप्रद इत्यर्थः । ब्रध्नो महान् प्रतिष्ठासंक्रमणः अग्नि-प्रतिष्ठानिमित्तं संक्रमणं यस्येत्यर्थः । एतादृशोऽसि ॥

अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह ।
बृहस्पतिः सविता तन्म आह पूषामाधात्सुकृतस्य लोके ॥ ८९ ॥ (तै० सं० ४ । २ । ८ ।)

सा० भा० अयमश्वो विश्वाः सर्वाः पृतनाः प्रतिपक्षसेना अरातीर्दातृत्वस्यादातॄरूपा अभ्यस्थात्पादेनातिक्रम्य तिष्ठतु । तदभिक्रमणमग्निराह अनुमोदताम् । सोमोऽपि तदाह अनुमोदताम् । बृहस्पतिर्मे मदर्थं तदाह तदनुमन्यताम् । तथा सवितापि तदनुमन्यताम् । पूषा सुकृतस्य लोके फलभूते स्वर्गे मा माम् अधात् स्थापयतु ॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतं जनिम तत्ते अर्वन् ॥ ९० (तै० सं० ४ । २ । ८)

हे अर्वन् । यद्यस्मात्कारणाज्जायमान उत्पद्यमान एव प्रथममादावाक्रन्दः क्रन्दितवानसि अहो अग्न्यादीनामह साधनमिति सर्वैरपि स्तुतमासीत् । जायमानत्वमेव विशदी क्रियते । समुद्रादुद्यन्समुद्रोपलक्षितादुदकात्त्वमुत्पद्यमानः उत वा पुरीषात् । पुरुषात् । पुंस्त्वशक्तिसंपन्नान्महतोऽश्वादुत्पद्यमानः । जन्मन उपस्तुतत्वे दृष्टान्तोऽप्युच्यते— श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतशब्दोऽत्राप्याहर्तव्यः । यथा श्येनाख्यस्य पक्षिणः पक्षौ शीघ्रोत्पतनहेतुत्वात्सर्वैरपस्तुतौ यथा वा हरिणस्य मृगस्य बाहू पादौ शीघ्रगमनहेतुत्वादुपस्तुतौ तद्वदित्यर्थः ।

ये ते अग्ने शिवे तनुवौ विराट् च स्वराट् च ते मा विशतां ते मा जिन्वताम् ।
ये ते अग्ने शिवे तनुवौ सम्राट् चाभिभूश्च ते मा विशतां ते मा जिन्वताम् ॥
ये ते अग्ने शिवे तनुवौ विभूश्च परिभूश्च ते मा विशतां ते मा जिन्वताम् ॥
ये ते अग्ने शिवे तनुवौ प्रभ्वी च प्रभूतिश्च ते मा विशतां ते मा जिन्वताम् ।
यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वादधे ॥ ९१ ॥ (तै० ब्रा० १।१।७)

सा० भा० विराडादिभिः प्रभूतिपर्यन्तैरष्टाभिः शब्दैरुक्ता अग्ने शिवाः शान्तास्तनुवः । हेऽग्ने ते त्वदीये विराट् स्वराडाख्ये ये शान्ते तनू ते उभे मा प्रविश्य प्रीणयताम् । एवमुत्तरत्रापि । विविधं राजत इति विराट् । स्वयमेव राजत इति स्वराट् । सम्यग्राजत इति सम्राट् । वैरिणोऽभिभवतीत्यभिभूः । विशिष्टेन रूपेण भवतीति विभूः । परितो भवतीति

परिभू । आज्ञालक्षणेन प्रभुत्वेन युक्ता प्रभ्वी । प्रकृष्टेनैश्वर्येणोपेता प्रभूतिः । हे अग्ने या एतास्ते त्वदीयाः शिवास्तनुवस्ताभिर्युक्त त्वामिहादधे ॥

यास्ते अग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ ॥ ९२ ॥ (१।१।७)

सा० भा० हेऽग्ने यास्ते घोरास्तनुवः क्षुत्तृष्णादिरूपास्ताभिर्घोराभिस्तनुभिः पाप्मानं गच्छ प्राप्नुहि । अत्र ब्राह्मणे अमु गच्छेति तत्रामुमिति स्थाने शत्रुं वा पाप्मानं वेति वक्तव्यम् । द्वेष्याय प्रहिणोति इति सूत्रात् भाष्यकारः स्वयं शत्रुमित्याचष्टे । प्रयोगकारास्तु पाप्मानमिति पदं प्रयुञ्जिरे । अत्र यथेच्छ व्यवस्था । पाप्मानं वा शत्रुमितिवचने न दोषः । अमुमिति स्थाने यदि शत्रुविवक्षा तर्हि तन्नामनिर्देशो द्वितीयान्त करणीयः । द्विषन्नाम निर्देष्टव्यमिति आरण्यकप्रमाणादवगच्छाम । योऽस्मान्द्वेष्टि य च वय द्विष्मः । इति आरण्यके श्रुतत्वात् ।

यास्ते अग्ने घोरास्तनुवः । क्षुच्च तृष्णा च । अस्नुक्चानाहुतिश्च ।
अशनया च पिपासा च । सेदिश्चामतिश्च । एतास्ते अग्ने घोरास्तनुवः ॥
ताभिरमुं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः ॥ ९३ ॥
(तै. आ. । ४ । २२ ।)

सा० भा० हे अग्ने ते तव संबन्धिन्यः । घोरा अत्युग्रास्तनुवो याः सन्ति कास्ता इति चेत् क्षुदादिभिरसन्तैरष्टकाभिः शब्दैः प्रतिपादिताः । हे अग्ने ते तव संबन्धिन्य एता उक्तास्तनुवः ताभिस्तनुभि सह योऽस्माक द्वेष्टा यश्च द्वेष्यः अमु द्विविध पुरुष गच्छ ।

स्निक्च स्नीहितिश्च स्निहितिश्च । उष्णा च शीता च उग्रा च
भीमा च सदाम्नी सेदिरनिरा । एतास्ते अग्ने घोरास्तनुवः ॥ ९४ ॥
ताभिरमुं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः ॥ ९४ ॥
(तै० आ० ४ । २२)

सा० भा० स्निगादीन्यनिरान्तानि तनुनामानि ।

अस्नुक्	अनाहुतिः	सेदिः
अमतिः	स्निक्	स्नीहितिः
स्निहितिः	सदाम्नी	अनिरा

अन्ये क्षुदादय प्रसिद्धा ।

यदिदं दिवो यदिदः पृथिव्याः संविदाने रोदसी संबभूवतुः ।
तयोः पृष्ठे सीदतु जातवेदाः शंभूः प्रजाभ्यस्तनुवे स्योनः ॥ ९५ ॥
(तै० ब्रा० १ । २ । १)

सा० भा० यदिदमूषाख्यं दिवो यज्ञियं पृथिव्यां वर्तते यच्चादः कृष्णाख्यं पृथिव्या यज्ञियं दिवि चन्द्रमसि वर्तते तेनोभयेन वयमेनं मन्यामहे । रोदसी द्यावापृथिव्यौ संविदाने ऐकमत्यं गते संबभूवतुः । पूर्वमिमौ बभूवतुरिति तयोस्तादृश्योर्द्यावापृथिव्योः पृष्ठ उपरि जातवेदाः सीदतु । कीदृशः प्रजाभ्यः शंभूः प्रजानां सुखस्य भावयिता तनुवे स्योनः स्वशरीराय च सुखकरः ।

अस्य प्राणादपानत्यन्तश्चरति रोचना ।
व्यख्यन्महिषः सुवः ॥ ९६॥ (तै० सं० १ । ५ । ७)

सा० भा० अस्यादित्यस्य रोचना दीप्तिः प्राणादुच्छ्वाससदृशादुदयादपानती निःश्वासः तुल्यमस्तमयं गच्छन्ती द्यावापृथिव्योरन्तश्चरति । महति मण्डले सीदतीति महिष आदित्यः सुवः स्वर्गं व्यख्यद्यजमानेभ्यः प्रकाशितवान् । आदित्यरूपेण स्तूयमान हे आहवनीय त्वामादधामि । अत्रास्ति कश्चिद्विशेषः । भगवत्तापस्तम्बेन भूमिर्भूम्ना इत्यारभ्य महिषः सुवः इत्यन्ता मन्त्राश्चत्वारो ब्राह्मणे पुनराधेये पठिता अपि अग्न्याधेये विनियुक्ताः । गुणोपसंहारे प्रवृत्तस्य भगवत आपस्तम्बस्य अलंकारभूतं चैतत् । अतोऽस्माभिरप्य आहवनीय इति संबुद्धिः प्रयुक्ता । भाष्ये तु गार्हपत्य इति भावितम् । पुनराधेयसूत्रेऽपि भूमिर्भूम्नेति सर्पराज्ञीभिर्गार्हपत्यमादधाति । आप० श्रौ० सू० ५ । २७ । ९ ब्राह्मणमपि तत्रयं सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादध्यात् । तै० सं० १ । ५ । ४ बौधायनस्तु बहुशः यथाब्राह्मणमेव सूत्राणि प्रणिनायेति विदिताखिलसूत्राणां नानधिकतरम् । एतेन श्रौते कर्मणि गुणोपसंहारः प्रायो नेष्टस्तस्येति सुविदितं भवति । इतःपरं सुधीभिराकलनीयो विशेषः ।

अग्ने सम्राडजैकपादाहवनीय दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय । पृथिव्यास्त्वा मूर्धन्सादयामि यज्ञिये लोके । यो नो अग्ने निष्ट्यो योऽनिष्ट्यो भिदासतीदमहं तं त्वयाभिनिदधामि ॥ ९७ ॥ (आप. श्रौ. सू. ५ । १५ । ६)

+ अजैकपादित्यग्निनाम । आहवनीयः । अन्यत्पूर्वं व्याख्यातम् ।

आनशे व्यानशे सर्वमायुर्व्यानशे ॥ ९८ ॥ (तै. ब्रा. १ । २ । १)
अहं त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि ।
ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेदः ॥(तै०ब्रा०१।२।१)

सा० भा० अयमग्निरानशे भोक्तृदेहं व्याप्तवान् । व्यानशे विविधं भोग्यजातं व्याप्तवान् । तथा सर्वमायुरपमृत्युपरिहारेण व्यानशे व्याप्तवान् । हे आहवनीयाग्नेऽहं त्वत्तो हेतो-

ऽस्मि । यदा त्वमासीस्तदानीमहमस्मि । यदा तु त्वं नासीस्तदानीं विद्यमानोऽप्यहं निष्प्रयोजनत्वेन नास्मि । त्वं च मदसि भक्तो हेतोर्जायसे । एतच्च प्रत्यक्षम् । एवमुक्तप्रकारेण मम योनिः कारणं त्वमसि । तवापि योनिः कारणमहमस्मि । तस्मान्ममैव बन्धुः सन्मदीयानि हव्यानि वह । हे जातवेदो यथा लोके पुत्रः पित्रे लोकत्वपुण्यलोकसंपादको भवति तद्वदतिस्नेहेन मम लोककृद्भव ।

अग्न आयूंषि पवस आसुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ ९९ ॥ (तै० सं० १ । ५ । ६

सा० भा० हे अग्ने पुत्रपौत्रादियुक्तानामस्माकमायूंषि पवसे शोधयसि अपमृत्युं परिहरसीत्यर्थः । नोऽस्माकमूर्जं बलमिषमन्नं चासमन्तात्सुव प्रेरय देहीत्यर्थः । दुच्छुनां वैरिसेनामारे दूरे बाधस्व निराकुरु ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत्पोषꣳ रयिं मयि ॥ १०० ॥
(तै० सं० १ । ५ । ६)

सा० भा० सकारान्तोऽपःशब्दः कर्मवाची शोभनमपः कर्म यस्यासौ स्वपाः । हे अग्ने त्वं स्वपाः सन्नस्मे अस्मान्पवस्व शोधय मयि ब्रह्मवर्चसं व्यवहारसामर्थ्यं पुष्टिं धनं च स्थापय ॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ १०१ ॥
(तै० आ० २ । ५)

यः अग्निर्ऋषिः अतीन्द्रियज्ञानवान्पवमानः शोधनशीलः निषादपञ्चमा वर्णाः पञ्चजनाः तेषु भवः पाञ्चजन्यः पुरोहितः सर्वकर्मसु पुरस्तान्निहितस्तमेवंगुणमग्निं महागयं महागृहमीमहे प्राप्नुमः ।

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः । १०२ । (ऋक्संहिता अ. अ. व. ३ । ८ । १०)
वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ १०३ ॥ (३ । ८ । १०)

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो
अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो
मर्त्यां आविवेश ॥ १०४ ॥ (ऋ० संहिता अ०अ०व० ३ । ८ । १०)

समोदन्तेऽस्मिन्यजमाना इति समुद्रोऽग्निः पार्थिवः अरणीभ्यां मथितोऽग्निस्तस्मादूर्मिरूर्मिवदुपर्युपर्युद्भूतो मधुमान्माधुर्योपेतफलसमूहः उदारत् उद्गच्छति अंशुना दीप्त्या अमृतत्वं देवत्वम् " अपाम सोमममृता अभूम " तै० सं० ३ । २ । ५ इति श्रवणादमृता इत्यत्र विशरणा देवा इति व्याचख्युः । तद्देवतास्माभिर्गृहीतममृतत्वं

देवत्वमुपसमानद् उपेति पूरणः प्राप्नोति नरः घृतस्य दीप्तिमतः समिद्द्रव्यस्य विद्यारण्यास्तु दीप्तस्य गुह्यं नाम नमनसाधनं यदस्ति तद्ब्रवीमि तद्देवानां जिह्वा आस्वादकजिह्वास्थानीयं भवति तदेवामृतस्य देवत्वस्य नाभिर्धारकं तदुभयं घृतस्य नामेत्यर्थः । एवं मन्त्रद्वये तत्तत्पक्षानुसारेण योज्यम् । वयं यजमाना घृतस्य नाम प्रब्रवाम स्तुमः । अस्मिन्यज्ञे नमोभिर्नमस्कारैर्हविर्भिर्वा धारयाम च । ब्रह्मा परिवृढो देवः शंस्यमानं स्तूयमानमिदमुपशृण-वच्छृणुयात् । चतुःशृङ्गः चत्वारि शृङ्गाणि वेदे चतुष्टयरूपाणि यस्य गौरो गौरवर्णः तादृशो देवः एतत्कर्म जगद्वा अवमीत् । उद्गिरति निर्वहतीत्यर्थः । अस्य यज्ञात्मकस्याग्नेः चत्वारि शृङ्गाणि चत्वारो वेदाः शृङ्गस्थानीयाः । यद्यपि आपस्तम्बेन यज्ञं व्याख्यास्यामः । स त्रिभिर्वेदैर्विधीयत इत्युक्तं तथाप्याथर्वणस्येतरानपेक्षयैवैकाग्निसाध्यानां कृत्स्नकर्मणा-मभिधायकत्वात् तदपेक्षया चत्वारि शृङ्गा इत्युक्तं त्रयो अस्य पादाः सवनानि त्रीणि अस्य पादाः प्रवृत्तिसाधनत्वात्पादा इत्युच्यन्ते द्वे शीर्षे ब्रह्मौदनं प्रवर्ग्यश्च इति सोमप्राधा-न्येनेदमुक्तं सप्त हस्तासः सप्त च्छन्दांसि हस्ता मुख्यसाधनं छन्दांस्यपि देवताप्रीणनस्य मुख्यसाधनमिति हस्तव्यवहारः । त्रिधा बद्धो मन्त्रब्राह्मणैस्त्रिप्रकारं बद्धः । बन्धनमस्य तन्निष्ठत्वात् । वृषभः फलानां वर्षिता रोरवीति भृशं शब्दायते ऋग्यजुःसामोक्तैः शस्त्रयागस्तुतिरूपैर्होत्राद्युत्पादितैर्ध्वनिभिरसौ रौति एवं महो देव एष यज्ञात्मा महानु-भावो देवो मर्त्यानाविवेश मर्त्यैर्यजमानैर्निष्पाद्यत्वात् प्रवेश उच्यते ।

> प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
> त्वां शश्वन्त उपयन्ति वाजाः ॥ १०५ ॥ (तै०ब्रा० ४ । ६ । ५)

सा० भा० हे अग्ने प्रेद्धः पूर्वमपि प्रकर्षेण दीप्तस्त्वं पुरो नोऽस्माकं पुरोदेशे अजस्रया निरन्तरवर्तिन्या सूर्म्या सूर्मिसमानया ज्वालया दीदिहि पुनरपि दीप्यस्व । ज्वलन्ती लोह-मयी स्थूणा सूर्मी । हे यविष्ठ युवतमाग्ने त्वां शश्वन्तो निरन्तरभाविनो वाजा अन्नान्यु-पयन्ति सामीप्येन प्राप्नुवन्ति ।

> विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
> यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥ १०६ ॥
> (४ । ६ । ५)

सा० भा० हे अग्ने ते तव परमे जन्मनि विधेम वयं ज्ञानेन परिचरेम सधस्थेऽस्माभिः सह स्थातुं योग्येऽवरे निकृष्टे भूलोकवर्तिनि जन्मनि स्तोमैः स्तोत्रैर्विधेम परिचरेम यस्माद्योनेरिष्टकचितिरूपात्स्थानादुदारिथ त्वमुद्गत आविर्भूतोऽसि तं योनिं यजे । विधिपूर्वकं द्रव्य देवतोद्देशेन त्यजे । समिद्धे सम्यक्प्रज्वलिते त्वयि हवींषि प्रजुहुर ऋत्विजः प्रकर्षेण जुह्वति ।

तां सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गाम् ॥ १०७ ॥
(४।६।५।)

सा० भा० पुरा कदाचित्कण्वाख्यो महर्षिरस्याग्नेर्यां सुमतिमनुग्रहकारिणीं बुद्धिमदुहत् । दुग्धवान् । तत्र दृष्टान्तः—प्रपीना प्रभूतः पीनः स्तनभंगो यस्याः सा प्रपीना ता। सहस्रसंख्याकाः क्षीरधारा यस्याः सा सहस्रधारा तां महीं पयसा क्षीरेण संपूर्णां गां धेनु यथा लौकिका दुहन्ति तद्वत् । अतमग्नेः सुमतेरुपदर्शितबुद्धेः स्वाभीष्टं फलं प्राप्तवान् । वरेण्यस्य सर्वैर्वरणीयस्य सवितुः प्रेरकस्याग्नेः संबन्धिनीं ता कण्वेन दुग्धां सुमतिमहमावृणे सर्वतः प्रार्थये कीदृशीं सुमतिं चित्रां स्वापेक्षितबहुविधफलप्रदानसमर्थामित्यर्थः । विश्व जन्यमुत्पाद्यं यस्याः सा विश्वजन्या तां जगदुत्पादनसमर्थामित्यर्थः ।

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन ॥ १०८ ॥
(तै. सं. ४।६।५।)

सा० भा० हे अग्ने तव समिधः सप्तसंख्याका अश्वत्थोदुम्बरपलाशशमीविकङ्कताशनिहतवृक्षपुष्करपर्णरूपाः । ज्वालारूपा जिह्वाश्च सप्त काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लोलायमाना इति सप्त जिह्वाः । ऋषयो मन्त्राः ते च यथोक्तसमित्संपादनार्थाः सप्तसंख्याकाः । अश्वो रूपं कृत्वा इत्यादयः समाम्नाताः प्रियाणि धाम स्थानानि आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यप्राजहिताग्नीध्रीयाख्यानि सोमयागे धिष्ण्यारूपाणि सप्तसंख्याकानि । होत्रा होतृप्रमुखा वषट्कर्तारो होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रोऽच्छावाकश्चेति सप्तसंख्याकास्त्वां यजमानाः सप्तधा यजन्ति । (अत्र यपमृत्विजो यजन्ते इति सुवचम् । नहि यजमानाः परफलप्राप्त्यर्थं यजनं कुर्वन्ति नापि ऋत्विजः स्वफलभागिनो भवन्ति ।) अग्निष्टोम- अत्यग्निष्टोमा उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामो वाजपेयश्चेति सप्त प्रकाराः तावत्त्वं सप्त योनीराहवनीयादिस्थानानि घृतेन सर्वतः पूरय ।

उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १०९ ॥ (तै० सं० ४।१।७)

सा० भा० वयं तमस उत्तरं ज्योतिस्तमसो विनाशकत्वेनोत्कृष्टमग्निसंबद्धं ज्योतिस्परिपश्यन्त उत्कर्षेण सर्वतोऽवलोकयन्तो देवत्रा देवेषु मध्ये सूर्यं देवं सूर्यरूपेणावर्तमानमग्निसंबद्धमेवोत्तमं ज्योतिरगन्म प्राप्ताः स्म ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ११० ॥
(तै० सं० १।४।४३)

सा० भा० केतवो रश्मय जातवेदस तमग्निसदृश देवमुद्वहन्ति ऊर्ध्वदेश एव प्रापयन्ति । किमर्थं विश्वाय कृत्स्नस्य जगत सूर्यं दृशे द्रष्टुम् ।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ११० ॥
(तै० सं० १ । ४ । ४३)

सा० भा० चित्रं रक्तश्वेतादिविविधवर्णं देवाना रश्मीनामनीकं सैन्यसदृश मण्डलमुदगादुदय गच्छति । कीदृश मित्रादिदेवोपलक्षितस्य कृत्स्नस्य प्राणिजातस्येन्द्रियाधिष्ठातृत्वाच्चक्षुस्थानीय तन्मण्डलस्य सूर्यो जगतो जङ्गमस्य तस्थुष स्थावरस्य चात्मा सल्लोकत्रयमाप्रा पूरितवान् ।

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु ।
अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् ॥ ११२ ॥
(तै० ब्रा० ३ । ७ । ११)

सा० भा० यज्ञस्य सबन्धि कियदङ्गमनाज्ञात शास्त्रक्रमेणास्माभिरज्ञात यदप्याज्ञातं सम्यग्विज्ञात सन्मिथु क्रियते मिथ्या क्रियते ज्ञानादज्ञानाद्वान्यथानुष्ठीयते । हेऽग्नेऽस्य कर्मण, सबन्धि तत्सर्वमङ्ग कल्पय फलप्रदानसमर्थं कुरु । हि यस्मात्कारणात्त्व यथातथ कर्मणो वस्तुतत्त्वं वेत्थ ।

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः ।
अग्ने तदस्य कल्पय त्वꣳ हि वेत्थ यथातथम् ॥ ११३ ॥
(तै० ब्रा० ३ । ७ । ११)

सा० भा० यो यज्ञ सोऽय पुरुषसदृशो यथा पुरुषोऽयमन्यूनातिरिक्तविशिष्टावयवस्तथा यज्ञोऽपि । किंचाय यज्ञ पुरुषसमित, पुरुषेण सम्यग्निर्मितश्च यस्मादेव तस्माद्धेऽग्ने ।

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः ।
अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाꣳ ऋतुशो यजाति ॥ ११४ ॥
(३ । ७ । ११)

सा० भा० पाको बालस्तद्वदन्धैस्त्रायन्ते रक्ष्यन्त इति पाकत्रा बालवदप्रबुद्धमतयो दीनदक्षा क्षीणोत्साहा मर्तासो मनुष्या यजमाना यज्ञस्य यदङ्ग मनसा स्वकीयेन न मन्वते नावबुध्यन्ते तदङ्ग विजान क्रतुवित्कृत्स्नयागाभिज्ञो यजिष्ठोऽतिशयेन यष्टु समर्थो होता देवानामाह्वाता अग्निर्देवान्यष्टव्यानृतुशो यजाति तत्तदृतुकाले पूजयतु ।

त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ११५ ॥
(तै० सं० २ । ५ । १२)

सा० भा० हे अग्ने त्वं नोऽस्माकं भक्तिं विद्वान्सन्वरुणस्य देवस्य हेडोऽस्मद्विषयं क्रोधमवयासिसीष्ठा अपनय । यजिष्ठो यष्टृतमोऽतिशयेन यागनिष्पादको वह्नितमोऽतिशयेन देवहविर्वोढा शोशुचानोऽत्यन्तं दीप्यमानो विश्वा द्वेषांसि सर्वान्विरोधिकृतान्द्वेषानस्मत्प्रमुमुग्ध्यस्मत्तः प्रमोचय ।

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुण॰ रराणो वीहि मृडीक॰ सुहवो न एधि ॥ ११६ ॥

सा० भा० हे अग्ने स त्वं नोऽस्माकमन्या रक्षणावमो भव रक्षको भव । कीदृशस्त्वमस्या उषसो व्युष्टौ नेदिष्ठोऽद्यतनस्योषःकालस्योपरितने प्रातःकालेऽत्यन्तं प्रत्यासन्नोऽस्माकं वरुणं वरुणेन कृतमभीष्टनिवारकं पापादिकमवयक्ष्व नाशय । रराणो रममाणः सन् मृडीकं सुखसाधनमस्मदीयं हविर्वीहि भक्षय । ततो नोऽस्माकं सुहव एधि सुखेनाह्वातुं शक्यो भव ।

त्वमग्ने अयास्ययासन्मनसाहितः । अयासन्हव्यमूहिषेऽया नो धेहि भेषजम् ।
॥ ११७ ॥ (तै० ब्रा० २ । ४ । १)

सा० भा० हे अग्ने त्वमयासि सर्वगतोऽसि अयासन्सर्वगत एव सन्यजमानस्य मनसा क्वचित्प्रदेशविशेष आहितः । अयासन्स्वभावतः सर्वगत एव सन्हव्यमूहिषे क्वचित्क इव देशान्तरे हविर्वहसि । अयाः सर्वगतः सन्नोऽस्माकं भेषजं धेहि संपादय ।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा॰सुरे ॥ ११८ ॥
(तै० सं० १ । २ । १३)

सा० भा० विष्णुस्त्रिविक्रमावतारं धृत्वेदं विश्वं विभज्य क्रमते स्म । भूमावेकपदमन्तरिक्षे द्वितीयं दिवि तृतीयमित्येवं त्रेधा पदं निदधे । पांसवो भूम्यादिलोकत्रयरूपा यस्य पदस्य सन्ति तत्पांसुरम् । अस्य विष्णोस्तस्मिन्पदे विश्वं समूढं सम्यगन्तर्भूतम् ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ११९ ॥ (तै० सं० १ । ८ । ६)

सा० भा० शोभनः शरीरगन्धः पुण्यगन्धो वा यस्यासौ सुगन्धिः । पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनस्तादृशं त्र्यम्बकं त्रीण्यक्षाणि नेत्राणि यस्यासौ त्र्यम्बकः । (भगवान्रुद्रः) । तं यजामहे विधिपूर्वकं द्रव्यमग्नौ प्रक्षिपामहे । लोके यथा उर्वारुकफलानि बन्धनाद्वृन्तात्स्वयमेव मुच्यन्ते तद्वदहं त्र्यम्बकप्रसादेन मृत्योर्मुक्षीय मोचनमुक्तो भूयासम् । अमृताच्चिरजीवितात्स्वर्गादेर्वा मा मुक्षीय ।

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः ।
यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥ १२० ॥
(तै० ब्रा० ३ । ७ । ११)

सा० मा० हे हरिवः अश्वयुक्तेन्द्र आभिर्गीभिरस्मदीयस्तुतिभिर्वर्धमानस्त्वमतोऽस्मात्कर्मण ऊनमङ्गं नोऽस्मदर्थमाप्याययाभिवर्धय हे हरिवो यदा यस्मिन्काले स्तोतृभ्यः स्तोत्रनुग्रहार्थं महिगोत्रा महतः पर्वतानेवान्या रुजासि भगान्करोषि अध अथ तदा वयं ते तवानुग्रहाद्वृधिप्रभाजः स्याम प्रभूतधनानां लब्धारो भूयास्म ।

यद्विद्वाꣳसो यदविद्वाꣳसो मुग्धाः कुर्वन्त्यृत्विजः ।
अग्निर्मा तस्मादेनसः श्रद्धा देवी च मुञ्चताम् ॥ १२१ ॥ (आप० श्रौ० सू० ३ । १२ । १)

+ विद्वासः प्रयोगज्ञास्तथाप्यविद्वांसः प्रयोगतत्त्वानभिज्ञा मुग्धा अविवेचका ऋत्विजो यदशास्त्रीयं कुर्वन्ति कुर्वन्ति इत्यर्थः । तस्मादेनसोऽशास्त्रीयानुष्ठानजन्यप्रत्यवायात् मा मामग्निः श्रद्धा देवी च मुञ्चताम् ।

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ १२२ ॥ (तै० सं० ४ । २ । २)

सा० मा० हे अग्ने त्वामादित्या रुद्रा वसवश्च पुनः समिन्धतामुपशान्त पुनः संदीपयन्तु । हे वसुनीथ वसूना धनाना नीथ प्रापयितर्ब्रह्माणो ब्राह्मणा ऋत्विजो यज्ञैर्निमित्तभूतैस्त्वां पुन. समिन्धता त्व घृतेन तुष्टः सस्तनुवोऽस्मदीयशरीराणि वर्धयस्व । तत्त्वतस्त्वयि तुष्टे सति यजमानस्य कामाः सत्याः सन्तु ।

ये अग्नयो दिवो ये पृथिव्याः समागच्छन्तीषमूर्जं दुहानाः ।
ते अस्मा अग्नयो द्रविणं दत्त्वेष्टाः प्रीता आहुतिभाजो भूत्वा
यथालोकं पुनरस्तं परेत स्वाहा ॥ १२३ ॥ (आप० श्रौ० सू० ५।१८।१)

+ इषमन्नमूर्जं रस च दुहानाः पूरयन्तो येऽग्नयो दिवः पृथिव्याश्च समागच्छन्ति इष्टा हुतास्तेऽग्नयोऽस्मै यजमानाय द्रविण धनं दत्त्वाहुतिभाजो हुतद्रव्यसेविनः प्रीता भूत्वा यथालोकं स्वस्वलोकं इत्यर्थः । पुनरस्तं गृह परेत गच्छत स्वाहा । अथवा यथालोकं स्वलोकं गत्वा पुनरस्तं यजमानगृहं परेत प्रत्यागच्छत स्वाहा ।

अथर्व पितुं मे गोपायान्नं प्राणेन संमितम् ।
त्वया गुप्ता इषमूर्जं मदन्तो रायस्पोषेण समिषा मदेम ॥ १२४ ॥ (आप० श्रौ० सू० ५ । १८ । २)

+ हे अथर्व चतुर्वेदप्रवर्तकाचार्यरूप दक्षिणाग्ने ! पितुं पाल्क मे मदीयं प्राणेन समितं समानमन्न गोपाय रक्ष । त्वया गुप्ता रक्षिता इषमन्नमूर्जं रस मदन्तो मदयन्त आनन्दयत इत्यर्थः । रायस्पोषेण द्रव्यपोषकेण समिषा शोभनान्नेन मदेम हर्षयुक्ता भवेम ।

नर्य प्रजां मे गोपाय मूलं लोकस्य संततिम् ।
आत्मनो हृदयान्निर्मितां तां ते परिददाम्यहम् ॥ १२५ ॥ (१५ । ८।२)

+ नर्य नरेभ्यो मनुष्येभ्यो हितो गार्हपत्यस्तत्संबुद्धिः । मे मम लोकस्य पितृलोकस्य मूले निदानभूतां संततिं निस्तृतिशालिनीमात्मनो हृदयान्निर्मितामौरसीं प्रजां गोपाय तां संततिमहं ते तुभ्यं परिददामि । मत्संततिस्तवैव परिचरणं करोत्वित्यर्थः ।

शंस्य पशून्मे गोपाय विश्वरूपं धनं वसु ।
गृहाणां पुष्टिमानन्दं तांस्ते परिददाम्यहम् ॥ १२६ ॥ (आप० श्रौ० सू० ५ । १८ । २

+ हे शंस्य । ऋत्विग्भिः प्रशंसनीयरूपत्वाच्छंस्य आहवनीयस्तत्संबुद्धौ । मे मम पशून्गोपाय रक्ष तथा विश्वरूपं बहुविधं वसु स्थिरं धनं जङ्गमं द्रव्यं तथा गृहाणा लक्षणया गृहस्थितानां दारादीनां पुष्टिं पोषणमानन्दं गोपाय रक्ष तानेतान्सर्वानहं तुभ्यं परिददामि । मदीयपशुवस्त्रादिकं सर्वं त्वदर्थमित्यर्थः ।

पञ्चधाऽग्नीन्व्यक्रामद्विराट् सृष्टा प्रजापतेः ।
ऊर्ध्वारोहद्रोहिणी योनिरग्नेः प्रतिष्ठितिः ॥ १२७ ॥ (तै० ब्रा०)

सा० भा० प्रजापते. संबन्धिनी येयं सृष्टा विराट् विशेषेण राजमाना गोशरीरधारिणी तानेतानग्नीन्पञ्चधा व्यक्रामद्विभज्य क्रान्तवती । अस्मिन्प्रदेशे गार्हपत्योऽस्मिन्नाहवनीय इत्येवं पदेनाक्रम्य दर्शितवतीत्यर्थः । सा पुनः स्वस्याः प्रयोजनविशेषमेव पश्यन्त्यूर्ध्वाभिमुखी द्युलोकमारोहत् । आरुह्य च रोहिण्यभूत् । सा चाग्नेर्योनिः कारणभूता प्रतिष्ठाहेतुश्च रोहिणीनक्षत्रेऽग्नीनामाधेयत्वात् ।

इत्याधानप्रयोगमन्त्रभाष्यम् ।

आधाने गीयमानानि सामानि ।

रथन्तरम्—साम ।

अभि त्वा शूर नोनुमो दुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥
न त्वा वाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ १ ॥

वामदेव्यं—साम ।

कया नश्चित्र आभुवदूती सदा वृधः सखा ।
कया शचिष्ठया वृता ॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः ।
दृढा चिदारुजे वसु ॥
अभीषुणः सखीनामविता जरितॄणाम् ।
शतं भवास्यूतिभिः ॥ २ ॥

बृहत्—साम ।

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया महस्तवानो अद्रिवः ।
गामश्वं रथ्यमिव संकिर सत्रा वाजं न जिग्युषे ॥ ३ ॥

वारवन्तीय—साम ।

अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
संम्राजं तमध्वराणाम् ॥
सघा नः सूनुः शवसा पृथु प्रगामासुशेवः ।
मीढ्वाँ अस्माकं बभूयात् ॥
स नो दूराच्चासाच्च निमर्त्यादघायोः ।
पाहि सदमद्विश्वायुः ॥ ४ ॥

श्यैत—साम ।

अभि प्र वः सुराधसमिन्द्रमर्चयथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥
शतानीकेव प्रजिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्ररसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ ५ ॥

यज्ञायज्ञीय—साम ।

यज्ञायज्ञावो अग्नये गिरा गिरा च दक्षसे ।
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥
ऊर्जोनपातं सहिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ ६ ॥

मन्थनारम्भणकाले सामानि—

अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु ।
दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ १ ॥
अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्युम् ॥ २ ॥
त्वेषस्ते धूम ऋण्वति दिविषञ्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥
अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपोषु जातमार्यस्य वर्धनमग्निं नक्षन्तनो गिरः ॥ ४ ॥
अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ॥ ५ ॥

समाप्तानि आधाने गीयमानानि सामानि ।

आधानमीमांसा ।

तत्र तावत्प्रथमतो मीमांसास्वरूपं शिष्टैरुपवर्णितं यथावद्‌द्वयं सङ्गृह्णीमः । "वेदार्थविचारायैव परमकारुणिको भगवाञ्जैमिनिरसूत्रयद्धर्मसूत्राणि ॥" 'अथातो धर्मजिज्ञासे'त्यादीनि । तदेतेषामल्पाक्षराणामसन्दिग्धानां सारवतां विश्वतोमुखानामस्तोभानामनवद्यानां चोपवर्षादिभिर्वृत्तिकारैर्व्याख्यातानामपि यथावदर्थग्रहणं न सर्वसुगममिति यत्नमातनुत भगवाञ्छबराचार्यः । यदीयं हि भाष्यं सुप्रसन्नमप्यतिगम्भीरमनितरसाधारण्या शय्ययाऽनन्यसुलभयोपपादनसरण्या चातिशेत एव भाष्यान्तराणि । तदत्र जानीमो यद्भाष्येणानेनैव देहातिरिक्तात्मस्वरूपवेदप्रामाण्यादिसमर्थनपरेण सुदूरमपासितं लोकायतमतं दर्शनपदेऽभिषिक्तं च मीमांसाशास्त्रमिति । तदत्र क्षणिकं विज्ञानं शून्यमेव वा परमतत्त्वमिति पौरुषेयो वेदो न प्रमाणपदवीमध्यास्त इति च सौगतमतावलम्बिभिः प्रतारितानां नितरां सुनिमग्नान्दुरपदेशजलधौ सुदूरं गतांश्च सनातनधर्मपथादुद्धीर्षुर्भगवानवतारो सुरसेनानीः कुमारिलसूर्योऽमूमुलत्सौगतनयं प्रत्यष्ठिपत्सनातनसमयं व्याचष्ट च शाबरं भाष्यमिति प्रमोदपरम्परैव सर्वेषामस्माकम् । तदिदं न्यायसुधोपबृंहितमतिगभीरं न पारयति परिच्छेत्तुं गुरुरपीति गुरुमतावलम्बिभिरन्यथान्यथा योज्यमानेषु न्यायेषु प्रवृत्ते चान्धगोलाङ्गूलन्यायेन लोकेऽन्वमहीयुरिमे पार्थसारथिमिश्राः सर्वतन्त्रस्वतन्त्रा न्यायरत्नमालाशास्त्रदीपिकान्यायरत्नाकरैस्तन्त्ररत्नेन च स्वकृतैरिति सुविशदं सर्वेषाम् । अत इदानीं वयमपि आधानमीमांसालेखनीं शास्त्रदीपिकानुसारमेव यथा सर्वैः सुसुखं ज्ञातुं सुशकं स्यात्तथाधानमीमांसनं तथैव व्यापारयाम । तत्रेयं सरणिः —

प्रथमतो वेदवाक्यं ततो जैमिनेः सूत्रं ततस्तदर्थः । ततो याज्ञिकप्रवरस्य भगवत आपस्तम्बस्य सूत्रं यथास्थितम् । ततो ग्रन्थकर्तुर्विचारपरिप्लुतपार्थसारथिमिश्रकृतमीमांसनम् । स्मरन्ति चात्र ग्रन्थकर्तारो मीमांसापद्धतिस्वरूपम् —

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सिद्धान्तश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥ १ ॥

अत्र सङ्गतिश्चेति वा पाठभेदः । क्वचिदुत्तरपक्ष एव सिद्धान्तो भवति क्वचित्पूर्वोत्तरपक्षाभ्यां निर्णीतस्ताभ्यामन्य एव सिद्धान्तो भवति । तदिदं पञ्चकमपि अत्र सुस्पष्टम् । तत्र प्रथमतः आधानविधिं मीमांसयाम । तत्रायं क्रमः —

वसन्ते ब्राह्मणोऽग्निमादधीत ।
ग्रीष्मे राजन्य आदधीत ।
शरदि वैश्य आदधीत । } तै. ब्रा. १ । १ । २

आधानेऽसर्वशेषत्वात् ॥ जै. २ । ३ । ३

सूत्रार्थः—आधानविषये वसन्तादिवाक्यं प्रापकमेवासंदेहत्वादाधानस्य । क्वचिदपि क्रतुं प्रति शेषत्वाभावेन क्रतुविधिभिराक्षेपस्य प्राप्त्यभावात् । इति ।

वसन्तो ब्राह्मणस्य ग्रीष्मो राजन्यस्य शरदि वैश्यस्य   आप. श्रौ. सू. ५। ३। १८

अत्र मीमांसा—इत्यत्र किमाधाने कर्मणि ब्राह्मणादिनिमित्ते वसन्तादिविधिः, उत ब्राह्मणादिवसन्तादि विशिष्टमाधानं विधीयत इति संशयः । तत्र 'यदि ब्राह्मणो यजेत' इत्यादौ ब्राह्मणादीनामप्राप्ततया राजसूयिकाद्विधिप्रयोगे गुणविधौ निमित्तत्वासंभवेन तद्विशिष्टप्रयोगान्तरविधिसंभवेऽपि प्रकृत आहवनीयादिसापेक्षक्रतुविध्याक्षेपलभ्याधाने ब्राह्मणादीनां प्राप्तानां निमित्तत्वसंभवेनाधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिर्युज्यते । नन्वाधानस्यान्यतोऽप्राप्तत्वात्कथं तस्मिन्ब्राह्मणादिश्रवणस्य निमित्तार्थत्वम् । न च क्रतुविधेस्तदाक्षेपः संभवति आधानविधावाहवनीयादिशब्दश्रवणाभावेन तस्य क्रतुविध्यपेक्षिताहवनीयादिसाधकत्वे प्रमाणाभावादिति चेन्न । 'नक्तं गार्हपत्यमादधाति' 'अर्धोदिते सूर्ये आहवनीयमादधाति' इत्यादिवाक्येष्वाधानस्याहवनीयादेश्च साध्यसाधनभावावगमात् । यद्यपि तानि वाक्यानि गुणविधायकान्येव न त्वाधानविधायकानि तथापि 'गार्हपत्यम्' इत्यादिद्वितीयया साध्यत्वानुवादिन्याधानस्य तत्साधनत्वावगमसंभवः । यद्वा 'य एवं विद्वानग्निमाधत्ते' इति सामान्यतः सर्ववर्णानामाधानविधायकमिति प्राप्ताधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिरिति प्राप्ते, सिद्धान्तयति—

आधानेऽसर्वशेषत्वात् ॥ ४ ॥

आधाने विधेये वसन्तादिवाक्यं ब्राह्मणादिवसन्तादिविशिष्टाधानप्रापकम्, न तु प्राप्ताधाने निमित्तसंयोगेन कालविशेषबोधकम् । कुतः, असर्वशेषत्वादाधानस्य सर्वक्रत्वर्थतया विधेरश्रवणात् । आधानविधिसद्भावे हि 'आदधीत' इत्यात्मनेपदबलादाधानसाध्याग्नीनां कर्तृगामिफलार्थत्वात् सर्वाधानसाध्यत्वं लभ्यते । आक्षेपपक्षे तु 'कृत्तिकास्वग्निमादधीत' 'वसन्ते ब्राह्मणोऽग्निमादधीत' इत्यादिगुणवाक्येष्वात्मनेपदस्यानुवादत्वेनाविवक्षिततया क्रतुविधिभिराधानमात्राक्षेपेऽपि तस्य स्वकर्तृकत्वे प्रमाणाभावात्परानुष्ठिताधाननिष्पन्नाग्नीनां क्रयादिना संपादनं स्यादिति कथं नियमेन क्रतुविधिभिराधानस्य प्राप्तिः । एवं चाधानस्य तदुद्देशेन नैमित्तिकगुणस्य च विधौ वाक्यभेदप्रसङ्गाद्ब्राह्मणादिवसन्तादिविशिष्टाधानविधिः । तथा च वसन्तादिगुणकप्रत्यक्षविधौ जाते 'य एवं विद्वानग्निमाधत्ते' इत्यस्य वर्तमानापदेशस्य विधित्वकल्पनागौरवमपि नानुसर्तव्यं भवति । न चैवमपि वसन्तादिवाक्येष्वाहवनीयादिशब्दाभावादाधानोत्पन्नाग्नीनां कथं क्रत्वर्थता स्यादिति वाच्यम् । वसन्तादिवाक्ये आहवनीयादिपदाभावेऽपि 'नक्तं गार्हपत्यम्' इत्यादिगुणवाक्येषु गार्हपत्यादीनां द्वितीयया आधानसाध्यत्वानुवादबलेन वसन्तादिवाक्येऽग्निपदस्य गार्हपत्यादिपरत्वे पर्यवसानसंभवेनाहवनीयादिष्वन्वयाविरोधः । प्रयोजनं पूर्वपक्षे ब्राह्मणादिश्रवणस्य निमित्तार्थत्वात्कृ-

वर्णसाधारणत्वादिति सूत्रयोजनापि सूपपादा । न चैव शूद्रस्याप्याधान शङ्क्यम् 'अध्वराणा जनयथ पुरोगाम्' 'दर्शमह पूर्णमास यज्ञ यथा यजै' इत्यादिमन्त्रवर्णत आधानस्य यज्ञार्थत्वावगमात् 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्त' इति तस्य यज्ञनिषेधाच्छूद्रस्याध्ययननिषेधात् **'न स्त्रीशूद्रौ वेदमधीयाताम्'** इति तस्य विद्याप्रतिषेधाच्चेति । अत्र वय ब्रूम —यान्यत्र याज्ञिकोदाहरणानि दृश्यन्ते तानि विधायकानि न भवन्ति । तैत्तिरीयं वाक्य तु तैत्तिरीयारण्यके श्रुत तत्तु मतवैचित्र्यप्रस्ताव उदाहृतम् । विधिसरूपार्थवाद इति अनन्यगतिका व्यवस्था । अन्यदपि तत्र यच्छब्दस्य सत्त्वान्न विधायकम् । तदुक्तम्—न्यायसुधायाम्—

> सिद्धवद्योतनाद्वक्त्राभिमुख्यासम्भवाद्विधौ ।
> आमनि प्रेरणाभावान्निमित्तत्वाभिधानत ॥ १ ॥
> विधिशक्तिरिह तु स्याद्यच्छब्दादिचतुष्टयम् ।
> प्राप्त्ययोगे तु तद्बाधात्क्वचित्स्यादविह तृता ॥ २ ॥ इति ॥

पार्थसारथिमिश्रा अप्याहु —

> न तावत्क्रतुसामर्थ्यात्प्राप्तिरैकान्तिकी तयो ॥
> सामान्यवचन यत्तद्वर्तमानापदेशकम् ॥ १ ॥

यत्तु समरणकाण्डे श्रुतमिति तदपि तत्र न पश्याम । स्थितेऽपि अर्थवादघटितत्वात्तत्रापि निर्दिष्टैव गति । अन्यास्तु याज्ञिकमते प्रपञ्चिता युक्तय समीचीना इति विभाव्य आधानविधिर्मीमासाया भगवद्भाष्यकारमतानुसरणमेव युक्तमित्युपदयाम. । यत्र तु अनन्यगतिर्नान्यत्र विधायकत्व नास्ति तत्र तु सत्यपि यच्छब्दे विधायकत्वमवश्यमभ्युपेतव्यम् । यथा—'यदाग्नेयोऽष्टकपालोऽमावास्यायाम्' 'यदाहवनीये जुहोति' 'यत्पर्णशाखया वत्सानपाकरोति, इत्यादिस्थलेषु । इति श्रौतिप्रवराणा मीमासकाना च नातिधिगतचरम् । इत्यलमतिपल्लवितेन ॥

> "वर्षासु रथकारोऽग्निमादधीत" ॥
> वचनाद्रथकारस्याधानस्यासर्वशेषत्वात्" जै ६।१।१२

सूत्रार्थ —वचनाद्रथकारस्येदमाधान तथास्याधानस्य सर्वत्रैवर्णिकाधानापेक्षया परिशिष्टत्वादत्रैवर्णिकरथकारस्यैवेदम् ॥

> वर्षा रथकारस्य । आप श्रौ. सू ५ । ३ । १८
> ये त्रयाणा वर्णानामेतत्कर्म कुर्युस्तेषामेष काल ॥ ५।३।१९

मीमासा—"वर्षासु रथकारोऽग्निमादधीत" इति । तत्किं ब्राह्मणादीनामेव रथकरणे निमित्त वर्षाविधिरयमुत रथकारसङ्कस्यानान्तरवर्णस्याधानान्तरविधानमिति सशये द्विजाना

विद्वत्त्वाकाङ्क्षामात्रविधाने च लाघवात्तेषामेव कालविधिर्विदुषोऽवान्तरवर्णस्य विशिष्टाधानविधिरिति प्राप्ते रूढिबलेन योगबाधाद्वचनबलाच्चाविदुषोऽप्यधिकारप्रतीतेरभिधानात् । ऋभूणां त्वेति च मन्त्रवर्णादृभुसौधन्वनपर्यायस्यावान्तरवर्णस्य रथकारस्येदमाधानं विधीयते ।

आपस्तम्बाचार्यसूत्रविरोधो जैमिनिसूत्रेण—तस्य सूत्रस्यायमर्थः—त्रिषु वर्णेष्वन्तर्भूता एव स्ववृत्तिकर्शिता ये रथं कुर्वन्ति तेषामयमाधानकालः । रथकाराधानं ह्यग्निसंस्कारार्थं न भवति रथकारस्याधाने सद्भावेऽपि आधानमात्रोपक्षीणेनाधानविधिना क्रतुविधानकल्पनासंभवाद्विद्याभावेनोत्तरकत्वधिकारानुपपत्त्याग्नीनां भाव्युपयोगराहित्येन संस्कारानर्हत्वात् । नहि प्रभाकरवदस्माभी रथकारस्य क्रत्वधिकारोऽङ्गीक्रियते । तस्मादग्निगुणकमर्थकर्मेदमाधानम् । तच्च स्वर्गफलकम्-तैरग्निभिर्दाहश्च तस्येति मीमांसकाः ।

ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपकुष्टाः । आश्व. श्रौ. सू. २।१।१३

अस्य सूत्रस्य विवरणसमये गार्ग्यनारायण इत्थं व्याचख्यौ । वैश्यस्तक्षकर्मोपजीवी उपकुष्ट इत्युच्यते । अयमुपकुष्टशब्दार्थ आपस्तम्बसूत्रमनुसरति । तेनापस्तम्बाश्वलायनमते वर्णत्रयाद्बहिः क्रत्वधिकारिणो न सन्तीति सुविदितम् ।

तदत्र भगवान् कात्यायनोऽप्यसूसुचत् । यथा—

रथकारस्याधाने ॥ ९ ॥ रथकारस्याधानेऽग्न्याधेयकर्मण्यधिकारो भवति । वर्षासु रथकार आदधीतेति श्रुतेः । अत्रेदं संदिह्यते । किं त्रैवर्णिकानामन्यतमो रथकरणयोगाद्रथकार आहोस्विन्नियतं किंचिज्जात्यन्तरमिति । किं तावत्प्राप्तम् । त्रैवर्णिकानामन्यतम एवेति । कुतः सोऽपि हि रथं करोतीति योगाद्रथकार इत्युच्यते । तस्य च त्रैवर्णिकत्वादाधानं प्राप्तमेव ऋतुमात्रं विधेयम् । तथा सत्येकार्थविधानाद्वाक्यभेदो न भवति लाघवं च । जात्यन्तरपक्षे तु तस्याधानं विधातव्यम् । ऋतुश्चान्यश्च । तथा सति वर्षास्वादधीत रथकार आदधीतेत्येवं वाक्यभेदः स्यात् । अपि च शूद्रत्वसामर्थ्यात्प्रतिषिद्धः । तस्मात्त्रैवर्णिकानामन्यतम एवेति पूर्वः पक्षः । सिद्धान्तमाह—

नियतं च ॥ १० ॥ चो वार्थे वाशब्दश्च पूर्वपक्षनिरासार्थः । न त्रैवर्णिको रथकारस्तस्य शिल्पोपजीवनस्य प्रसिद्धत्वात् किं तु नियतं जात्यन्तरमेव । तत्र केचिदेवमाहुः-वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः शूद्रायां वैश्यादुत्पन्ना करणी तस्यां करण्यां माहिष्यादुत्पन्नो रथकार इति । तदुक्तं स्मृतौ-माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात् । शूद्रायां करणी वैश्यादिति । याज्ञवल्क्योऽपि [१-९२] वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ । वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः । विन्नासु विधिना परिणीतासु । तथा [१-९-९] माहिष्येण करण्यां तु रथकारः प्रजायत इति । अतो रथकारशब्द एवंविधसंकरजातौ रूढः । रूढिश्च योगाद्बलीयसीति न्यायाद्रथं करोतीति योगं बाधित्वा जात्यन्तरमेव रथकारशब्देनोच्यते । तस्येदमाधानं कालविशिष्टं विधीयते विशिष्टविधानाच्च वा-

क्यभेदोऽपि न भवति । अपरे त्वाहुः—रथकारशब्देनात्र सौधन्वनानां ग्रहणम् । ऋभूणां त्वेत्याधानमन्त्रवर्णात् [४-९५] सौधन्वनाश्च ऋभवः ' सौधन्वना ऋभव' इति [ऋक्संहिता [३-६०-४] सामानाधिकरण्यनिर्देशात् । तथाचाह मनुः" [१०-२३] व्रात्यात्तु जायते वैश्यात्सुधन्वाचार्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव चेति । अतो मनूक्तो यः सुधन्वा व्रात्यवैश्यपुत्रस्तत्पुत्राणां सौधन्वनानामृभूणामेवात्राधिकारः । यस्तु याज्ञवल्क्येनोक्तो न तस्याधिकारः सत्यपि रथकारशब्दवाच्यत्वे मन्त्रवर्णाच्छागन्यायेन सौधान्वनानामेवाधिकार इति । तथाच जैमिनिः (६ । १ । ४६) सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्निति सौधन्वना नाम जातिः । हीनास्ते किंचित्त्रैवर्णिकेभ्यो जात्यन्तरम् । नच ते शूद्रा न वैश्या न क्षत्रिया न ब्राह्मणा इति तेषामिदमाधानम् । कथम् । प्रसिद्धेर्मन्त्रवर्णाच्च मन्त्रवर्णो हि भवति सौधन्वना ऋभव इति ऋभूणां त्वेति (४ । ९ । ५) च रथकारस्याधानमन्त्रः । तस्मात्सौधन्वना ऋभवश्च रथकारा अपि च । तं नेमिमृभवो यथेति च ये नेमिं नमन्ति त ऋभव इत्युच्यन्ते रथकाराश्च नेमिं नमन्ति तस्मादत्रैवर्णिकानामशूद्राणामेतदाधानमिति शबरस्वामिनः । ननु विद्याभावेन सौधन्वनानामसमर्थतयानधिकारात्त्रैवर्णिक एवानयव्युत्पत्त्या रथकारशब्देन किमिति न गृह्यते सोऽपि हि रथकारो भवति तस्य चाधानं प्राप्तमेवानूद्य ऋतुमात्रविधानाल्लाघवं भवति जात्यन्तरे तु विशिष्टविधानाद्गौरवं स्यादित्याशङ्कायामुत्तरमाह—

नाभावादिति वात्स्यः ॥ ११ ॥ वात्स्य ऋषिरित्याह न त्रैवर्णिको रथकारः । कुतः, अभावात्, त्रैवर्णिकस्य रथकारस्याभावात्कथमभावो यौगिकोऽयं शब्दो रथं करोतीति रथकार इति तेन यावत्कालं रथकरणसंबन्धस्तावत्कालं रथकार इत्युच्यते न सर्वदा । अतस्त्रैवर्णिकस्य रथकारस्याभावाद्विद्यारहितस्यापि ऋभुसौधन्वनसात्वतापरपर्यायस्य जात्यन्तरस्य रूढ्यावगतस्य वचनादाधानेऽधिकारो भवति ॥

ऋतुनक्षत्रपर्वमीमांसा—

वसन्ते ब्राह्मणोऽग्निमादधीत । ग्रीष्मे राजन्य आदधीत शरदि वैश्य आदधीत । तै. ब्रा. १ । १ । २ ऋभूणा त्वेति रथकारस्य तै. ब्रा. १ । १ । ४ हेमन्तो वा शरद्वैश्यस्य, शिशिरः सार्ववर्णिकः । आप. श्रौ. सू. ५ । ३ । २० ग्रीष्मो हेमन्तश्च राजन्यस्य सत्याषाढश्रौ. सू. ३ । २ वर्षाः प्रजापशुकामवैश्यरथकारनाम् । कात्यायनश्रौ. सू. ४ । ७ यस्मिन्कस्मिंश्चिदृतावादधीत । आश्व. श्रौ. सू. २ । १ । १४ सति संभव एत उक्ता ऋतवोऽवश्य यथासंभव संपादनीयाः । असंभवे तु "यस्मिन्कस्मिंश्चिदृतावयं पक्ष आश्रयणीय. । नहि अङ्गानुरोधेनाङ्ग्यनुष्ठानम् । ऋतुनक्षत्रपर्वादीन्यङ्गानि प्रधानमाधानम् । तत्र प्रमाणम्—अथो खलु यदैवैनं यज्ञ उपनमेत् । अथादधीत तै. ब्रा. १ । १ । २ रथकारा अपि "यदैवैनं श्रद्धोपनमेदथादधीत" सेनारार्यैः

"बौधा. २ । १२ इति ऋतुविचारः । नक्षत्राणि । कृत्तिकामारभ्य विशाखापर्यन्तं देवनक्षत्राणीति श्रुतम् । "कृत्तिकाः प्रथमं विशाखे उत्तमम् । तानि देवनक्षत्राणि" । तै. ब्रा. १ । ५ । २ सर्वं दैवं कर्म देवनक्षत्रेषु कार्यमिति न्यायः । तथापि श्रुत्यैव तन्मध्ये कानिचिन्नक्षत्राणि आधानमनूद्य विहितानि । तानि कृत्तिका, रोहिणी, पुनर्वसू-पूर्वा फल्गुनी उत्तरा फल्गुनी (मघानक्षत्रान्तर विद्यमाने)—चित्रा—इति । तत्र निर्दोषं नक्षत्रं तु रोहिण्येव । बौधायनोऽपि "रोहिण्या संपद्यते तस्यामादधीत" इत्युक्तवान् श्रौ. सू. २ । १२ आपस्तम्बाचार्या अपि "सर्वाणि नियत्रदेके समामनन्ति" सर्वशब्दः प्रकृतपरामर्शवाचकः । आप. श्रौ. सू. ५ । ३ १५ मतान्तराणि च नक्षत्राणि "कृत्तिकाः—रोहिणी—मृगशीर्षं—पुनर्वसू पूर्वा फल्गुनी—उत्तरा फल्गुनी हस्तः—चित्रा—विशाखे अनुराधाः—श्रवणम् उत्तरा भाद्रपदाः" इति । एतेषु यस्मिन्कस्मिन्नपि नक्षत्रेऽग्न्यादधीतेति आचार्येणान्येषामाचार्याणामभिप्रायः सूचितः । एतावता वसन्तादिऋतवः कृत्तिकादीनि नक्षत्राणि विहितानि । इदानीं पर्वविचारः—"अमावास्याया पौर्णमास्या वाधेयः" आप. श्रौ. सू. ५ । ३ । १७ "अमावास्यायामग्न्याधेयम्" इति कात्यायनः । एतावाचार्यौ स्वतन्त्रमेव पर्वाधानं विधत्तः । बौधायनस्तु पर्वनक्षत्राधानं विधत्ते । आश्वलायनस्तु ऋतुपर्वाधान विधत्ते—"वसन्ते पर्वणि ब्राह्मण आदधीत" इति आश्व. श्रौ. सू. २ । १ । १३ । एतेन ऋतुनक्षत्राधानं पर्वाधानं पर्वनक्षत्राधानं केवलऋत्वाधानमिति चतस्रो विधाः सौत्र्यः । इति । तत्र ऋतुनक्षत्रपक्षे शुक्लपक्षः श्रेयान् ।

क्षौमे वसानावग्निमादधीयाताम् ।

गुणस्य तु विधानत्वात्पत्न्या द्वितीयशब्दः स्यात् । जै. ६ । १ । ५

सूत्रार्थः—गुणस्य—क्षौमरूपगुणस्य विधानरूपाद्विधेयकोटिप्रविष्टत्वात् । द्वितीयशब्दो द्विवचनप्रापकः शब्दः—प्रत्ययः पत्न्या एव वाचकः स्यात् ।

क्षौमे वसानौ जायापती अग्निमादधीयाताम् । आप. श्रौ, सू. ५ । ४ । १०

आधान प्रकृत्य क्षौमे वसानावग्निमादधीयाताम्" इति श्रुतम् । तत्र संशयः । किमाधान द्वौ पुमांसौ सखायौ सह कुर्वीतामुतैक इति । तत्र—

पूर्वत्राख्यातसङ्ख्यायाः कर्तृरूपान्वयः स्थितः ।
तेनेह कर्तृरूपस्य भेदो द्विवचनाद्भवेत् ॥
वसानाविति चौकारात्पुंद्वय संप्रतीयते ।
द्वित्वपुंस्त्वे हि तद्वाच्ये नियम्येते च ते मिथः ॥ शा. दी. ६ । १ । ५

यद्यपि पुंद्वयस्त्रीपुंसयोरपि द्विवचनमौकारान्तं दृष्टं कुक्कुटश्च कुक्कुटी च कुक्कुटाविति तथापि पुंस्त्वस्याप्यभिधानात्पुंस्त्वं द्वित्वं चास्याभिधेयं तयोश्चाभिधेययोरसति स्त्रीत्वादितरप्रमाणे परस्परनियमात्पुमांसावेव द्वौ गम्येते । तयोश्चोपदानमासेचनद्विधानार्थमेवेदं वचनम्

'कश्चिद्योग्यताजननार्थं कर्तारं परिक्रीणीते स्वयमेव योग्यत्वात्स तस्य कार्यं प्रति गुणभावेन परिक्रीणीते तेन गुणतयैव परिक्रीतानां कर्तॄणां प्रतीतेर्यथाप्राप्तानामेव च समाख्यया व्यवस्थानाद्यत्रैव पुरुषाणां गुणभावस्तत्रैव समाख्यानियम । संस्कारास्तु याजमाना वचनादृत्विजामपि भवन्ति हिरण्यमालिन ऋत्विज इतिवत् ।

तत्र वपनं विधाय वपनसाधनं विधत्ते—' लोहितायसेन निवर्तयते ' तै ब्रा १।५।६

भाष्यम्—अयसा निर्मित क्षुर आयस स च लोहितताम्रमिश्रेणायसा निर्मितः स्यात् । साधनं विधाय क्रमं विधत्ते—' उपपक्षावग्रे ' अथ श्मश्रूणि अथ केशान् । अथ दैव क्रम । ' श्मश्रूण्यग्रे । अथोपपक्षौ ' । अथ मानुष क्रम । इमामेव क्रमौ श्रौतौ । इत एवाक्रम्य स्मृतिकारैः पुरुषार्थतया विहितं क्षौरमनेनैव क्रमेण कार्यं नासुरक्रमेण । अथ हि आसुरक्रम—' केशानग्रे । अथ श्मश्रूणि । अथोपपक्षौ ' । एते सर्वे पक्षास्तैत्तिरीयब्राह्मणे १।५।६ इत्यत्र श्रुताः । स्मर्यते च कर्मनिष्ठेन भगवता वसिष्ठेन पुरुषार्थतया क्षौरकालनियम—

मासि मासि गृहस्थस्य पक्षे पक्षे तु यज्वनाम् ।
ऋतावृतौ यतीनां तु यथेष्टं ब्रह्मचारिणाम् ॥ १ ॥

अत्र मासि मासि गृहस्थस्येत्यनेन न हि यज्ञेभ्यो विना गृहस्थस्य स्थितिः संभवति तथापि विधुरत्वानवस्थायामाश्रमस्थितपरतया योज्यम् । अथवा यज्वनां गृहस्थस्य गृहस्थानां वचनव्यत्यासेन पक्षे पक्षे मासि वेति विकल्प्यते । अत्र प्रमाणम् ' केशश्मश्रु वपते वाशिखम् ' २।१।९ इति कात्यायनसूत्रात् । अत्र कर्काचार्य—पौर्णमासे वपनस्य विकल्पो नास्ति तस्मादमावास्यायामस्तीति सिद्धम् । अतो वचनव्यत्यास कृत्वैवोक्त एव स्मृतेरर्थो नान्य । देवयाज्ञिकास्तु कर्कमते वपनस्य विकल्पमाहुः । भर्तृयज्ञमते वपनं नियमेन अशिखं वा सशिखं वेति विकल्प । मानवे विशेष—' केशश्मश्रु वापयते दक्षिणोपक्रमान्केशान्सव्योपक्रमान्नखानप्यमत्र कनिष्ठिकात कारयते । न कक्षौ पत्नी नखांश्च कारयीत ' इति ।

आचार्यमतं पुनरानर्तते—

पर्वणि च केशश्मश्रु वापयते । आप श्रौ सू ४।१।४

ऐच्छिकस्याह्वापनस्य पर्वणि पाक्षिकं संनियम्यते वापयत एव पर्वणीति । अत्र धूर्तस्वामिन—अर्धमासवापनस्य यदि विद्यते ततोऽस्मिन्काले नियम्यते । प्रवृत्तस्य वपनस्य कालविधिपरत्वाद्वचनस्यार्थोत्तराभावादिच्छामात्रस्य वपनस्य कालमात्रनियमविधि । उत्तरत्रापि ४।१।५ इत्यत्र स्वश इति वचनात् ' यदि वर्धिष्णवः केशा विद्यन्त इच्छा च विद्यते ततोऽस्मिन्काले नियम । अपर्वणि कल्पे कर्मण्यन्यत्रापि इच्छया सया

कुर्यादिति । केचित्प्रकरणादेव कर्माङ्गत्वे सिद्धे पर्वग्रहणात्कर्मणोऽनङ्गमिति । अन्ये तु अपर्वकालेऽपि दर्शपूर्णमासप्रवृत्तौ कर्तव्यमित्याहु । ' यज्ञियो भूत्वा मेधमुपैति । १।६। ५ तै. इतिलिङ्गात् । केशवस्वामिमते तु लोमनखवपनप्राप्त्यर्थश्चकार इति स्वमते तु केशश्मश्रुग्रहण समानदेशस्य ,नखस्यापि प्रदर्शनमपि अल्पश अल्पान्यपि रोमाणि वापयीत । वाजसनेयिमतात्तु "अप्यल्पशो लोमानि वापयते" इति आप श्रौ सू ४।१।५।

अस्यार्थ —अल्पश: केशान्वापयते अल्पशो लोमानि वापयेदपिशब्द श्मश्रुग्रहणार्थ इतिसूत्रयोजनेति अस्मिन्नपि पक्षे प्रतिपूर्णमासमेव वपन न दर्शे ।

अत्र रुद्रदत्त —केशश्मश्रुषु च मध्ये श्मश्रु स्वल्पमपि वापयत एव ' केशास्त्वल्पे सन्तौ नोप्येरन्' इति । बौधायनस्त्वाह यदि केवल श्मश्रु वापयिष्यमाण स्यादिति ।

तदत्र निष्कर्ष —पुरुषार्थतया विहित वपनमैच्छिकम् । इष्टिप्रकरणे सूत्रित वपनमङ्ग मनङ्गमिति ।

तत्रापि पौर्णमासे वपनं नित्य दर्शे तु विकल्प । प्रकृत आधानाङ्गभूत वपन तु कार्यमेव । विशेषविधानात् । इति वपनविचार ।

अजस्रमीमांसा ।

" आधानाद्द्वादशरात्रमजस्रा " आश्व श्रौ सू २ । १ । ३५

" द्वादशाहमजस्रेष्वग्निषु यजमान स्वयमग्निहोत्र जुहुयात् " । आप ५ । २२ । १३

" द्वादशरात्र षड्रात्र त्रिरात्रमन्तत " । कातीये ४ । १० । १६

" अजस्रा अस्यैते अग्नयो भवन्ति " । बौधा.

एतेषु सूत्रेषु विचारितेषु भाष्यकारवृत्तिकारप्रयोगकारीयमतेषु मीमांसितेषु एतन्निष्पद्यते—

१ " अग्निहोत्रपूर्वाधाने एव अजस्रपक्ष "

तत्र प्रमाणम्—आधानाद्द्वादशरात्रमजस्रा । आश्व श्रौ. सू २ । १ । ३५ भगवता श्वलायनाचार्येणाधानान्तरमग्निहोत्रस्यैवोच्यमानत्वादनुष्ठानक्रमणैव कर्मणा व्याख्यानमित्युक्तत्वाच्च ।

२ " इष्टिपूर्वे अजस्रधारण नास्ति "

प्रमाणम्—अन्यमाहवनीय प्रणीयाग्नीनन्वादधाति । आप श्रौ. सू. १ । १ । २ इष्ट्यर्थतयान्यस्य प्रणयनस्य विधानात् । "अपवृज्य श्वोभूते पौर्णमासेन यजेत" आप. श्रौ. सू. ५ । २४ । ९ इत्यपवर्जनविधानाच्च ।

३ " सोमपूर्वाधानेऽप्यजस्रधारण नास्ति "

अगताग्रियोऽपि केचिदजस्रधारणमनुतिष्ठन्ति ते सूत्रविरोधादुपेक्ष्या। बोधायनसूत्राध्यायिना तु द्वैधसूत्रादजस्रधारणे विकल्प। आपस्तम्बसूत्राध्यायिना तु यदि मथित्वाहित स्याद्दक्षिणाग्निस्तर्हि तस्याजस्रधारण युक्तम्। आहार्यस्य दक्षिणाग्नेर्नास्त्यजस्रधारणम्। गार्हपत्यस्य चाजस्रधारण नित्यम्। नित्य गार्हपत्यमित्यापस्तम्बसूत्रात्। सत्याषाढीयाना तु आहार्योऽपि दक्षिणाग्निर्नित्य।

इत्यजस्रविचार।

एतत्सर्वं मनसि निधाय मीमांसकशिखामणिनाश्वलायनसूत्रवृत्तिकृता गार्ग्यनारायणेन व्याख्यात तदिद मीमांसामतमुदाहराम —

द्वादशसु रात्रीष्वनुनिर्वपत्। ते ब्रा १।१।६

सस्कृते कर्मसस्काराणा तदर्थत्वात्। जै ५।३।२१

सूत्रार्थ —सस्कृते पवमानेष्ट्यादिभि सस्कृतेष्वग्निषु कर्माणि वर्तेरन् कुत सस्काराणां तदर्थत्वात्। सस्कारशब्दा एत आहवनीयादय सस्कारस्य कस्यचिदभावेनाहवनीयादिषु कर्म स्यात्।

द्वादशाहे पवमानहवींषि निर्वपेत्। आ श्रौ सू ५।२१।२

मीमांसा—आधानप्रकरणे पवमानहवींषि विहितानि तान्याधानाद्विप्रकृष्यन्ते। द्वादशरात्रीष्वनुनिर्वपेदित्यादिभिस्तत्राग्निहोत्रादीनि किमाधानानन्तरमेव प्रवर्तेत उत तेषु कृतेष्विति विचारे कर्तव्यान्याहवनीयस्य निष्पन्नत्वात्। आधानमात्रस्य निरपेक्षस्य तदुत्पादकत्वात्पवमानहविर्भिस्तु निष्पन्नस्याहवनीयादयो निष्पन्ना। निष्पन्नेषु तेषु भवितव्य कर्मभिरिति प्राप्त उच्यते—न निरपेक्षमाधानमग्नीनामुत्पादक पवमानहविषामपि तदुत्पादकत्वात्। नच विकल्पस्तेषामाधानोत्तरकाले विधानात्। अत समुचिताना तदुत्पादकत्वान्न तेभ्य प्रागाहवनीयनिर्वृत्ति। यद्यप्याधानाङ्ग पवमानहवींषि तदाप्यनङ्गेन प्रधानेन साध्यानिष्पत्तेस्तदुत्तरकालमेवाग्निनिष्पत्ति। यत्तूक्त निष्पन्नस्यैवाग्ने सस्कारमात्र हविर्भिरिति। तथाऽप्यस्य सस्कारस्याहवनीयकार्योपयोगित्वात्तेन विना निष्पन्नस्याप्यग्नेरग्निहोत्रादिकार्याक्षमत्वात्तदुत्तरकालेव कर्मणा प्रवृत्ति। अत्र भाष्यकारवार्तिककारमते पूर्णाहुत्यन्तमाधानम्। एतत्तु सोमनाथीये बृहस्पतिराजपेयद्ग्यानेन घटि। पार्थसारथिमिश्रा अपि यदाऽप्याधानाङ्ग पवमानहवींषि शास्त्रदीपिकायामुद्घोषयाबभूव। एवमङ्गमनङ्गमिति पक्षद्वय तथापि पवमानहविर्निर्वाप सद्योऽथवा द्वादशाहे द्व्यहे त्र्यहे चतुरहेऽर्धमासे मास्यृतौ सवत्सरे वा इत्यापस्तम्बसूत्रे ५।२१।१।२ द्वादशरात्रिषु अनुनिर्वपेदिति तै० ब्राह्मण एतेषु त्रिषु पक्षेषु यदा कदा वा कार्य इति तु सर्ववादिसमतम्। त निर्वाप विनाऽग्निहोत्राद्यनुष्ठान न भवति। इति तु सामञ्जस्यम्। अधानाद्द्वादशरात्रमजस्रा॥ ३५॥ आश्व श्रौ सू २।१।३५ अत्राधानमिष्टिश्चोक्त्वा आधान ऊर्ध्वं द्वादशरात्रमजस्रा इत्युक्तम्। तस्यायमभिप्राय –यावता कर्मसमुदायेनाग्नीना सिद्धिर्भवतीति।

अग्नेः सगुणत्वविचारः ।

'अग्नये पवमानायाग्नये पावकायाग्नये शुचये' इति ।

अवचने च गुणशास्त्रमनर्थकं स्यात् ॥ जै० १०-४-२८

सूत्रार्थ — यदि च गुणाभिधानं न क्रियते गुणशासनमनर्थकं स्यात् ।

अग्नये पवमानायाग्नये पावकायाग्नय शुचय इति आप श्रौ सू ५ । २१ । ५

अत्र मीमांसा—तत्र संशय — तद्धाविषु निगमेषु किमेक एवाग्निशब्दो वक्तव्यः किमुभौ शब्दौ वक्तव्यौ । अग्नये पवमानाय निर्वपाम्यग्निं पवमानमावहाग्ने पवमानस्याहमुज्जितिमनूज्जेषमिति । 'तत्रैकेनार्थनिर्देशसिद्धेर्नोच्चारण द्वयो । सचाग्निशब्द एवैकश्चोदकानुग्रहो भवेत् ।' स्यादेव यदि प्रथममर्थं निधाय पश्चाच्छब्दाश्रयण स्याच्छब्द एव तु भावनाङ्गत्वेन विधीयत इत्यक्त तस्मादुभयोर्विधानादुभौ वक्तव्यौ ॥

आर्त्विज्यविचार. ।

ब्राह्मणानामिदं हवि । नेहाब्राह्मणस्यास्ति । तै ब्रा ३ । ७ । ५

स्मृतेर्वा स्याद्ब्राह्मणानाम् ॥ जै० १२-४-४३

याजनाध्यापनप्रतिग्रहा स्मृत्या ब्राह्मणानामेव विहिता ।

ब्राह्मणानृत्विजो वृणीते आप श्रौ सू १० । १० । १

अत्र मीमांसा—आधानप्रभृतिषु कर्मसु किं त्रिभिरपि द्विजातिभिरार्त्विज्य कारयितव्यमुत ब्राह्मणैरेवेति संशय । तत्र 'त्रयोऽप्यार्त्विज्यमर्हन्ति विद्वत्त्वात्स्मरणं पुन । पुरुषार्थमतः कर्मवैगुण्यं नास्ति किंचन '। याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपाया इति नियम पुरुषार्थतया स्मर्यते न क्रत्वर्थतया । तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वन्तौ नियमातिक्रमात्काम स्वधर्मात्प्रच्यवेयाता न तु क्रतो काचिद्गुणहानि । तस्मात्त्रिभिरप्यार्त्विज्य कारयितव्यमिति प्राप्तेऽभिधीयते 'द्विजोत्तमानामार्त्विज्य न तु क्षत्रियवैश्ययो । ब्राह्मणार्त्विज्यनियम क्रत्वर्थेनापि हि स्मृत ।' 'यज्ञं व्याख्यास्याम ' इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति स्मरन्तो यज्ञसूत्रकारा क्रत्वर्थेन स्मरन्तीति निस्पष्टमेतत् । तथाच भगवद्रामायणेऽपि 'क्षत्रियो याज्ञिको यस्य चाण्डालस्य विशेषत । कथं सदसि भोक्तारो हविस्तस्य सुरर्षय ' इति सुरा देवा ऋषयश्च ऋत्विग्भता इति देवताहविर्योगनिराकरणात्क्रतुवैगुण्यमेव दर्शितम् 'राजयाजकयाज्यस्य विनश्यति यथा हवि ' इति च । अब्राह्मणार्त्विज्ये हविर्नाशश्च स्मृत । लिङ्गानि च दर्शितानि ब्राह्मणानामिदं हविरित्येवमादीनि । तस्माद्ब्राह्मणानामेवार्त्विज्यमिति सिद्धम् । तथाच भगवानाश्वलायनाचार्य —

अन्तेवासी वा। आश्व. श्रौ. सू. २।४।४

अत्र वृत्ति.—ऋत्विजस्त्रिविधा देवभूताः पितृभूता मनुष्यभूता इति। ये कर्मणि कर्मणि त्रियन्ते ते देवभूताः। येऽन्वयागता ऋत्विजस्ते पितृभूताः। ये त्वेकस्य पुरुषस्य सर्वाणि कर्माणि कर्तुं व्रियन्ते ते मनुष्यभूता.। तत्र यस्याहिताग्नेः पितृभूता मनुष्यभूता वा ऋत्विज. सन्ति तेषामृत्विजामेकः कश्चित्पर्ववर्जितेषु कालेषु जुहुयात्। यस्य देवभूतास्तस्यान्तेवास्येवेति निनिवेशः। स एव गृह्येऽप्याह—

ऋत्विजो वृणीतेऽन्यूनानतिरिक्ताङ्गान्ये मातृत पितृतश्चेति।
यून ऋत्विजो वृणीत इत्येके॥

वरणक्रमोऽपि तत्रैव "ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युम्। अथोद्गातारम्।
इत्यार्त्विज्यविचारः।

प्रथमाधाने तु यत्सूत्रं गृहीतं स्यात्तत्सूत्राध्यायिनैवारणिदानं कार्यम्। तच्चाध्वर्योः सकाशात्। तथाचाचार्यसूत्रम्—

यजमानाय प्रयच्छति॥ ५।८।७ इत्यापस्तम्बः।
अध्वर्युश्च यजुर्वेदविहितानां पदार्थानां कर्ता।

इति समाख्यावशादयमर्थो लभ्य.। यथा ऋग्वेदेन होता इत्यादिस्थलेषु सर्वत्रैवमेव। न च समाख्यायाः किंचिद्बाधकं पश्यामः।

अजबन्धनविचारः।

उत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नाति। आप. श्रौ. सू. ५।७।१७।

कल्माष.—कृष्णबिन्दुः। अस्याजस्य प्रतिपत्तिरग्नीधे दक्षिणादानम्। सूत्रितं चाचार्येण—'अजं पूर्णपात्रमुपनर्तनं सार्वसूत्रमित्यग्नीधे' ५।१०।७ कात्यायनेन तु विकल्पेनाजबन्धनं सूत्रितम्—'गार्हपत्यागारेऽजं बध्नाति न वा' का. श्रौ. सू. ४।८।१ यदा बध्यते तदा प्रतिपत्तिरपि पूर्ववदेव सूत्रिता। यथा—विद्यमानं प्रातरग्नीधे दद्यात्।

इत्यजबन्धनविचारः।

विहारमक्रमादिविचारः॥

द्वादशसु विक्रमेष्वग्निमादधीत। चक्षुर्निमित आदधीत तै. ब्रा. १।१।४।

भाष्यम्—विक्रम —प्रक्रम। स च द्विपदः। तथा च प्रकृता द्विपदस्त्रिपदो वा। गार्हपत्याद्द्वादशसु विक्रमेषु समानेषु आहवनीयायतनं कृत्वा तत्राग्निमादध्यात्। चक्षुषा दृष्ट्वा

मार्येणैतावान्देशे द्वादशनिक्राम सम्भवतीति निश्चित्य तत्राद्धीत । सर्वं चैतत्सूत्रितं शुल्वसूत्रे आपस्तम्बाचार्येण । भाषित च करविन्देन ।

आग्न्याधेयिके विहारे गार्हपत्याहवनीययोरन्तराले विज्ञायते । शु २ । १ ।

अत्र भाष्यम्–अग्नय आधीयन्ते यस्मिन्कर्मणि तदग्न्याधेयं तद्भवम् आग्न्याधेयिकं । विह्रियन्तेऽस्मिन्नग्नय इति विहारो देवयजनदेशः । तमधिकृत्य गार्हपत्याहवनीययोरन्तराले गार्हपत्याहवनीयशब्दाभ्यां तदायतने लक्षणा । अन्तरालश्रुतिसामर्थ्यादन्तरालेऽन्तराले प्रस्तुतं विज्ञायते श्रूयते सर्वत्रास्यायमेवार्थः । गार्हपत्याहवनीयग्रहणात्तयोरेवान्तराले श्रुतिरिव पठ्यते । कात्यायनसत्याषाढावप्यमुमेवार्थं सूत्रयन्ति । बौधायनस्तु यथाब्राह्मणं परं चात्र प्रक्रमशब्दार्थो नाधिगत. । तदर्थमयमुपक्रम । प्रक्रमो द्विपदस्त्रिपदो वा । इत्याचार्यशुल्वसूत्रम् । २ । पदप्रमाणं करविन्दभाष्ये—पञ्चदशाङ्गुलः प्रक्रमः पदनिक्षेपवाची । पदादयो मानसाधनतया गृह्यन्ते । अतो न विक्षेपमात्रेण प्रयोजनम् । किंतु तत्सम्बन्धिना केनचिद्द्रव्येण । अतो विक्षेपफलभूतसंयोगविभागाभ्यामुपलक्षिते देशान्तराले परिमितरज्ज्वादिना प्रयोजनं गच्छन्हि शनैः जनः एकप्रक्रमस्य पदं भूमौ स्थापयित्वान्यत्पदं विक्षिप्य निदधाति । निर्विकारं सगच्छन्नयं पुरस्ताद्भूतनिधीयमानयोः पदयोरन्तरालं यथा पदपरिमितं भवति तथा गच्छति । अतो विक्षिप्तेन पदेन पदद्वयं व्याप्तमिति द्विपदः प्रक्रमः । यद्यपि त्रिपदो वा इत्याचार्यसूत्रे श्रुतं तथापि तत्र व्यवस्थैवम् । "पञ्चारत्निपुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदसमविभक्तस्य इति कात्यायनश्रौतसूत्रम् । १६।८।२१ । अत्र कर्कभाष्यं पञ्चारत्नयो यस्य स पञ्चभिररत्निभिः पुरुषः । दशभिः पदैः पुरुषः । द्वादशभिरङ्गुलैः पदमित्येवमर्थो न भवति । इत प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात् । अतश्चैवम्—पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः । तस्य दशमो भागः पदम् । पदस्य द्वादशो भागोऽङ्गुलम् । त्रिभिः पदैरेकः प्रक्रमः । इति । अत्र युक्तम्—प्रक्रमस्याद्यास्त्रित्यादिना सङ्ख्योक्ता श्रौतसूत्रे न प्रक्रमस्य प्रमाणमुक्तम् । अतः प्रक्रमस्त्रिपद इत्यसौ पठितत्वात्त्रिपद एवास्तु सर्वत्र । नैवम् । अग्निचित्प्रकरणे पठितत्वात्तस्यैवाङ्गं त्रिपदः प्रक्रमः । आधानसोमयोः प्रत्यक्षवचनाभावाद्यौगिकः प्रक्रमो ग्राह्यः । योगस्तु—'क्रमु पादविक्षेपे' प्रकर्षेण क्रमणं क्रमः । क्रमणेनाग्निमात्रं प्रक्रमो भवति तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमान् । २ । ५ । १ । १ । अरत्निस्तु पुरुषपञ्चमांशस्तस्मादाधाने द्विपदः प्रक्रम इति सिद्धम् । पञ्चदशाङ्गुलं पदमुत्तमः पक्षः । द्वादशाङ्गुलं मध्यमः । दशाङ्गुलं पदं क्षुद्रमिति प्रयोक्तारः । तत्र व्यवस्था—पञ्चदशाङ्गुलं पदमापस्तम्बसूत्रानुयायिनाम् । द्वादशाङ्गुलं कात्यायनीयानाम् । अन्येषां विकल्पः । इति । आयतनानि—तत्र प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनम् । एकादशसु राजन्यस्य । द्वादशसु वैश्यस्य ।

अन्तेवासी वा । आश्व. श्रौ. सू. २ । ४ । ४

अत्र वृत्ति.—ऋत्विजस्त्रिविधा देवभूताः पितृभूता मनुष्यभूता इति । ये कर्मणि कर्मणि व्रियन्ते ते देवभूताः । येऽन्ययागता ऋत्विजस्ते पितृभूताः । ये त्वेकस्य पुरुषस्य सर्वाणि कर्माणि कर्तुं व्रियन्ते ते मनुष्यभूताः । तत्र यस्याहिताग्नेः पितृभूता मनुष्यभूता वा ऋत्विजः सन्ति तेषामृत्विजामेकः कथितपर्ववर्जितेषु कालेषु जुहुयात् । यस्य देवभूतास्तस्यान्तेवास्येवेति विनिवेशः । स एव गृह्येऽप्याह—

ऋत्विजो वृणीतेऽन्यूनानतिरिक्ताङ्गान्ये मातृत. पितृतश्चेति ।

यून ऋत्विजो वृणीत इत्येके ॥

वरणक्रमोऽपि तत्रैव "ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युम् । अथोद्गातारम् । इत्यादिऋत्विग्विचारः ।

प्रथमाधाने तु यत्सूत्रं गृहीतं स्यात्तत्सूत्राध्यायिनैवारणिदानं कार्यम् । तच्चाध्वर्योः सकाशात् । तथाचाचार्यसूत्रम्—

यजमानाय प्रयच्छति ॥ ५ । ८ । ७ इत्यापस्तम्बः ।

अध्वर्युश्च यजुर्वेदविहितानां पदार्थानां कर्ता ।

इति समाख्यानशादयमर्थो लभ्यः । यथा ऋग्वेदेन होता इत्यादिस्थलेषु सर्वत्रैवमेव । न च समाख्यायाः किंचिद्बाधकं पश्यामः ।

अजबन्धनविचारः ।

उत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नाति । आप. श्रौ. सू. ५ । ७ । १७ ।

कल्माष·—कृष्णबिन्दुः । अस्याजस्य प्रतिपत्तिरग्नीधे दक्षिणादानम् । सूत्रितं चाचार्येण—'अजं पूर्णपात्रमुपवर्हणं सार्वसूत्रमित्यग्नीधे' ५ । १० । ७ कात्यायनेन तु विकल्पेनाजबन्धन सूत्रितम्—'गार्हपत्यागारेऽज बध्नाति न वा' का. श्रौ. सू. ४ । ८ । १ यदा बध्यते तदा प्रतिपत्तिरपि पूर्ववदेव सूत्रिता । यथा—विद्यमानं प्रातरग्नीधे दद्यात् ।

इत्यजबन्धनविचारः ।

विहारमक्रमादिविचारः ॥

द्वादशसु विक्रमेष्वग्निमादधीत । चक्षुर्निमित आदधीत तै. ब्रा. १ । १ । ४ ।

भाष्यम्—विक्रम —प्रक्रम. । स च द्विपदः । तथा च प्रक्रमो द्विपदस्त्रिपदो वा । गार्हपत्याद्द्वादशसु विक्रमेषु समाप्तेषु आहवनीयायतनं कृत्वा तत्राग्निमादध्यात् । चक्षुषा दृष्ट्वा

प्रायेणैतावान्देशे द्वादशविक्राम सम्भवतीति निश्चित्य तदादधीत । सर्वं चैतत्सूत्रितं शुल्व-सूत्रे आपस्तम्बाचार्येण । भाषितं च तत्कपर्दिना ।

आग्न्याधेयिके विहारे गार्हपत्याहवनीययोरन्तराले विज्ञायते । शु २ । १ ।

अत्र भाष्यम्–अग्नय आधीयन्ते यस्मिन्कर्मणि तदग्न्याधेयं तद्वाग आग्न्याधेयिक । विह्रियन्तेऽस्मिन्नग्नय इति विहारो देवयजनदेश । तमधिकृत्य गार्हपत्याहवनीययोरन्तराले गार्हपत्याहवनीयशब्दाभ्यां तदायतने लक्षणा । अन्तरालश्रुतिसामर्थ्यादन्तरालेऽन्तराल प्रस्तुय विज्ञायते श्रूयते सर्वत्रास्याप्रमेयार्थे । गार्हपत्याहवनीयग्रहणात्तयोरेवान्तराले श्रुतिरेव पठ्यते । कात्यायनस्यापाद्यप्यमुमेवार्थं सूत्रयति । बौधायनस्तु यथाब्राह्मणं परं चात्र प्रक्रमशब्दार्थो नाधिगत । तदर्थमस्मसुपक्रम । प्रक्रमो द्विपदस्त्रिपदो वा । इत्याचार्यशुल्व सूत्रम् । २ । पदप्रमाणं कपर्दिभाष्ये—पञ्चदशाङ्गुलं प्रक्रमं पदविक्षेपपराची । पदादयो मानसाधनतया गृह्यन्ते । अतो न विक्षेपमात्रेण प्रयोजनम् । किंतु तत्सम्बन्धिना केनचिद्द्रव्येण । अतो निक्षेपफलभूतसंयोगविभागाभ्यामुपलक्षिते देशान्तरालपरिमितरज्ज्वादिना प्रयोजनं गच्छन्हि सता जन एकप्रक्रमस्य पदं भूमौ स्थापयित्वान्यपदं विक्षिप्य निदधाति । निर्विकारं सगच्छतस्य पुरस्स्थितनिधीयमानयो पदयोरन्तरालं यथा पदपरिमितं भवति तथा गच्छति । अतो विक्षिप्तेन पदेन पदद्वयं व्याप्तमिति द्विपद प्रक्रम । यद्यपि त्रिपदो वा इत्याचार्यसूत्रे श्रुत तथापि तत्र व्यवस्थैवम् । "पञ्चारत्निपुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदसमविभक्तस्य इति कात्यायनश्रौतसूत्रम् । १६।८।२१ । अत्र कर्कभाष्यं पञ्चारत्नयो यस्य स पञ्चभिररत्निभि पुरुष । दशभि पदै पुरुष । द्वादशभिरङ्गुलै पदमित्येतदर्थो न भवति । इत आगरन्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात् । अतश्चैवम्—पुरुषस्य समविभक्तस्य य पञ्चमो भाग सोऽरत्नि । तस्य दशमो भाग पदम् । पदस्य द्वादशो भागोऽङ्गुलम् । त्रिभि पदैरेक प्रक्रम । इति । अत्र युक्तम्—प्रक्रमस्याद्यास्विस्यादिना सप्व्याक्ता श्रौतसूत्रे न प्रक्रमस्य प्रमाणमुक्तम् । अत प्रक्रमस्त्रिपद इत्यसौ पठितत्वात्त्रिपद एवास्तु सर्वत्र । नैवम् । अग्निचित्प्रकरणे पठितत्वात्तस्यैवाङ्ग त्रिपद प्रक्रम । आधानसोमयो प्रत्यक्षवचनाभावाद्यौगिक प्रक्रमो ग्राह्य । योगस्तु–'क्रमु पादविक्षेपे' प्रकर्षेण क्रमणं क्रम । क्रमणेनारत्निमात्र प्रक्रमो भवति तस्मात्प्राङ् प्रक्रामति अरत्निक्रमात् । २ । ५ । १ । १ । अरत्निस्तु पुरुषपञ्चमांशस्तस्मादाधाने द्विपद प्रक्रम इति सिद्धम् । पञ्चदशाङ्गुलं पदमुत्तमं पथ । द्वादशाङ्गुलं मध्यम । दशाङ्गुलं पदमिति प्रोक्तम् । तत्र व्यवस्था–पञ्चदशाङ्गुलं पदमापस्तम्बसूत्रानुयायिनाम् । द्वादशाङ्गुलं कात्यायनीयानाम् । अन्येषां विकल्प । इति । आयतनानि–तस्मात्प्राचीनमष्टासु प्रक्रमेषु ब्राह्मणस्याहवनीयायतनम् । एकादशसु राजन्य । द्वादशसु वैश्यस्य ।

अन्तेवासी वा। आश्व. श्रौ. सू. २।४।४

अत्र वृत्ति—ऋत्विजस्त्रिविधा देवभूताः पितृभूता मनुष्यभूता इति। ये कर्मणि कर्मणि व्रियन्ते ते देवभूताः। येऽन्वयागता ऋत्विजस्ते पितृभूताः। ये लोकस्य पुरुषस्य सर्वाणि कर्माणि कर्तुं व्रियन्ते ते मनुष्यभूता.। तत्र यस्याहिताग्नेः पितृभूता मनुष्यभूता वा ऋत्विज. सन्ति तेषामृत्विजामेकः कश्चित्पर्ववर्जितेषु कालेषु जुहुयात्। यस्य देवभूतास्तस्यान्तेवास्येवेति विनिवेशः। स एव गृह्येऽप्याह—

ऋत्विजो वृणीतेऽन्यूनानतिरिक्ताङ्गान्ये मातृत पितृतश्चेति।

यून ऋत्विजो वृणीत इत्येके॥

वरणक्रमोऽपि तत्रैव "ब्रह्माणमेव प्रथमं वृणीतेऽथ होतारमथाध्वर्युम्। अथोद्गातारम्।" इत्यादिर्ज्यविचारः।

प्रथमाधाने तु यस्य गृहीतं स्यात्तस्यानाध्यायिनैवारणिदानं कार्यम्। तच्चाध्वर्योः सकाशात्। तथाचाचार्यसूत्रम्—

यजमानाय प्रयच्छति॥ ५।८।७ इत्यापस्तम्बः।

अर्ध्वयुश्च यजुर्वेदविहितानां पदार्थानां कर्ता।

इति समाख्यानसादयमर्थो लभ्यः। यथा ऋग्वेदेन होता इत्यादिस्थलेषु सर्वत्रैवमेव। न च समाख्यायाः किंचिद्बाधकं पश्यामः।

अजबन्धनविचारः।

उत्तरेण गार्हपत्यायतनं कल्माषमजं बध्नाति। आप. श्रौ. सू. ५।७।१७।

कल्माष.—कृष्णबिन्दुः। अस्याजस्य प्रतिपत्तिरग्नीधे दक्षिणादानम्। सूत्रितं चाचार्येण—'अजं पूर्णपात्रमुपवर्हणं सार्वसूत्रमित्यग्नीधे' ५।१०।७ कात्यायनेन तु विकल्पेनाजबन्धनं सूत्रितम्—'गार्हपत्यागारेऽजं बध्नाति न वा' का. श्रौ. सू. ४।८।१ यदा बध्यते तदा प्रतिपत्तिरपि पूर्ववदेव सूत्रिता। यथा—'ध्रियमाणं प्रातरग्नीधे दद्यात्।

इत्यजबन्धनविचारः।

विहारभ्रमादिविचारः॥

द्वादशसु विक्रमेष्वग्निमादधीत। चक्षुर्निमितं आदधीत तै. ब्रा. १।१।४।

भाष्यम्—विक्रम —प्रक्रम। स च द्विपद.। तथा च प्रक्रमो द्विपदस्त्रिपदो वा। गार्हपत्याद्द्वादशसु विक्रमेषु समाप्तेषु आहवनीयायतनं कृत्वा तत्राग्निमादध्यात्। चक्षुषा दृष्ट्वा

तत्वाङ्गस्य कृतं भवति तेनाङ्गस्थोऽप्यसौ प्रधानधर्म इति विलम्बितप्रतीतिरपि बलीयान्। इतरथा प्रधानस्यैव वैगुण्यापत्तेः। अतोऽङ्गधर्ममुच्चैष्ट्वं बाधित्वा प्रधानधर्म उपांशुत्वं स्यादिति सिद्धान्तितम्। एवं 'तद्गुणविरोधे च तादर्थ्यात्' इत्यनेन गतप्रायं स्यात्। न चोदाहरणमपि युक्तम्। वारवन्तीयं गायतीत्यस्याङ्गविधेरपि याजुर्वेदिकत्वादित्यन्यथा व्याख्यातम्। यस्य मन्त्रस्य वेदान्तरे समाम्नानमुत्पत्तिर्वेदान्तरे च विनियोगविधिस्तस्य किमुत्पत्तिवेदनिबन्धनः स्वरोऽथवा विनियोगवेदनिबन्धन इति संशयः। तत्र—'उत्पत्तेः पूर्वभावित्वात्तन्निबन्धन एव हि स्वरः प्रथमभावित्वाद्युक्तो नान्यो विलम्बितः।' नैतदेवम् 'न खल्वाम्नानमात्रेण मन्त्रस्य स्वारप्रयोज्यता। तेन क्रियत इत्येवमतो वक्तुं न शक्यते। तेन तु क्रियते मन्त्रो यत्र वेदे विधीयते। विध्यायत्तं ह्यनुष्ठानं तत्र चापेक्षितः स्वरः।' प्रयोज्यतयावधारितस्य मन्त्रस्य स्वरापेक्षा भवति न स्वरूपावगतिमात्रेण तस्माद्वारवन्तीयादेः सामवेदेनाक्रियमाणत्वादनपेक्षितत्वाच्च न तन्निबन्धनमुच्चैष्ट्वं यजुर्वेदेन तु क्रियमाणत्वात्स्वरापेक्षणाच्च तदीयमुपांशुत्वमेव स्यात्।

अत्र—भूयस्त्वेनोभयश्रुति। जै. ३। ३। ९

इत्यत्र कुतूहलवृत्तौ—

वार्तिकरीत्या विनियोगविधिर्वेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वेदिकत्वेऽपि तदङ्गमन्त्रेषु तत्तद्वेदस्वरप्राप्तेस्तस्य याजुर्वेदिकत्वसाधने फलाभावात्सूत्रमिदमन्यत्र योज्यम्। तद्यथा। आधानमधिकृत्य सामवेदे श्रुतम् 'जातेऽग्नौ रथंतरं गायति' इत्यादि तथा यजुर्वेदे श्रुतम् 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि। तदेतदुभयश्रुति उभयत्र श्रूयमाणं साम भूयस्त्वेन विधिप्रतीतिपौष्कल्येन हेतुनान्यतरत्र विहितमिति निर्धार्यम्। सामान्यस्वरूपस्यानवगमे हि तद्विनियोगविधिर्न संभवति। तत्स्वरूपावगमश्च सामवेद एवेति तत्रैव तद्विधिः। यजुर्वेदे 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि तु सामवेदविहितरथंतरानुवादेन कालान्तरविधिपरमिति न तत्र तद्विधिः। ततश्चाधानाङ्गरथंतरादिसामसूच्चैष्ट्वमेव। यस्य तु मन्त्रस्य वेदद्वयेऽपि समाम्नानम्। विनियोगविधिश्चालन्यथा सिद्धस्तत्रागत्या विकल्पः।

"उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामाभिगायति"

इतिश्रुतिवाक्यं शाबरभाष्ये १०। ८। ९ जै. इत्यत्रोदाहृतम्।

उपवादश्च तद्वत्। जै. १०। ८। ९

सूत्रार्थः—उपवादः—उपवीतेति निन्दा तद्वत्। ग्रहणाग्रहणवत्।

ब्रह्माग्न्याधेये सामानि गायति। आप. श्रौ. सू. ५। ६। १७

मीमांसा-शा. दी. अग्न्याधेये वारवन्त्यादिसामगानं विधाय श्रूयते—"न ब्रह्मा सामानि गायेत्" इति। तत्र संशयः—किमयं प्रतिषेधो नित्यं सामगानमुत प्रतिषेधार्थ-

दक्षिणतः पुरस्ताद्वितृतीयदेशे बार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनम् । अन्यदाहवनीयागारमन्यद्गार्हपत्यस्य ।

अग्रेणाहवनीयं सभाया सभ्यः । तं पूर्वेणावसथ आवसथ्यः । आ. श्रौ. सू. ९ । ४ ३,। ५ । ६ । ७ । ८

वृत्तिः—अष्टासु प्रक्रमेषु अतीतेषु आहवनीयस्थानम् । एवं सर्वत्र गार्हपत्यस्य दाक्षिणतः पुरस्ताद्गार्हपत्याहवनीययोरन्तरालदेशस्य तृतीयोंऽशो विगतो यस्माद्देशात्स तथोक्तः । समीपसप्तमी चेयं वितृतीयदेशस्य पश्चात्स्तोकान्तरे देश इत्यर्थः । उक्तं च शुल्बसूत्र आचार्येणैव गार्हपत्याहवनीययोरन्तरालमित्यादिना । गार्हपत्यागारात्पृथगेवाहवनीयस्याप्यागारं कर्तव्यमित्यर्थः । तयोरेवान्यतरत्र दक्षिणाग्न्यायतनम् ।

सभा द्यूतशाला तत्र सभ्योऽग्निराधेयस्ततश्च तत्रास्यायतनम् ।

आवसथः—अतिथीनां वासभूमि. ।

साममीमांसा ।

रथंतरमभिगायते गार्हपत्य आधीयमाने ।
वामदेव्यमभिगायत उद्ध्रियमाणे ॥
बृहदभिगायत आहवनीय आधीयमाने ।

यद्वारवन्तीयमभिगायते । श्यैतेन श्येती कुरुते । तै. ब्रा. १ । १ । ८

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसयोगः ॥ ९ ॥ जै. ३ । ३ । ९

सूत्रार्थ.—गुणमुख्यव्यतिक्रमे गुणः अङ्गम् । मुख्य प्रधानं तयोर्व्यतिक्रमे विरोधे तदर्थत्वात् प्रधानार्थत्वादङ्गस्य मुख्येन प्रधानेन सहाङ्गस्य वेदसंयोग सबन्धः ।

मथ्यमाने शक्तेः साकृतेः साम गायति धूमे जाते गाथिनः कौशिकस्य ।

. अरण्योर्निहितो जातवेदा इति च । आप. श्रौ. सू. ५ । १०
रथंतरे गीयमाने यज्ञायज्ञीये च । आप. श्रौ. सू. ५ । ११ । ६ ।
यज्ञायज्ञीये गीयमाने आप. श्रौ. सू. ५ । १३ । ८ ।
बृहति गीयमाने श्यैतवारवन्तीययोर्यज्ञायज्ञीये च आप. श्रौ. सू. ५ । १५ । ६

तत्र मीमासा—याजुर्वेदिकमाधानं तस्य सामवेदे वारवन्तीयं गायतीत्यङ्गविधि. । तत्र वारवन्तीयस्य किं सामवेदिकः स्वर उत याजुर्वेदिक इति संदेहः प्रधानविधिनिबन्धनस्य स्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वात्स्ववेदनिबन्धन एव स्वरोऽनपेक्षतया शीघ्रं प्रतीयमानो युक्त इति प्राप्ते प्रधानधर्मत्वादुपाङ्गत्वमेव बलीयः । साङ्ग ह्याधानं विधिना विधीयते अतस्तादृशस्यैव याजुर्वेदिकत्वादुपांशुत्वं धर्मः । न चाङ्गेष्वक्रियमाण

तत्साङ्गस्य कृतं भवति तेनाङ्गस्योऽप्यसौ प्रधानधर्म इति विलम्बितप्रतीतिरपि बलीयान् । इतरथा प्रधानस्यैव वैगुण्यापत्तेः । अतोऽङ्गधर्ममुच्चैष्ट्वं बाधित्वा प्रधानधर्म उपांशुत्वं स्यादिति सिद्धान्तितम् । एवं 'तद्गुणविरोधे च तादर्थ्यात्' इत्यनेन गतप्रायं स्यात् । न चोदाहरणमपि युक्तम् । वारवन्तीयं गायतीत्यस्याङ्गविधेरपि याजुर्वैदिकत्वादित्यन्यथा व्याख्यातम् । यस्य मन्त्रस्य वेदान्तरे समाम्नानमुत्पत्तिर्वेदान्तरे च विनियोगविधिस्तस्य किमुत्पत्तिवेदनिबन्धनः स्वरोऽथवा विनियोगवेदनिबन्धन इति संशयः । तत्र—'उत्पत्तेः पूर्वभावित्वात्तन्निबन्धन एव हि स्वरः प्रथमभावित्वाद्युक्तो नान्यो विलम्बितः ।' नैतदेवम् 'न खल्वाम्नानमात्रेण मन्त्रस्य स्यात्प्रयोज्यता । तेन क्रियत इत्येवमतो वक्तुं न शक्यते । तेन तु क्रियते मन्त्रो यत्र वेदे विधीयते । विध्यायत्तं ह्यनुष्ठानं तत्र चापेक्षितः स्वरः ।' प्रयोज्यतयावधारितस्य मन्त्रस्य स्वरापेक्षा भवति न स्वरूपावगतिमात्रेण तस्माद्वारवन्तीयादेः सामवेदेनाक्रियमाणत्वादनपेक्षितत्वाच्च न तन्निबन्धनमुच्चैष्ट्वं यजुर्वेदेन तु क्रियमाणत्वात्स्वरापेक्षणाच्च तदीयमुपांशुत्वमेव स्यात् ।

अत्र—भूयस्त्वेनोभयश्रुति । जै. ३ । ३ । ९

इत्यत्र कुतूहलवृत्तौ—

वार्तिकरीत्या विनियोगविधिवेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वैदिकत्वेऽपि तदङ्गमन्त्रेषु तत्तद्वेदस्वरप्राप्तेस्तस्य याजुर्वैदिकत्वसाधने फलाभावात्सूत्रमिदमन्यत्र योज्यम् । तद्यथा । आधानमधिकृत्य सामवेदे श्रुतम् 'जातेऽग्नौ रथंतरं गायति' इत्यादि तथा यजुर्वेदे श्रुतम् 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि । तदेतदुभयश्रुति उभयत्र श्रूयमाणं साम भूयस्त्वेन विधिप्रतीतिपौष्कल्येन हेतुनान्यतरत्र विहितमिति निर्धार्यम् । सामान्यस्वरूपस्यानवगमे हि तद्विनियोगविधिर्न संभवति । तत्स्वरूपावगमश्च सामवेद एवेति तत्रैव तद्विधिः । यजुर्वेदे 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि तु सामवेदविहितरथंतरानुवादेन कालान्तरविधिपरमिति न तत्र तद्विधिः । ततश्चाधानाङ्गरथंतरादिसाम्नामुच्चैष्ट्वमेव । यस्य तु मन्त्रस्य वेदद्वयेऽपि समाम्नानम् । विनियोगविधिश्चातन्यथासिद्धस्तत्रागत्या विकल्पः ।

" उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामाभिगायति "

इतिश्रुतिवाक्यं शाबरभाष्ये १० । ८ । ९ जै. इत्यत्रोदाहृतम् ।

उपवादश्च तद्वत् । जै. १० । ८ । ९

सूत्रार्थः—उपवादः—उपवीतेति निन्दा तद्वत् । ग्रहणाग्रहणवत् ।

ब्रह्माग्न्याधेये सामानि गायति । आप. श्रौ. सू. ५ । ६ । १७

मीमांसा-शा. दी. अग्न्याधेये वारवन्त्यादिसामगानं विधाय श्रूयते—" न ब्रह्मा सामानि गायेत् " इति । तत्र संशयः—किमयं प्रतिषेधो नित्यं सामगानमुत प्रतिषेधार्थ-

दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनम् । अन्यदाहवनीयागारमन्यद्गार्हपत्यस्य ।

अग्रेणाहवनीयं सभाया सभ्यः । तं पूर्वेणावसथ आवसथ्यः । आ. श्रौ. सू. ५ । ४ ३,। ५ । ६ । ७ । ८

वृत्ति —अष्टासु प्रक्रमेषु अतीतेषु आहवनीयस्थानम् । एवं सर्वत्र गार्हपत्यस्य दाक्षिणतः पुरस्ताद्गार्हपत्याहवनीययोरन्तरालदेशस्य तृतीयोंऽशो विगतो यस्माद्देशात्स तथोक्तः । समीपसप्तमी चेयं वितृतीयदेशस्य पश्चात्स्तोकान्तरे देश इत्यर्थः । उक्तं च शुल्वसूत्र आचार्येणैव गार्हपत्याहवनीययोरन्तरालमित्यादिना । गार्हपत्यागारात्पृथगेवाहवनीयस्याप्यागारं कर्तव्यमित्यर्थः । तयोरेवान्यतरत्र दक्षिणाग्न्यायतनम् ।

सभा द्यूतशाला तत्र सभ्योऽग्निराधेयस्ततश्च तत्रास्यायतनम् ।

आवसथः—अतिथीनां वासभूमिः ।

साममीमांसा ।

रथंतरमभिगायते गार्हपत्य आधीयमाने ।
वामदेव्यमभिगायत उद्ध्रियमाणे ॥
बृहदभिगायत आहवनीय आधीयमाने ।

यद्वारवन्तीयमभिगायते । श्यैतेन श्येती कुरुते । तै. ब्रा. १ । १ । ८

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसयोगः ॥ ९ ॥ जै. ३ । ३ । ९

सूत्रार्थः—गुणमुख्यव्यतिक्रमे गुणः अङ्गम् । मुख्य प्रधानं तयोर्व्यतिक्रमे विरोधे तदर्थत्वात् प्रधानार्थत्वादङ्गस्य मुख्येन प्रधानेन सहाङ्गस्य वेदसंयोग सबन्धः ।

मथ्यमाने शक्तेः साकृतेः साम गायति धूमे जाते गाथिनः कौशिकस्य ।

अरण्योर्निहितो जातवेदा इति च । आप. श्रौ. सू. ५ । १०

रथंतरे गीयमाने यज्ञायज्ञीये च । आप. श्रौ. सू. ५ । ११ । ६ ।

यज्ञायज्ञीये गीयमाने आप. श्रौ. सू. ५ । १३ । ८ ।

बृहति गीयमाने श्यैतवारवन्तीययोर्यज्ञायज्ञीये च आप. श्रौ. सू. ५ । १५ । ६

तत्र मीमासा—याजुर्वेदिकमाधानं तस्य सामवेदे वारवन्तीयं गायतीत्यङ्गविधिः । तत्र वारवन्तीयस्य किं सामवेदिकः स्वर उत याजुर्वेदिक इति संदेहः प्रधानविधिनिबन्धनस्य स्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वात्स्ववेदनिबन्धन एव स्वरोऽनपेक्षतया शीघ्रं प्रतीयमानो युक्त इति प्राप्ते प्रधानधर्मत्वादुपांशुत्वमेव बलीयः । साङ्गं ह्याधानं विधिना विधीयते अतस्तादृशस्यैव याजुर्वेदिकत्वादुपांशुत्वं धर्मः । न चाङ्गेष्वाक्रियमाण

तत्साङ्गस्य कृतं भवति तेनाङ्गस्थोऽप्यसौ प्रधानधर्म इति विलम्बितप्रतीतिरपि बलीयान् । इतरथा प्रधानस्यैव वैगुण्यापत्तेः । अतोऽङ्गधर्ममुच्चैष्ट्वं बाधित्वा प्रधानधर्म उपांशुत्वं स्यादिति सिद्धान्तितम् । एवं 'तद्गुणविरोधे च तादर्थ्यात्' इत्यनेन गतप्रायं स्यात् । न चोदाहरणमपि युक्तम् । वारवन्तीयं गायतीत्यस्याङ्गविधेरपि याजुर्वेदिकत्वादित्यन्यथा व्याख्यातम् । यस्य मन्त्रस्य वेदान्तरे समाम्नानमुत्पत्तिर्वेदान्तरे च विनियोगविधिस्तस्य किमुत्पत्तिवेदनिबन्धनः स्वरोऽथवा विनियोगवेदनिबन्धन इति संशय । तत्र—'उत्पत्तेः पूर्वभावित्वात्तन्निबन्धन एव हि स्वरः प्रथमभावित्वादुक्तो नान्यो विलम्बितः ।' नैतदेवम् 'न ह्याम्नानमात्रेण मन्त्रस्य स्यात्प्रयोज्यता । तेन क्रियत इत्येवमतो वक्तुं न शक्यते । तेन तु क्रियते मन्त्रो यत्र वेदे विधीयते । विध्यायत्तं ह्यनुष्ठानं तत्र चापेक्षितः स्वरः ।' प्रयोज्यतयावधारितस्य मन्त्रस्य स्वरापेक्षा भवति न स्वरूपावगतिमात्रेण तस्माद्वारवन्तीयादेः सामवेदेनाक्रियमाणत्वादनपेक्षितत्वाच्च न तन्निबन्धनमुच्चैष्ट्वं यजुर्वेदेन तु क्रियमाणत्वात्स्वरापेक्षणाच्च तदीयमुपांशुत्वमेव स्यात् ।

अत्र—भूयस्त्वेनोभयश्रुति । जै. ३ । ३ । ९

इत्यत्र कुतूहलवृत्तौ—

वार्तिककारीया विनियोगविधिवेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वेदिकत्वेऽपि तदङ्गमन्त्रेषु तत्तद्वेदस्वरप्राप्तेस्तस्य याजुर्वेदिकत्वसाधने फलाभावात्सूत्रमिदमन्यत्र योज्यम् । तद्यथा । आधानमधिकृत्य सामवेदे श्रुतम् 'जातेऽग्नौ रथंतरं गायति' इत्यादि तथा यजुर्वेदे श्रुतम् 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि । तदेतदुभयश्रुति उभयत्र श्रूयमाणं साम भूयस्त्वेन विधिप्रतीतिपौष्कल्येन हेतुनान्यतरत्र विहितमिति निर्णेयम् । सामान्यस्वरूपस्यानवगमे हि तद्विनियोगविधिर्न सम्भवति । तत्स्वरूपावगमश्च सामवेद एवेति तत्रैव तद्विधिः । यजुर्वेदे 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि तु सामवेदविहितरथंतरानुवादेन कालान्तरविधिपरमिति न तत्र तद्विधि । ततश्चाधानाङ्गरथंतरादिसामसूच्चैष्ट्वमेव । यस्य तु मन्त्रस्य वेदद्वयेऽपि समाम्नानम् । विनियोगविधिश्चान्यथा सिद्धस्तत्रागत्या विकल्प. ।

"उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामाभिगायति"

इतिश्रुतिवाक्य शाबरभाष्ये १० । ८ । ९ जै, इत्यत्रोदाहृतम् ।

उपवादश्च तद्वत् । जै. १० । ८ । ९

सूत्रार्थः—उपवाद —उपवीतेति निन्दा तद्वत् । ग्रहणाग्रहणवत् ।

ब्रह्माग्न्याधेये सामानि गायति । आप. श्रौ. सू. ४ । ६ । १७

मीमांसा-शा. दी. अग्न्याधेये वारवन्त्यादिसामगानं विधाय श्रूयते—"न ब्रह्मा सामानि गायेत्" इति । तत्र संशयः—किमयं प्रतिषेधो नित्यं सामगानमुत प्रतिषेधार्थ-

दक्षिणतः पुरस्ताद्वितृतीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेरायतनम् । अन्यदाहवनीयागारमन्यद्गार्हपत्यस्य ।

अग्रेणाहवनीयं सभायां सभ्यः । तं पूर्वेणावसथ आवसथ्यः । आ. श्रौ. सू. ९ । ४ ३,। ५ । ६ । ७ । ८

वृत्तिः—अपरासु प्रक्रमेषु अतीतेषु आहवनीयस्थानम् । एवं सर्वत्र गार्हपत्यस्य दाक्षिणतः पुरस्ताद्गार्हपत्याहवनीययोरन्तरालदेशस्य तृतीयोऽशो विगतो यस्माद्देशात्स तथोक्तः । समीपसप्तमी चेयं वितृतीयदेशस्य पश्चात्तोकान्तरे देश इत्यर्थः । उक्तं च शुल्वसूत्र आचार्येणैव गार्हपत्याहवनीययोरन्तरालमित्यादिना । गार्हपत्यागारात्पृथगेवाहवनीयस्याप्यागारं कर्तव्यमित्यर्थः । तयोरेवान्यतरत्र दक्षिणाग्न्यायतनम् ।

सभा द्यूतशाला तत्र सभ्योऽग्निराधेयस्ततश्च तत्रायतनम् ।

आवसथः—अतिथीनां वासभूमिः ।

साममीमांसा ।

रथंतरमभिगायते गार्हपत्य आधीयमाने ।
वामदेव्यमभिगायत उद्ध्रियमाणे ॥
बृहदभिगायत आहवनीय आधीयमाने ।

यद्वारवन्तीयमभिगायते । श्यैतेन श्येती कुरुते । तै. ब्रा. १ । १ । ८

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ९ ॥ जै. ३ । ३ । ९

सूत्रार्थः—गुणमुख्यव्यतिक्रमे गुणः अङ्गम् । मुख्यं प्रधानं तयोर्व्यतिक्रमे विरोधे तदर्थत्वात् प्रधानार्थत्वादङ्गस्य मुख्येन प्रधानेन सहाङ्गस्य वेदसंयोगः संबन्धः ।

मथ्यमाने शक्तेः साङ्कृतेः साम गायति धूमे जाते गाथिनः कौशिकस्य ।

. अरण्योर्निहितो जातवेदा इति च । आप. श्रौ. सू. ५ । १०
रथंतरे गीयमाने यज्ञायज्ञीये च । आप. श्रौ. सू. ५ । ११ । ६ ।
यज्ञायज्ञीये गीयमाने आप. श्रौ. सू. ५ । १३ । ८ ।
बृहति गीयमाने श्यैतवारवन्तीययोर्यज्ञायज्ञीये च आप. श्रौ. सू. ५ । १५ । ६

तत्र मीमांसा—याजुर्वेदिकमाधानं तस्य सामवेदे वारवन्तीयं गायतीत्यङ्गविधिः । तत्र वारवन्तीयस्य किं सामवेदिकः स्वर उत याजुर्वेदिक इति संदेहः प्रधानविधिनिबन्धनस्य स्वरस्य प्रधानैकवाक्यतापेक्षित्वेन विलम्बितत्वात्स्ववेदनिबन्धन एव स्वरोऽनपेक्षतया शीघ्रं प्रतीयमानो युक्त इति प्राप्ते प्रधानधर्मत्वादुपांशुत्वमेव बलीयः । साङ्गं ह्याधानं विधिना विधीयते अतस्तादर्थ्यादस्यैव याजुर्वेदिकत्वादुपांशुत्वं धर्मः । न चाङ्गत्वक्रियमाणं

तत्साङ्गस्य कृतं भवति तेनाङ्गस्योऽप्यसौ प्रधानधर्म इति विलम्बितप्रतीतिरपि बलीयान्। इतरथा प्रधानस्यैव वैगुण्यापत्तेः। अतोऽङ्गधर्ममुच्चैष्ट्वं बाधित्वा प्रधानधर्म उपांशुत्व स्यादिति सिद्धान्तितम्। एवं 'संगुणविरोधे च तादर्थ्यात्' इत्यनेन गतप्रायं स्यात्। न चोदाहरणमपि युक्तम्। वारवन्तीयं गायतीत्यस्याङ्गविधेरपि याजुर्वेदिकत्वादित्यन्यथा व्याख्यातम्। यस्य मन्त्रस्य वेदान्तरे समाम्नानमुत्पत्तिर्वेदान्तरे च विनियोगविधिस्तस्य किमुत्पत्तिवेदनिबन्धनः स्वरोऽथवा विनियोगवेदनिबन्धन इति संशयः। तत्र—'उत्पत्तेः पूर्वभावित्वात्तन्निबन्धन एव हि स्वरः प्रथमभावित्वाद्युक्तो नान्यो विलम्बितः।' नैतदेवम् 'न खल्वाम्नानमात्रेण मन्त्रस्य स्यात्प्रयोज्यता। तेन क्रियत इत्येवमतो वक्तुं न शक्यते। तेन तु क्रियते मन्त्रो यत्र वेदे विधीयते। विध्यायत्तं ह्यनुष्ठानं तत्र चापेक्षितः स्वरः।' प्रयोज्यतयावधारितस्य मन्त्रस्य स्वरापेक्षा भवति न स्वरूपावगतिमात्रेण तस्माद्वारवन्तीयादेः सामवेदेनाक्रियमाणत्वादनपेक्षितत्वाच्च न तन्निबन्धनमुच्चैष्ट्वं यजुर्वेदेन तु क्रियमाणत्वात्स्वरापेक्षणाच्च तदीयमुपांशुत्वमेव स्यात्।

अत्र—भूयस्त्वेनोभयश्रुति। जै. ३। ३। ९

इत्यत्र कुतूहलवृत्तौ—

वार्तिकरीत्या विनियोगविधिवेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वेदिकत्वेऽपि तदङ्गमन्त्रेषु तत्तद्वेदस्वरप्राप्तेस्तस्य याजुर्वेदिकत्वसाधने फलाभावात्सूत्रमिदमन्यत्र योज्यम्। तथा। आधानमधिकृत्य सामवेदे श्रुतम् 'जातेऽग्नौ रथंतरं गायति' इत्यादि तथा यजुर्वेदे श्रुतम् 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि। तदेतदुभयश्रुति उभयत्र श्रूयमाणं साम भूयस्त्वेन विधिप्रतीतिपौष्कल्येन हेतुनान्यतरत्र विहितमिति निर्धार्यम्। सामान्यस्वरूपस्यानवगमे हि तद्विनियोगविधिर्न संभवति। तत्स्वरूपावगमश्च सामवेद एवेति तत्रैव तद्विधिः। यजुर्वेदे 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि तु सामवेदविहितरथंतरानुवादेन कालान्तरविधिपरमिति न तत्र तद्विधिः। ततश्चाधानाङ्गरथंतरादिसामसूच्चैष्ट्वमेव। यस्य तु मन्त्रस्य वेदद्वयेऽपि समाम्नानम्। विनियोगविधिश्चान्यत्र सिद्धस्तत्प्रागल्या विकल्पः।

"उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामाभिगायति।"

इतिश्रुतिवाक्यं शाबरभाष्ये १०। ८। ९ जै. इत्यत्रोदाहृतम्।

उपवादश्च तद्वत्। जै. १०। ८। ९

सूत्रार्थः— उपवादः—उपवीतेति निन्दा तद्वत्। ग्रहणाग्रहणवत्।

ब्रह्माग्न्याधेये सामानि गायति। आप. श्रौ. सू. ५। ६। १७

मीमांसा-शा. दी. अग्न्याधेये वारवन्त्यादिसामगानं विधाय श्रूयते—"न ब्रह्मा सामानि गायेत्" इति। तत्र संशयः—किमयं प्रतिषेधो नित्यं सामानुवाद प्रतिषेधार्थः

आधानपद्धतेः शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
		प्रस्तावना ।	
२	२३	पिण्डः	पिण्डं
		आपस्तम्बसूत्रम् ।	
१	१९	दुरिति	दुरीति
५	५	विभयो	विभूयो
७	१	तेनयाय	तनयाय
१०	८	मद्ो	मदे
१०	(टिप्पण्यां)२	एसु	एवमु
११	१५	निर्वपेत	निर्वपेत्
१२	२७	परुधीत	परुन्धीते
१३	१	ददन्न दर्यात	ददन्नदर्यात
		आधानसंभारपट्टिका ।	
४	९	गोः	गौ
		इष्टिद्वयम् ।	
३१	२	निर्वापाणां	निर्वाप्याणाम
		आ. प्र. मन्त्रभाष्यम् ।	
१	२३	स्वी-करोमि	स्वीकरोमि
		आधानमीमांसा ।	
२	३	शारदि	शरद्
२	५	द्वि त्रि	द्वित्रि
२	१८	०	व
४	७	य छन्दस्य	तच्छन्दस्य
७	५	नक्षत्रान्तर	नक्षत्रानन्तरं
७	२३	वसना	वसाना

समाप्तमिदं शुद्धिपत्रम् ।

१ यत्र यत्र दक्षिणादानप्रस्तावे निष्क्रयद्रव्यमित्युक्तेऽपि तत्र तत्तद्द्रव्य दानसंकल्पउ-दाहृत् यथा–वसतरीनिष्क्रयद्रव्य ते दास्य इत्यत्र वत्सतरीस्ते दास्य इति एवं सर्वत्र ।